# धर्मशास्त्रम् अर्थशास्त्रं च

**Course Code: M23SN01DE**
**Discipline Specific Elective Course**
**Postgraduate Programme in**
**Sanskrit Language and Literature**
**Self Learning Material**



SREENARAYANAGURU
OPEN UNIVERSITY

## SREENARAYANAGURU OPEN UNIVERSITY

The State University for Education, Training and Research in Blended Format, Kerala

# SREENARAYANAGURU OPEN UNIVERSITY

## Vision

*To increase access of potential learners of all categories to higher education, research and training, and ensure equity through delivery of high quality processes and outcomes fostering inclusive educational empowerment for social advancement.*

## Mission

To be benchmarked as a model for conservation and dissemination of knowledge and skill on blended and virtual mode in education, training and research for normal, continuing, and adult learners.

## Pathway

Access and Quality define Equity.

SGOU

# धर्मशास्त्रम् अर्थशास्त्रं च

Course Code: M23SN01DE

Semester - III

## Discipline Specific Elective Course
## Postgraduate Programme
## Sanskrit Language and Literature
## Self Learning Material

**(With Model Question Paper Sets)**

SGOU

SREENARAYANAGURU
OPEN UNIVERSITY

**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

# धर्मशास्त्रम् अर्थशास्त्रं च

Course Code: M23SN01DE
Semester- III
Discipline Specific Elective Course
MA Sanskrit Language and Literature

വിദ്യകൊണ്ട് സ്വതന്ത്രരാവുക
SREENARAYANAGURU
OPEN UNIVERSITY

**Academic Committee**

Dr. Shyla C.A.
Prof. C.S. Sasikumar
Prof. M. S. Muraleedharan Pillai
Dr. K. M. Sangameshan
Dr. J.P. Prajith
Dr. Sreejith T.G.
Dr. N.K. Sundareswaran
Dr. K. Unnikrishnan
Dr. Chandrashekaran Nair

**Development of the Content**

Dr. Saritha Maheswaran
Dr. Vijayarajan K.U.

**Review and Edit**

Dr. Muralidharan

**Linguistics**

Dr. Muralidharan

**Scrutiny**

Dr. Sreeja J.
Dr. Vijayarajan K.U.
Chitra Baskar
Dr. Anju J.
Dr. Jothilekshmi M.

**Design Control**

Azeem Babu T.A.

**Cover Design**

Jobin J.

**Co-ordination**

Director, MDDC :
Dr. I.G. Shibi
**Asst. Director, MDDC :**
Dr. Sajeevkumar G.
**Coordinator, Development:**
Dr. Anfal M.
**Coordinator, Distribution:**
Dr. Sanitha K.K.

Scan this QR Code for reading the SLM on a digital device.

**Edition**
May 2025

**Copyright**
© Sreenarayanaguru Open University

ISBN 978-81-985210-0-2

All rights reserved. No part of this work may be reproduced in any form, by mimeograph or any other means, without permission in writing from Sreenarayanaguru Open University. Printed and published on behalf of Sreenarayanaguru Open University by Registrar, SGOU, Kollam.
www.sgou.ac.in

Visit and Subscribe our Social Media Platforms

# MESSAGE FROM VICE CHANCELLOR

Dear learner,

I extend my heartfelt greetings and profound enthusiasm as I warmly welcome you to Sreenarayanaguru Open University. Established in September 2020 as a state-led endeavour to promote higher education through open and distance learning modes, our institution was shaped by the guiding principle that access and quality are the cornerstones of equity. We have firmly resolved to uphold the highest standards of education, setting the benchmark and charting the course.

The courses offered by the Sreenarayanaguru Open University aim to strike a quality balance, ensuring students are equipped for both personal growth and professional excellence. The University embraces the widely acclaimed "blended format," a practical framework that harmoniously integrates Self-Learning Materials, Classroom Counseling, and Virtual modes, fostering a dynamic and enriching experience for both learners and instructors.

The University aims to offer you an engaging and thought-provoking educational journey. The postgraduate programme in Sanskrit offers a special mix of language and literature studies. While the programme covers various aspects of Sanskrit literature and provides the necessary credits, its main goal is to help learners better understand how different types of literature connect with society. We have also made sure to introduce learners to the newest developments in Sanskrit literature. This programme operates on this premise, and the Self Learning Material is designed to reflect this balanced approach.

Rest assured, the university's student support services will be at your disposal throughout your academic journey, readily available to address any concerns or grievances you may encounter. We encourage you to reach out to us freely regarding any matter about your academic programme. It is our sincere wish that you achieve the utmost success.

Warm regards.
Dr. Jagathy Raj V.P. 01-05-2025

# CONTENTS


**BLOCK - 1 धर्मशास्त्रं याज्ञवल्क्यस्मृतिश्च** **1**

Unit - 1 धर्मसूत्रं स्मृतिं च अधिकृत्य सामान्यपठनम् 2

Unit - 2 याज्ञवल्क्यस्मृतेः सामान्यपरिचयः 13

Unit - 3 व्यवहाराध्यायः साधारणव्यवहारमातृकाप्ररणम्। (द्वितीयोध्यायः 1- 8 श्लोकाः) 21

Unit - 4 व्यवहाराध्यायः - असाधारणव्यवहारमातृकाप्रकरणम् (द्वितीयोऽध्यायः 9- 36 श्लोकाः) 38

**BLOCK - 2 याज्ञवल्क्यस्मृतेः सविशेषाध्ययनम्** **74**

Unit - 1 व्यवहाराध्यायः ऋणादानप्रकरणम् (द्वितीयोध्यायः 37- 50 श्लोकाः) 75

Unit - 2 व्यवहाराध्यायः ऋणादानप्रकरणम् (द्वितीयोऽध्यायः 51-63 श्लोकाः) 93

**BLOCK - 3 अर्थशास्त्रे विनयाधिकारिका भागः 1** **116**

Unit - 1 अर्थशास्त्रस्य सामान्यपरिचयः 117

Unit - 2 विनयाधिकारिकायाः सामान्यपरिचयः 124

Unit - 3 विनयाधिकारिकायाः सविशेषाध्ययनम् (अध्यायः 1 - 3) 140

Unit - 4 विनयाधिकारिकायाः सविशेषाध्ययनम् (अध्यायः 4 - 8) 182

**BLOCK -4 अर्थशास्त्रे विनयाधिकारिका भागः -2** **203**

Unit - 1 विनयाधिकारिकायाः सविशेषाध्ययनम् (अध्यायः 9 -11) 204

Unit - 2 विनयाधिकारिकायाः सविशेषाध्ययनम् (अध्यायः 12 - 14) 225

**Model Question Paper (SET – A)** **245**

**Model Question Paper (SET – B)** **247**


SGOU

# धर्मशास्त्रं याज्ञवल्क्यस्मृतिश्च

# BLOCK -1

SGOU

UNIT 1

# धर्मसूत्रं स्मृतिं च अधिकृत्य सामान्यपठनम्

## Learning Outcomes

- स्मृतीनां परिचयं प्राप्नोति।
- स्मृतीनां विषयं ज्ञातुं शक्नोति।
- सूत्राणां संग्रहपाटवं जानाति।
- पूर्विकाणां धर्मबोधं जानाति।
- विविधाः स्मृतीः गृह्णाति।
- धर्मशास्त्रं प्रति सामान्यपरिचयः लभते।

## Background

धर्मस्य लक्षणं वेदेषु धर्मशास्त्रेषु पुराणेषु दर्शनेषु च प्रतिपादितम्। वेदेषु धर्मस्य लक्षणं तु - वेदः सर्वासां विद्यानां मूलभूतः। धर्मस्य मूलं वेद एव। धर्मो विश्वस्य जगतः प्रतिष्ठा। महाभारते धर्मलक्षणं - येन वस्तुना प्राणिनः भरणं पोषणं धारणं वा भवति तद्वस्तु धर्मपदवाच्यः। पुराणेषु भगवता व्यासेन प्रतिपादितं धर्मलक्षणम् - परोपकार एव धर्म इति।

धर्मार्थकाममोक्षाख्येषु चतुर्षु पुरुषार्थेषु धर्मः प्रधानः विद्यते। धर्मप्रतिपादकं शस्त्रं धर्मशस्त्रमुच्यते। भारतीयानां धर्मशास्त्रग्रन्थाः स्मृतिग्रन्थाः इति च विश्रुताः भवन्ति। धर्मसूत्राणां स्मृतीनां सम्मिलितं रूपमेव धर्मशास्त्रम्। अस्मिन्नेकके धर्मसूत्रं स्मृतिं चाधिकृत्य सामान्यज्ञानं प्रप्तुमवसरः सिद्ध्यति।

## Keywords

वेदं -धर्ममूलम् - षडङ्गानि - कल्पशास्त्रम् - कल्पनाशास्त्रम् - चतुर्णां वर्णानामाश्रमाणां धर्मः - गौतमधर्मसूत्रम् -याज्ञवल्क्यः - स्मृतिग्रन्थाः - धर्मशब्दः षड्विधाः।

## Discussion

धर्मस्य मूलं वेद एव।

वेदं धर्ममूलम् इति प्रथा वेदकालादारभ्य एव वर्तते। भारतीयधर्मस्य दर्शनस्य च जीवनं वेद एव। भारतीयसंस्कृतिः तानाधारीकृत्यैव विराजते। सत्यानुसन्धातृभिः महर्षिभिः अनुभूतस्य परमतत्वस्य बोधयितारो भूत्वा वेदाः विराजन्ते। स्मृतिपुराणादीनां मान्यत्वं तदनुगामित्वं प्रसिद्धमेव च। भारतीयविचारधारायाः द्रढीयानयं विश्वासो यद् वेदतत्वज्ञ एव जनो ब्रह्म ज्ञातुमर्हति इति।

**वेदशास्त्रार्थतत्वज्ञो यत्र कुत्राश्रमे वसन्।**

**इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते॥**

अङ्ग्यते ज्ञायते इत्यनेन अङ्गमिति

वेदानां षडङ्गानि सन्ति, तेषां निर्माणं वैदिकयुगस्य उत्तरार्धभागे एवाभवत् इति मन्यते। शिक्षा, कल्पः, व्याकरणं, छन्दः, निरुक्तं, ज्योतिषञ्च इत्येतानि वेदाङ्गानि। षण्णामेतेषाम् अङ्गानामुल्लेखः गोपथब्राह्मण-बौधायनधर्मसूत्र-गौतमधर्मसूत्र-रामायणसमप्राचीन ग्रन्थेषु उपलभ्यते। अङ्गमित्यस्य व्युत्पत्तिः अङ्ग्यते ज्ञायते इत्यनेन अङ्गमिति। अतः तेषां वेदानां ज्ञानाय एतान्यङ्गानि उपकारकमिति सत्यमेव।

वेदानां द्वितीयमङ्गमस्ति कल्पः। वेदविहितानां कर्मणां व्यवस्थापनं क्रमपूर्वकं कल्पशास्त्रे प्रतिपादितम्। कल्पशास्त्रं कल्पनाशास्त्रमिति च प्रथितमेव। कल्पनासूत्राणि चतुर्विधानि – श्रौतसूत्रम्, गृह्यसूत्रं, धर्मसूत्रं, शुल्बसूत्रं च। तत्र धर्मसूत्रे चतुर्णां वर्णानामाश्रमाणां राज्ञामपि च कर्तव्यानि निर्दिष्टानि सन्ति। धर्मसूत्राणि कल्पस्य गौरवमयान्यङ्गानि सन्ति। परं न सांप्रतं प्रतिशाखां धर्मसूत्राणि न लभ्यन्ते। यन्मानव धर्मसूत्रमाधृत्य मनुस्मृतेर्निर्माणं सञ्जातं तदपि नाद्यपर्यन्तमुपलब्धं भवति।

धर्मसूत्रे चतुर्णां वर्णानामाश्रमाणां राज्ञमपि च कर्तव्यानि निर्दिष्टानि सन्ति

धर्मसूत्रेषु चतुर्वर्णकर्तव्यानि कर्माणि, व्यवहाराः, राजधर्मः, आश्रमधर्मः, विवाहः, दायभागः, प्रायश्चित्तं, नित्यनैमित्तिकं कर्म इत्यद्यनेके विषयाः वर्णिताः सन्ति। धर्मसूत्रेषु प्राचीनतमं गौतमधर्मसूत्रम्। गौतमधर्मसूत्रं निर्दिशन्तो याज्ञवल्क्य – कुमारिल - मेधातिथयः प्राप्यन्ते। बौधायनोऽपि धर्मसूत्रस्य प्राचीनतम आचार्यो भवति। वसिष्ठेन कल्पितं धर्मशास्त्रञ्च गुणविपुलत्वेन महनीयं भवति। वसिष्ठस्य जीवितदर्शनम् अत्यन्तम् उत्तममध्यात्मिकं च आसीत्। सः सदाचारमयं जीवनं यापयितुम् उपादिशति।

धर्मसूत्रेषु प्राचीनतमं ग्रन्थं गौतमधर्मसूत्रम्।

भारतीयानां धर्मशास्त्रग्रन्थाः स्मृतिग्रन्थाः इति च विश्रुताः भवन्ति। वेदेषु प्रोक्तानां विषयाणां संग्रहेण कथनं स्मृतौ दृश्यन्ते। श्रुतेरिवार्थं स्मृतिरन्वगच्छदिति महाकविकालिदासेन रघुवंशस्य द्वितीयाध्याये दिलीपवर्णने प्रोक्तम्। वसिष्ठमुनेः गां सेवितुमुद्यतो राजा दिलीपः पत्नी मागधी सुदक्षिणा च आश्रमं प्रापतुः। पुरोहितस्य निर्देशेन नन्दिनीप्रसादाय वनं गच्छति दिलीपः। नृपेण साकं गच्छन्तीं सुदक्षिणामेवमेव कविः तुलयति। अस्यायमर्थः, वेदस्मृतीनां मार्गः एक एव। कालप्रवाहेण वेदमाहात्म्यं ज्ञातुं जनाः अशक्ता अभवन्। अतः तस्यार्थनिरूपणाय स्मृतयः कल्पिताः इति।

भारतीयानां धर्मशास्त्रग्रन्थाः स्मृतिग्रन्थाः इति च विश्रुताः भवन्ति

धर्मशास्त्रस्य प्रतिपाद्यविषयाः आंगिरसस्मृतावेवं उक्ताः

**यत्पूर्वमृषिभिः प्रोक्तान्धर्मशास्त्रमनुत्तमम्।**

**तत्प्रमाणन्तु सर्वेषां लोकधर्मानुवर्णनम्॥**

धर्मशास्त्रत्वेन स्वीकृताः भारतीयाः मनुस्मृति-याज्ञवल्क्यस्मृति-प्रभृतयः ग्रन्थाः धर्मशास्त्रत्वेन गृह्णन्ति, तानि सर्वाण्यपि पुरातनतराणि भवन्ति च। धर्मसूत्राणि संस्कृतवाङ्मये विशिष्टं सम्मानमादरञ्च अधितिष्ठन्ति। महाभारते भगवान् व्यासः गौतमापस्तंबादीनां धर्मसूत्रकाराणां नामानि सादरं संस्मरन् समवाप्यते।

धर्मशास्त्रत्वेन स्वीकृताः भारतीयाः मनुस्मृति-याज्ञवल्क्यस्मृति प्रभृतयः ग्रन्थाः

यद्यपि धर्मशास्त्रप्रतिपादितेषु धर्मेषु केचन धर्मा न जनैः प्रयुज्यन्ते परं जगति धर्मसूत्रेषु स्वकीयां बलवतीमास्थां निदधाति। सदाचारसंबन्धिनो नियमास्तु समये समये एव परिवृत्तिं यान्त्येव। एषां धर्माणां प्रचारः भारतीयेषु गृहेषु विलोक्यमानो भवति। एते धर्माः सूत्रकारैः न स्वयं प्रकल्पिताः अपि तु प्राक्तनेभ्यः स्रोतोभ्यः

संगृह्य यथासमयं व्याख्याताः। यथा चाह बौधायनः – उपदिष्टो धर्मः प्रतिवेदम्। तस्यानुव्याख्यास्यामः। समाजिकाचारान् धर्मान् च व्याख्यास्याम इति। इत्थं धर्मसूत्राणि प्राक्तनानामेव धर्माणां व्याख्यानरूपाणि सन्ति। सर्वे सूत्रकाराः स्मृतिकाराश्च वेदमेव धर्मस्य मूलं मन्यन्ते। किन्तु एते धर्माः प्रत्यक्षरूपेण वेदे न दृश्यन्ते च। धर्मसूत्रकारैः मन्त्रब्राह्मणात्मको वेदः प्रमाणत्वेन स्वीकृतः। तस्मादेव कारणात् बहुधा मन्त्रैः सह ब्राह्मणवाक्यान्यपि श्रुतिवचनत्वेन उद्धरन्ति।

धर्मसूत्राणि प्राक्तनानामेव धर्माणां व्याख्यानरूपाणि सन्ति

विविधाः धर्माः सन्ति। तद्यथा वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, निमित्तधर्मः इत्यादिः आपस्तंभे ब्रूते अथातः साधारणधर्मश्चेति। वर्णाः चत्वारः इत्येदधिकृत्य ऋग्वेदे अभिदधाति –

**ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः।**

**ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत॥**

वर्णाः चत्वारः

अत्र वर्णशब्दो न जातिवाचकत्वेन गृहीतः। वर्णस्योल्लेखो न केवलं श्रुतौ, अन्यत्रापि दृश्यते। काठकसंहितायां वर्ण इति पदं जात्यर्थे च प्रयुक्तम्। शतपथब्राह्मणे ब्रह्मचारिणो धर्माः प्रोक्ताः दृश्यन्ते। तद्वत् आपस्तंबप्रणीतमपि धर्मशास्त्रं विद्यते। यथा धर्मसूत्रेषु वर्णानां कर्मणां वर्णनं विधीयते, तथा श्रुतावेव कर्मणां स्पष्टं विधानं न दृश्यते। अर्थात् एषां कर्म वेदेषु अनेकविधतया वीक्षितं भवति। ब्राह्मणानां याजनाधिकारो मैत्रायणीसंहितायां एवं वर्णितम्। द्वया वै देवा यजमानस्य गृहमागच्छन्ति, सोपमा, अन्येऽसोपमा, अन्ये एते वै आहुतादो यद् ब्राह्मणः। ब्राह्मणेष्वपि ईदृशं वचनं विलोक्ते। एतै वै प्रजाः, हुतादौ यद् ब्राह्मणाः।

(ऐतरेयम्) एते वै देवाः आहुतादो यद् ब्राह्मणाः। (गोपथम्) ब्राह्मणक्षत्रियवैश्यानां अध्ययने यज्ञे समानाधिकारः। द्विजेषु आर्य इति शब्दोऽपि श्रुतिषु प्रयुक्तः। क्षत्रियस्य मुख्यो धर्मः प्रजानां पालनमेव प्रोच्यते धर्मविद्भिः। वसिष्ठेनोक्तम्-शास्त्रेण च प्रजापालनं स्वधर्मस्तेन जीवेद्। गौतमश्चाभिदधाति, राज्ञोऽधिकं रक्षणं सर्वभूतानाम्। क्षत्रियोऽजनि, विश्वस्य भूतस्याधिपतिरजनि। एषवै प्रजापतेः प्रत्यक्षतमां यद् राजन्यः तस्मादेकः इति शतपथब्राह्मणं क्षत्रियम् प्रमुखो धर्मो इति निगदति। पशवो वैशस्य धनत्वेन श्रुतौ मतम्। अस्मिन् विषये पञ्चविंशब्राह्मणे किञ्चिदुक्तं दृश्यते। एतद्वै वैश्यस्य समृद्धं यत् पशवः। पशुशब्दः कृषेरपि उपलक्षणं भवति। ऋग्वेदे शूद्र इति पदं बहुत्र प्रयुक्तं दृश्यते। तस्य जन्म पद्भ्यामिति निगदितम्। ऋग्वेदाद्व्यतिरिच्य अन्येषु वेदेषु ब्राह्मणेषु च शूद्रशब्दस्य प्रयोगोऽसकृत् दृश्यते। पञ्चविंशब्राह्मणे कथितम्, पादप्रक्षालनं शूद्रस्य कर्म विद्यते ,यज्ञे च तस्याधिकारो नास्ति।

श्रुतिषु ऋणत्रयविधानं ब्रह्मचर्यं गार्हस्थ्यञ्च लक्ष्यीकृत्य कृतमिति सूत्रकाराणां मतम्। जायमानो वै ब्राह्मणस्त्रि सृभिर्ऋणवान् जायते, ब्रह्मचर्येण, ऋषिभ्यो, यज्ञदेवेभ्यो प्रजया पितृभ्य इति। वानप्रस्थस्य संन्यासस्य च वर्णनं धर्मसूत्रेषु प्राप्यते। केचन आचार्याः नैष्ठिकं ब्रह्मचर्यं वानप्रस्थं सन्यासञ्च न अनुमन्यन्ते। अत बौधायनो आह ऐकाश्रम्यं त्वाचार्या अप्रजनत्वादितरेषाम्।

प्रह्लादिर्हि वै कपिलो नामासुर आस। स एतान् भेदांश्चकार। देवैस्सह स्पर्धमानास्तान् मनीषी नाद्रियेत। केचन आचार्याः

एतदपि आश्रमद्वयमनुमन्यमानाः प्राप्यन्ते। तैत्तिरियसंहितामिह विषये ये चत्वारः इति वोऽवाप्यते यद् धर्मस् चतुर्विधत्वं करोति। ज्ञानमेव मुक्तेः कारणमिति मत्वा केचन आचार्याः सन्यासं परिपुष्णन्ति। किञ्च ज्ञानप्रशंसात्मकानि श्रुतिवचनानि प्रमाणत्वेन प्रस्तुवन्ति।

धर्मविदः धर्मं चतुर्षु भागेषु विभजन्ते। साधारणधर्मः, विशेषधर्मः, असाधारणधर्मः, आपद्धर्मः इति। साधारणधर्मो दानतपोयज्ञभेदेन त्रिविधः स्मृतः। अर्थदान-ब्रह्मदान-भयदानभेदेन दानमपि त्रिविधम्। तपोऽपि शरीरतपो, मानसतपो, वाक्तपोभेदेन त्रिधास्ति। यज्ञस्य अष्टादश भेदाः सन्ति।

धर्मविदः धर्मं चतुर्षु भागेषु विभजन्ते

विशेषधर्मो अधिकारिविशेषाणां कृते भवति। पुरुषस्य कृते पुरुषधर्मो नार्याः कृते नारीधर्मश्च विद्यते। गार्हस्थस्य कृते प्रवृत्तिधर्मः संन्यासिनां कृते च निवृत्तिधर्मश्च। एवमेव ब्राह्मणक्षत्रियवैश्यादीनां कृते पृथक् पृथक् धर्मो य उक्तः स विशेषधर्म इत्युच्यते।

असाधारणधर्मस्य विलक्षणता अन्यैवास्त्। असाधारण धर्मार्थं विशेषयोगशक्तिरात्मबलञ्च अपेक्ष्यते। न साधारणा मनुष्याः तदधिकारिणो भवितुमर्हन्ति। आपद्धर्मस्यापि चमत्कारोऽन्य एव। स धर्मो भावप्रधानः विपदि निपत्य जीवाः स्वं मुख्यमुद्देश्यं पातुं चेत् पापमापद्धर्मत्वेन मत्वाचरति तदा न स पापभाक्। श्रूयते पुरा बहुवर्षव्यापिनि सति दुर्भिक्षे विश्वामित्रः सारमेयस्य पिशितं स्वीकृत्य बलिवैश्वदेवयज्ञं विधाय भोक्तुम् उपचक्रमे। आत्मरक्षार्थं एष आपद्धर्मो धर्मविद्भिर्विहितः।

धर्मस्य लक्षणं मनुरेवं चकार-

**धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।**

**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्॥**

धर्मशस्त्रेषु धर्मलक्षणम्

धर्मं संरक्ष्य न कोऽपि कदाप्यवसीदति तस्मादेव कारणात् वेदमनूच्य आचार्योऽन्तेवासिनमनुशास्ति- धर्मं चर, धर्मान्न प्रमदितव्यम्। धर्मसूत्रकारा धर्मस्य यद्रूपमिदमनुसन्दधुस्तद् वस्तुतः श्रेयः प्रेयश्च विश्वं प्रति निदधाति । आत्मकल्याणकांक्षिणा स स्वजीवने सततं सेवनीयः।

## Summarised Overview

वेदः सर्वासां विद्यानां मूलभूतः। धर्मस्य मूलं वेद एव। धर्मो विश्वस्य जगतः प्रतिष्ठा। वेदानां षडङ्गानि सन्ति। अङ्गमित्यस्य व्युत्पत्तिः अङ्ग्यते ज्ञायते इत्यनेन अङ्गमिति। वेदानां ज्ञानाय एतान्यङ्गानि उपकारकमिति । वेदानां द्वितीयमङ्गमस्ति कल्पः। वेदपुरुषस्य हस्तरूपेण प्रशस्तं वेदाङ्गं कल्पम्। कल्पशास्त्रं कल्पनाशास्त्रमिति च प्रथितमेव। कल्पनासूत्राणि चतुर्विधानि। धर्मसूत्रं कल्पे संबन्धम्। धर्मसूत्रेषु चतुर्वर्णकर्तव्यानि कर्माणि, व्यवहाराः, राजधर्मः, आश्रमधर्मः, विवाहः, दायभागः, प्रायश्चित्तं, नित्यनैमित्तिकं कर्म इत्येते अनेके विषयाः वर्णिताः सन्ति। धर्मसूत्रेषु प्राचीनतमं गौतमधर्मसूत्रम्। भारतीयानां धर्मशास्त्रग्रन्थाः स्मृतिग्रन्थाः इति च विश्रुताः भवन्ति। वेदेषु प्रोक्तानां विषयाणां संग्रहेण कथनं स्मृतौ दृश्यन्ते। वेदस्मृतीनां मार्गः एक एव। कालप्रवाहेण वेदमाहात्म्यं ज्ञातुं जनाः अशक्ता अभवन्। अतः तस्यार्थनिरूपणाय स्मृतयः कल्पिताः इति। भारतीयाः धर्मशास्त्रत्वेन स्वीकृताः ग्रन्थाः मनुस्मृति-याज्ञवल्क्यस्मृति प्रभृतयः। धर्मसूत्राणि प्राक्तनानामेव धर्माणां व्याख्यानरूपाणि सन्ति। धर्मशब्दः षड्विधाः एव – तद्यथा वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, निमित्तधर्मः आपस्तंबो चेति। ब्रूते अथातः साधारणधर्मश्चेति। वर्णाः चत्वारः। धर्मविदः धर्मं चतुर्षु भागेषु विभजन्ते। साधारणधर्मः, विशेषधर्मः, असाधारणधर्मः, आपद्धर्मः इति। साधारणधर्मो दानतपोयज्ञभेदेन त्रिविधः स्मृतः। विशेषधर्मो अधिकारिविशेषाणां कृते भवति ।

ब्राह्मणक्षत्रियवैश्यादीनां कृते पृथक् पृथक् धर्मो य उक्तः स विशेषधर्म इत्युच्यते। मनुना तु धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः धीर्विद्या सत्यमक्रोधो इति दशगुणात्मकं धर्मलक्षणं स्वीकृतम्।

## Assignments

1. अङ्गमित्यस्य व्युत्पत्तिः का ?
2. वेदानां ज्ञानाय उपकारकं किम् ?
3. कल्पशास्त्रं केन शास्त्रमिति च प्रथितमेव ?
4. धर्मसूत्रेषु प्राचीनतमं धर्मसूत्रं किम् ?
5. क्षत्रियस्य मुख्यो धर्मः कः ?
6. धर्मसूत्रस्य विषयाः के ?
7. धर्मशब्दः कतिविधः ?
8. कल्पसूत्रं कतिविधं वर्तते ? कानि च तानि ?
9. साधारणधर्मः कति विधः ? ते के?
10. विशेषधर्मे किम् उच्यते ?
11. धर्मशास्त्रेषु धर्मलक्षणं किम् ?

## Suggested Readings


1. Hinduism and Law: An Introduction, Timothy Lubin et. al, Cambridge University
2. Studies in Hindu Law and Dharmaśāstra, Ludo rocher, anthem Press, 2014.

# References


1. श्रीमद् योगीश्वरमहर्षियाज्ञवल्क्यप्रणीता, याज्ञवल्क्यस्मृतिः, व्वाहाराधायायः, वायाख्याकारः -डां.कमलनयनशर्मा, राष्ट्रिय-संस्कृतृसंस्थानम्-जयपुरम्, 2021
2. Yanjavalkyasmrti or Yogishwara Yanjavalkya with the Mitakshara commentary or Vijnaneswar, Choukhamba sanskrit series office, Varanasi, 1967
3. Yajnavalkya Smrti - Prescribed portions
4. History of Dharmasasta, P. V. Kane.


Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 2

# याज्ञवल्क्यस्मृतेः सामान्यपरिचयः

## Learning Outcomes

- स्मृतीनां परिचयं प्राप्नोति।
- स्मृतीनां विषयं ज्ञातुं शक्नोति।
- याज्ञवल्क्यस्मृतेः सामान्यपरितयः।
- याज्ञवल्क्यस्मृतेः स्मृतेः अवगमनम्।

## Background

स्मृतिग्रन्थेषु मनुस्मृतेः पश्चाद् द्वितीयं स्थानमावहति याज्ञवल्क्यस्मृतिः। मनुस्मृतिम् अपेक्ष्य याज्ञवल्क्यस्मृतेः व्यावहारिकविषयेषु महत्वमधिकमस्तीति पण्डितानामभिप्रायः। ग्रन्थेऽस्मिन् विषयविभागः विधिवत् सम्यक् कृतः। गणेशादीनां पूजयारभ्यते इति च महती सविशेषता। याज्ञवल्क्यस्मृतिः मनुस्मृतिमपेक्ष्य लघीयान् भवति। ग्रन्थेऽस्मिन् प्रायेण सहस्राणि सूत्राणि सन्ति। प्रो. पी. वी काने महोदयेनोक्तं, याज्ञवल्क्यस्मृतिकारः मनुस्मृतिं दृष्टवानिति। यत् बहुषु विषयेषु समानताः दृश्यन्ते। याज्ञवल्क्यस्मृतेः द्वितीयखण्डे धर्मशस्त्र-अर्थशास्त्रयोः सम्बन्धि विचारः प्राप्यते।

## Keywords

धर्मशास्त्रकाराणां नामानि-कालगणना-मुनीनां प्रश्नैः-मिथिलायां-आचाराध्यायः-चतुर्दश विद्याः -विवाहस्य योग्यता -सपिण्डसंबन्धि नियमाः-ऋणसंबन्धीनि सर्वाणि।

## Discussion

याज्ञवल्क्यः न केवलं पूर्विकाणां मतानुसारी, किन्तु स्वविषयावतरणं च विशदया रीत्या ग्रन्थे कृतवान्। देशकालादिभिन्नत्वेन विषयाः अनेन प्रतिपादिताश्च। संस्कृतभाषायाः विषये याज्ञवल्क्यः पाणिनेः विधिनियमादीन् परिपालयति च।

याज्ञवल्क्यस्मृतौ वेद-वेदाङ्ग–आरण्यक–उपनिषद्– पुराण-इतिहास-योगशास्त्रादीनां च उल्लेखाः बहुत्र दृश्यन्ते। ग्रन्थारंभे एव पूर्विकाणां धर्मशास्त्रकाराणां नामानि प्रतिपादयति आचार्यः।

पूर्विकाणां धर्मशास्त्रकाराणां नामानि

**पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।**

**वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥(3)**

**मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः।**

**यमापस्तंबसंवर्ताः कात्यायनबृहस्पती।(4)**

**पराशरव्यासशङ्खलिखिता दक्षगौतमौ।**

**शातातपो वसिष्ठश्च धर्मशास्त्रप्रयोजकाः।।(5)**

याज्ञवल्क्यस्मृतौ शुक्लयजुर्वेदस्य वाजसनेयिसंहितायाः अनेकाः मन्त्राः दृश्यन्ते।

**याज्ञवल्क्यस्मृतेः कालगणना**

क्रिस्तोः पश्चात् नवमः सर्गः अन्तिम परिधिरिति गण्यन्ते

याज्ञवल्क्यस्मृतेः रचनाकालमधिकृत्य पण्डिताः विवदन्ति। पण्डितानां मतान्यनुसरन् क्रिस्तोः पश्चात् नवमः सर्गः अन्तिम- परिधिरिति गण्यन्ते। अन्येषां मतमनुसृत्य मनुस्मृतेः कालं क्रिस्तोः पूर्वं प्रथमशतको वा क्रिस्तोः पश्चात् प्रथमशतको वेति च कथयन्ति।

**याज्ञवल्क्यस्मृतेः विषयः**

याज्ञवल्क्यस्मृतिः मुनीनां प्रश्नैः आरभ्यते। योगीश्वरः याज्ञवल्क्यः मिथिलायां वर्तन्नास्त। सनकादियोगिनामीश्वरं याज्ञवल्क्यं मनोवाक्काय- कर्मभिः संपूज्य सोमश्रवप्रभृतयः श्रवणधारणयोग्याः मुनयः वर्णाश्रमेतराणां धर्मान् अस्मान् अशेषतः ब्रूहीति अब्रुवन्। याज्ञवल्क्यस्तु देशमास्थाय विषयमास्थाय च विशदया रीत्या सर्वं प्रतिपादयति।

**प्रथमः आचाराध्यायः**

अध्यायेऽस्मिन् चतुर्दश विद्याः एवं धर्मस्य चोपादानमस्ति। संस्कारस्य अर्थात्–जन्मतः प्रभृति विवाहपर्यन्तं संस्कारस्य प्रतिपादनमस्ति। उपनयनस्य कालः, ब्रह्मचारिणः कर्तव्यानि, निषिद्धानि कर्माणि, विवाहस्य योग्यता सपिण्डसंबन्धि नियमाः

गृहस्थस्य पञ्चमहायज्ञाः, अतिथिसत्काराः, मधुपर्कस्य विषश्च प्रतिपादिताः

अत्र प्रतिपादिताः। अष्टविधाः विवाहाः, अन्तर्जातीयविवाहाः, क्षेत्रजस्य पुत्रस्य विषयः, पुनर्विवाहस्य विषयश्च प्रथमाध्याये कल्पिताः। गृहस्थस्य पञ्चमहायज्ञाः, अतिथिसत्काराः, मधुपर्कस्य विषयश्च प्रथमे प्रतिपादिताः। वर्णव्यवस्था, तेषां कर्माणि, गृहस्थस्य जीवनमित्यादीनि तत्र विषयाः। स्नातकस्य कर्तव्यं, अनध्यायः, भक्ष्यवस्तूनां अभक्ष्यवस्तूनां नियमः, दानस्य नियमः, दानपात्रस्य निश्चयः, श्राद्धस्य नियमः, श्राद्धाय आहूतानां ब्राह्मणानां योग्यता एताः विषयाः प्रथमे अध्याये विशदयरीत्या प्रतिपादिताः दृश्यन्ते।

**द्वितीयः व्यवहाराध्यायः**

ऋणसंबन्धीनि सर्वाणि व्यवहाराध्याये प्रकीर्तिताः

ऋणसंबन्धीनि सर्वाणि द्वितीयाध्याये प्रकीर्तिताः दृश्यन्ते। साक्षिणः योग्यता, लेखप्रमाणं, धनविभजनं, पुत्राणां कृते दायविभागः, स्त्रीधनं, स्वामि-भृत्यविवादः, दास्यस्य नियमाश्च प्रतिपादिताः सन्ति। मानहानेः व्यभिचारस्य च दण्डोऽपि विशदया रीत्या प्रकटिताः सन्ति।

**तृतीयः प्रायश्चित्ताध्यायः**

महापातकं, उपपातकं, प्रायश्चित्तमित्यादयः विशदीकृताः सन्ति

अशौचस्य नियमः, मृतस्य संस्कारः, पितृतर्पणं, जन्मविषयिका अशुद्धिः, वानप्रस्थाश्रमः, सन्यासस्य नियमाः, योगिनां जीवनरहस्यम्, आत्मज्ञानस्य प्राधान्यं, आधिव्याधयः, विविधनरकाणां वर्णनं अध्यायेऽस्मिन् सन्ति। महापातकं, उपपातकं, प्रायश्चित्तमित्यादयः विशदीकृताः सन्ति। सन्तापन -महासन्तापन- तप्तकृच्छ्र -पराक चान्द्रायणादीनां व्रतानां वर्णना अपि अध्यायेऽस्मिन् सन्ति।

**याज्ञवल्क्यः**

याज्ञवल्क्यः शुक्लयजुर्वेदस्य शतपथब्राह्मणस्य बृहदारण्यकोपनिषदश्च च द्रष्टा प्रचारकश्च भवति

याज्ञवल्क्यस्मृतेः कर्ता याज्ञवल्क्य ऋषिः भवति। एषः वैदिकानां ऋषीणां परंपरायां जातः। याज्ञवल्क्यः मुख्यतः शुक्लयजुर्वेदस्य शतपथब्राह्मणस्य बृहदारण्यकोपनिषदश्च च द्रष्टा प्रचारकश्च भवति। याज्ञवल्क्यः बहूनां यज्ञानां पुरोहितः आसीत्। शतपथब्राह्मणं विना कोऽपि ग्रन्थः अनेन न विरचितः इति श्रूयते। शांखायनारण्यकस्य मध्ये याज्ञवल्क्यस्य नाम आगच्छति। ग्रन्थेऽस्मिन् याज्ञवल्क्यकाण्डमिति वर्णितः प्रशस्तः कश्चन भागः अस्ति। तेन याज्ञवल्क्यस्य प्रशस्तिः सुदूरं गतः। तत्तु दार्शनिकरूपेण, आत्मसाक्षा- त्काररूपेण उल्लिखितमेव। याज्ञवल्क्यस्य वर्णनया एव ग्रन्थस्यास्य विरचने अन्येषामाचार्याणां शिष्याणां च योगदानानि ज्ञायन्ते। तेन सह याज्ञिकविषयाणां तत्वान्वेषणरूपाविषयाणां च प्रतिपादनमस्ति। शतपथब्राह्मणसंबन्धि बृहदारण्यकोपनिषदि यज्ञक्रियामधिकृत्य याज्ञवल्क्याचार्येण दार्शनिकरूपेण प्रतिपादितमस्ति। शतपथब्राह्मणस्य अस्यामुपनिषदि काण्डरूपेण सर्वे विषयाः वर्णिताः । आचार्यः बृहदारण्यकोपनिषदि मैत्रेयी नामिकायाः आचार्यवरेण्यायाः आत्मानमधिकृत्य तस्याः अमरत्वमधिकृत्य च विशदयति। अस्याः उपनिषदः द्वितीये तृतीये चाध्याययोः प्रायशः सर्वेषां ब्राह्मणानां विषयः, तत्र केनचित् साकं याज्ञवल्क्यः विवदति इति विषयाश्च उपवर्णिताः।

## Summarised Overview

स्मृतिग्रन्थेषु मनुस्मृतेः पश्चाद् द्वितीयं स्थानमावहति याज्ञवल्क्यस्मृतिः। याज्ञवल्क्यस्मृतेः रचनाकालमधिकृत्य पण्डिताः विवदन्ति। पण्डितानां मतान्यनुसरन् क्रिस्तोः पश्चात् नवमः सर्गः अन्तिमपरिधिरिति गण्यन्ते। याज्ञवल्क्यस्मृतिः मुनीनां प्रश्नैः आरभ्यते । याज्ञवल्क्यः देशमास्थाय विषयमास्थाय च विशदया रीत्या सर्वं प्रतिपादयति । याज्ञवल्क्यस्मृतिषु त्रिषु अध्यायेषु विभक्ता वर्तते। आचारः, व्यवहारः, प्रायश्चित्तं च। प्रथमेऽध्याये चतुर्दश विद्याः एवं धर्मस्य चोपादानमस्ति। संस्कारस्य अर्थात्–जन्मतः प्रभृति विवाहपर्यन्तं संस्कारस्य प्रतिपादनमस्ति। द्वितीयेऽध्याये ऋणसंबन्धीनि सर्वाणि प्रकीर्तिताः दृश्यन्ते। याज्ञवल्क्यस्मृतेः कर्ता याज्ञवल्क्य ऋषिः भवति । याज्ञवल्क्यः मुख्यतः शुक्लयजुर्वेदस्य शतपथब्राह्मणस्य बृहदारण्यकोपनिषदश्च च द्रष्टा प्रचारकश्च भवति।

## Assignments

**एकेन वाक्येन वाक्यद्वयेन वा उत्तरयत-**

1. शुक्ल-यजुर्वेदेन सम्बन्धा समृतिः का
2. याज्ञवल्क्यस्मृतेः कालगणना का
3. याज्ञवल्क्यस्मृतौ कियन्ति काण्डानि, कानि च तानि
4. याज्ञवल्क्यस्मृतेः चतुर्दशविद्यानां चर्चा कस्मिन् काण्डे अस्ति
5. ऋणसंबन्धीनि सर्वाणि कार्याणि कस्मिन् काण्डे वर्णिताः।

**टिप्पणीं लिखत-**

1. आचाराध्यायस्य प्राधान्यं विशदयत।
2. याज्ञवल्क्यः।

**निबन्धात्मकौ प्रश्नौ-**

1. याज्ञवल्क्यस्मृतिषु त्रिषु अध्यायेषु विभक्ता वर्तते। विशदयत।
2. स्मृतिग्रन्थेषु मनुस्मृतेः पश्चाद् द्वितीयं स्थानमावहति याज्ञवल्क्यस्मृतिः। विशदयत।

## Suggested Readings

1. Hinduism and Law: An Introduction, Timothy Lubin et. al, Cambridge University
2. Studies in Hindu Law and Dharmaśāstra, Ludo rocher, anthem Press, 2014.

## References

1. श्रीमद् योगीश्वरमहर्षियाज्ञवल्क्यप्रणीता, याज्ञवल्क्यस्मृतिः, व्वाहाराधायायः, वायाख्याकारः -डां.कमलनयनशर्मा, राष्ट्रिय-संस्कृतृसंस्थानम्-जयपुरम्, 2021
2. Yanjavalkyasmrti or Yogishwara Yanjavalkya with the Mitakshara commentary or Vijnaneswar, Choukhamba sanskrit series office, Varanasi, 1967
3. Yajnavalkya Smrti - Prescribed portions
4. History of Dharmasasta, P. V. Kane.

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 3

# व्यवहाराध्यायः साधारणव्यवहारमातृकाप्ररणम्
(द्वितीयोध्यायः1- 8 श्लोकाः)

## Learning Outcomes

- स्मृतीनां परिचयं प्राप्नोति।
- स्मृतीनां विषयं ज्ञातुं शक्नोति।
- याज्ञवल्क्यस्मृतिः सामान्यपरिचयः।
- व्यवहाराध्यायस्य सामान्यपरिचयः।
- साधारणव्यवहार-मातृका-प्रकरणस्य विषयस्य अवगमनम्।

## Background

याज्ञवल्क्यस्मृतिग्रन्थे अध्यायसंख्या त्रीणि भवति। प्रथमः आचाराध्यायः, द्वितीयः व्यवहाराध्यायः, तृतीयः प्रायश्चित्ताध्यायः। ऋणसंबन्धीनि सर्वाणि द्वितीयाध्याये व्यवहाराध्याये प्रकीर्तिताः दृश्यन्ते। साक्षिणः योग्यता, लेखप्रमाणं, धनविभजनं, पुत्राणां कृते दायविभागः, स्त्रीधनं, स्वामि-भृत्यविवादः, दास्यस्य नियमाश्च प्रतिपादिताः सन्ति। मानहानेः व्यभिचारस्य च दण्डोऽपि विशदया रीत्या प्रकटिताः सन्ति।

व्यवहाराध्यायस्य साधारणव्यवहार-मातृका-प्रकरणे व्यवहारलक्षणं, सभासदलक्षणं, सभासदसंख्या, सभासदां दण्डः, ब्राह्मणानां दोषः, प्राड्विवाकः, प्राड्विवाकगुणाः, प्राड्विवाकलक्षणम्, व्यवहारविषयः, व्यवहारस्य अष्टादशभेदाः, आसेधलक्षणम्, आसेधश्चतुर्विधः, भाषाकरणप्रकारः, पक्षाभासाः, अनादेयव्यवहाराः आदेय-व्यवहाराः, उत्तरदानप्रकारः, उत्तरस्वरूपम्, चतुर्विधमुत्तरम्,

उत्तराभासानां लक्षणानि उदाहरणानि च, अनुत्तरत्वे कारणत्वं, व्यवहारस्य चत्वारः पादाश्च इत्यादि-विषयाः समुपलभ्यन्ते॥

## Keywords

क्रोधलोभविवर्जितः, सभासदः, सर्वधर्मवित्, प्राड्विवाकः, स्मृत्यपेतादिकारिणः, अधर्षितः, अर्थिना नामजात्यादिचिह्नितम्, अर्थसाधनम्।

## Discussion

अभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनं परमो धर्मः। तच्च दुष्टनिग्रहमन्तरेण न भवति। दुष्टपरिज्ञानं तु व्यवहारदर्शनमन्तरेण न संभवति। तदभिधानाय व्यवहाराध्यायः प्रारभ्यते।

सर्वधर्मवित् ब्राह्मणः सभ्यैः सह नियोक्तव्यः

**व्यवहारान्नृपः पश्येद्विद्वभिर्ब्राह्मणैः सह।**

**धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः॥1॥**

**अन्वयः** - क्रोधलोभविवर्जितः नृपः विद्वद्भिः ब्राह्मणैः सह धर्मशास्त्रानुसारेण व्यवहारान् पश्येत्।

**व्याख्या** - क्रोधलोभविवर्जितः = अमर्षलिप्सातिशयरहितः, नृपः = भूपतिः, विद्वद्भिः = श्रुताध्ययनसम्पन्नैः, ब्राह्मणैः = विप्रैः, सह

साकम्, धर्मशास्त्रानुसारेण = स्मृत्यादिप्रतिपादितविधिमनुसृत्य, व्यवहारान् = विवादान्, पश्येत् = श्रृणुयात्।

**सारः** - श्रुताध्ययनसम्पन्नैः ब्राह्मणैः सह न क्षत्रियादिभिः सहोपविश्य क्रोधादिरहितो राजा धर्मशास्त्रविधिमनुसृत्य प्रजानां विवादान् श्रुणुयात्, समुचितन्यायमपि प्रदद्यात्।

अन्यविरोधेन आत्मसंबन्धितया कथनं व्यवहारः। यथा अयं क्षेत्रं मदीयमिति कश्चित् कथयति, तद्विरोधेन अन्योऽपि मदीयमिति। तत्रैव व्यवहारस्य आवश्यकता। तस्यानेकविधत्वं दर्शयति ब्राह्मणैः सह इति बहुवचनेन। नृपस्य इत्यनेन प्रजापालनाधिकृतस्य यस्यापि धर्म इत्यर्थः, न केवलं राजवंशजातस्येत्यर्थः।

वादिप्रतिवादिनोः भाषोत्तरक्रियात्मकविवादान् नृपो जनपदपरिपालको विद्वद्भिर्शास्त्रार्थ विद्यार्ब्राह्मणैः लिखितसाक्ष्याद प्रमाणपुरस्सरतया क्रोधलोभादिविचारकदोषमपहाय पश्येत् परीक्षेत। प्राधान्येन क्रोधादिवर्जनं पृथगुपात्तम्। न हि क्रोधादिमान् धर्मं शक्नोति व्यवस्थापयितुम्। अज्ञानप्रमादावपि वर्जनीयतया द्रष्टव्यौ। विद्वद्भिः इत्यनेन वेदव्याकरणधर्मशास्त्रादिविषयेषु अभिज्ञैः ब्राह्मणैरेव कुर्यात्, न क्षत्रियैरिति। तृतीयानिर्देशादेषां प्राधान्यम्। मनुनोक्तं-

अदण्ड्यान्दण्ड्यन् राजा दण्ड्यांश्चैवादण्डयन्।

अयशो महदाप्नोति नरकं चैव गच्छति॥ इति

अदण्ड्यान् दण्डयति, वाचा हस्तेन कर्मणा वा दण्डः करिष्यति चेत् अयशः प्राप्नोति राजा। अतः देशादिसमयधर्मस्यापि धर्मशास्त्रा- विरुद्धस्य धर्मशास्त्रविषयत्वान्न पृथगुपादानम्।

क्रोधलोभविवर्जितः इति वचनमादरार्थम्। क्रोधः अमर्षः, लोभो लिप्सातिशयः। तैः विवर्जि- तो भवेत् राजेत्यर्थः।

**श्रुताध्ययनसम्पन्ना धर्मज्ञाः सत्यवादिनः।**

**राज्ञा सभासदः कार्या रिपौ मित्रे च ये समाः ॥2॥**

**अन्वयः** - राज्ञा, ये, श्रुताध्ययनसंपन्नाः धर्मज्ञाः सत्यवादिनः रिपौ मित्रे च समाः (ते) सभासदः कार्या।

सभासद लक्षणम्

**व्याख्या** - राज्ञा = भूपतिना, ये ये जनाः, श्रुताध्ययनसम्पन्नाः = मीमांसाव्याकरणादिश्रवणेन तथा वेदाध्ययनेन च संयुक्ताः, धर्मज्ञाः = धर्मशास्त्रज्ञाः, सत्यवादिनः= सत्यवदनशीलाः, रिपौ= शत्रौ, मित्रे च = सुहृदि च, समाः = रागद्वेषरहिताः, (ते जनाः), सभासदः = सभ्याः, कार्याः = नियोक्तव्याः।

**सारः** - ये खलु मीमांसादिशास्त्रेषु प्राप्तवैदुष्याः, गुरुपरम्परानुसारेण वेदाध्ययन-सम्पन्नाः, धर्मशास्त्रज्ञानसंयुक्ताः, स्वभावतः सत्यवदन-शीलाः, न तु केनापि कारणविशेषेण सत्यं वदन्ति, ते, शत्रुषु मित्रे चापि रागादिशून्यत्वेन सम्यङ्न्यायप्रदानशीलाः सन्ति, ते भूपतिना सभ्याः कार्याः, न विरुद्धाचरणशीलाः।

श्रुताध्ययनसंपन्नाः- श्रुतेन मीमांसाव्याकरणादिश्रवणेन अध्ययनेन च वेदाध्ययनेन संपन्नाः, धर्मज्ञाः धर्मशास्त्रज्ञाः, सत्यवादिनः सत्यवचनशीलाः, रिपौ मित्रे च ये समाः रागद्वेषविवर्जिताः एवंभूताः विज्ञाः राज्ञः संसदि सीदन्त्युपाविशन्ति। तथा तेषां परिपालनाय दानमानसत्काराणि राजा कुर्यादित्यर्थः। श्रुताध्ययनसंपन्ना इत्युक्तत्वेन ब्राह्मणाः उद्दिश्यते। यथाह कात्यायनः -

स तु सभ्यैः स्थिरैर्युक्तः प्राज्ञैर्मौलैर्द्विजौत्तमैः।

धर्मशास्त्रार्थकुशलैरर्थशास्त्रविशारदैः॥ इति।

मनुना-यस्मिन् देशे निषीदन्ति विप्राः वेदविदस्त्रयः इत्युक्तः, बृहस्पतिस्तु सप्त पञ्च त्रयो वा सभासदो भवन्तीत्याह। ते तु लोकवेदज्ञधर्मज्ञाः भवेयुरिति। श्रुतं वेदवाक्यार्थज्ञानोपयोगि-मीमांसायाः वेदाङ्गानां च कल्पनिरुक्तव्याकणानामाचार्यात् अर्थज्ञानम्। धर्मशास्त्राणि तु -

वेदाः साङ्गाश्च चत्वारो मीमांसा स्मृतयस्तथा।

एतानि धर्मशास्त्राणि पुराणं न्यायदर्शनम्॥

सत्यवदनशीलाः मित्रामित्रयोः रागद्वेषाभावेन समोपदेशकर्तारो राज्ञा सभासदः कार्याः।

**अपश्यता कार्यवश्याद्व्यवहारान्नृपेण तु।**

**सभ्यैः सह नियोक्तव्यो ब्राह्मणः सर्वधर्मवित्॥ 3॥**

**अन्वयः** - कार्यवशात् व्यवहारान् अपश्यता नृपेण सभ्यैः सह सर्वधर्मवित् ब्राह्मणः नियोक्तव्यः।

**व्याख्या** - कार्यवशात् = कार्यान्तरव्यासक्तचित्तत्वात्, व्यवहारान् = विवादान्, अपश्यता = अनवलोकयता, नृपेण = राज्ञा, सभ्यैः = सभासद्भिः, सह = साकम्, सर्वधर्मवित्=शास्त्रोक्तसर्वधर्मज्ञः, ब्राह्मणः = विप्रः, नियोक्तव्यः = नियोजनीयः।

**सारः** - प्रजानां व्यवहारदर्शनं राज्ञ एव प्रधानं कार्यं वर्त्तते, परन्तु कार्यान्तरव्यासक्तचित्तत्वात्प्रजानां व्यवहारदर्शनेऽसमर्थोऽस्ति,

तर्हि सः सर्वधर्मवेत्तारं ब्राह्मणं नियुञ्जीत क्षत्रियादीनां नियुक्तिस्तत्र न कर्त्तव्येति भावः।

व्यवहारविषयः

कार्यान्तराव्याकुलतया व्यवहारानपश्यता नृपेण पूर्वोक्तैः सभ्यैः सह सर्वधर्मवित् - सर्वान् धर्मशास्त्रोक्तान् सामयिकांश्च विचारयितुं ये जानन्ति, तादृशः ब्राह्मणः व्यवहारदर्शने नियोक्तव्यः। व्यवहारदर्शनात् अन्यद्गुरुतरं कार्यं, तदधीनतया व्यवहारानपश्यता राज्ञा सर्वधर्मवेत्ता ब्राह्मणः पूर्वोक्तब्राह्मणैः सह नियोक्तव्यः। स्वयं च प्राड्विवाकसंज्ञकब्राह्मणो राजन्योऽपि नियोक्तव्य एव। कात्यायनेनोक्तं - दान्तं कुलीनं मध्यस्थमनुद्वेगकरं स्थिरम्। परत्र भीरुं धर्मिष्ठमुद्युक्तं क्रोधवर्जितम् तादृशं ब्राह्मणं नृपः येजयेदिति। सर्वेभ्यो गरीयः प्राड्विवाकः सत्यवचनमिति गौतमश्चाह।

*प्राड्विवाकादयः सभ्याः यदि रागादिना स्मृत्यपेतं व्यवहारं विचारयन्ति तदा राज्ञा किं कर्तव्यमाह-*

**रागाल्लोभाद्भयाद्वापि स्मृत्यपेतादिकारिणः।**

**सभ्याः पृथक्पृथक्दण्ड्याः विवादाद्विगुणं दमम्॥ 4॥**

**अन्वयः** - रागाद् लोभाद् भयादपि वा स्मृत्यपेतादिकारिणः सभ्याः पृथक् पृथक् विवादाद् द्विगुणं दमं दण्ड्याः।

**व्याख्या** - रागात् = स्नेहातिशयात्, लोभात् = लिप्सातिशयात्, भयादपि = संत्रासादपि, वा = अथवा, स्मृत्यपेतकारिणः = स्मृतिविरुद्ध- कार्यसम्पादकाः, सभ्याः = सभासंदः, पृथक् पृथक् = एकैकशः, विवादात् = विवादपराजयनिमित्तात्, द्विगुणम् = द्विगुणितम्, दमम् = दण्डम्, (दण्डेन), दण्ड्याः = दण्डनीयाः।

**सारः** - ये खलु सभ्याः रागलोभभयाद्वा स्मृतिविरुद्धमाचरन्ति, न समुचितं निर्णयं कुर्वन्ति, ते तावदेकैकशः विवादे पराजयनिमित्तेन द्विगुणितात् द्रव्यात् दण्ड्याः भवन्तीति भावः।

उक्ताः सभ्याः निरङ्कुशत्वेन रजसाभिभूताः यदि रागादिवशात् स्मृतिविरुद्धं, शास्त्रविरुद्धम् आदि शब्दादाचारपेतं कुर्वन्तः ते प्रत्येकं दण्डनीयाः। अत्र आदिशब्देन सदाचारन्यायापेतस्य च ग्रहणम्। दण्डस्तु विवादविषयीभूतात् धनाद् द्विगुणं भवति। तः अर्थात् विवादपराजयनिमित्ताद् दमात् द्विगुणं दमं दण्ड्याः। न पुनर्विवादा- स्पदीभूताद् द्रव्यादित्यर्थः। न च राजा सर्वस्येष्टे ब्राह्मणवर्ज्यम् इति गौतमवचनात् न ब्राह्मणाः दण्ड्याः इति मन्तव्यम्। स एष बहुश्रुतो भवति, लोकवेदवेदांगविद्वाक्येतिहासपुराणकुशलः कर्मस्वभिरतः षठ्सु वा सामयाचारिकेष्वभिविनीत इति। प्रतिपादितबहुश्रुतविषयं न ब्राह्मणमात्रविषयम्। मनुकात्यायनगौतमादयः धर्मशास्त्रप्रवक्तारः सम्यक्ज्ञानरहितस्य सभ्यस्य दण्डमाहुः।

*अथ व्यवहारविषयनिमित्तमाह-*

**स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः।**

**आवेदयति चेद्राज्ञे व्यवहारपदं हि तत्॥ 5॥**

सभासदां दण्डः

**अन्वयः** - स्मृत्याचारव्यपेतेन मार्गेण परैः अधर्षितः राज्ञे आवेदयति चेद् तत् हि व्यवहारपदम्।

**व्याख्या** - स्मृत्याचारव्यपेतेन = धर्मशास्त्रसमाचारविरुद्धेन, मार्गेण= वर्मना, परैः = अन्यैः, आधर्षितः = अभिभूतः, राज्ञे =

नृपाय, आवेदयति = विज्ञापयति, चेद् यदि, तत् = पूर्वोक्तम्, हि=एव, व्यवहारपदम् = व्यवहारविषयः, भवतीति।

**सारः** - धर्मशास्त्रप्रतिपादितमार्गविरुद्धमार्गेणाभिभूतः कश्चित् राज्ञे प्राड्विवाकाय वा निवेदयति, स एव व्यवहारविषयो भवति। पदशब्दस्यात्र विषयोऽर्थः।

व्यवहारस्य अष्टादशभेदाः

धर्मशास्त्रसमाचारविरुद्धेन मार्गेण परैः अभिभूतः यः विषयः राज्ञे प्राड्विवाकाय वा विज्ञापयति तदावेद्यमानं विषयं व्यवहारास्पदं भवति। अहमनेन विधिना अन्यायेन परिभूतो ऽस्मीति यद् निवेदनं तमधिकृत्य व्यवहारः कर्तव्यः। परैरिति बहुवचनमुपलक्षणार्थम्। एकेन द्वाभ्यां बहुभिश्चाक्षिप्तो लक्ष्यते। आवेदनस्य व्यवहारदर्शने निमित्तत्वेन आवेदनादृते व्यवहारदर्शनं राज्ञा न कार्यम्। स च द्विविधः शङ्काभियोगस्त्वाभियोगश्च। तदन्यायं पुनः अष्टादशधा भिद्यते। उक्तञ्च मनुना-

तेषामाद्यमृणादानं निक्षेपोऽस्वामिविक्रयः।
संभूय च समुत्थानं दत्तस्यानपकर्म च॥
वेतनस्यैव चादानं संविदश्च व्यतिक्रमः।
क्रयविक्रयानुशयो विवादः स्वामिपालयोः॥
सीमाविवादधर्मश्च पारुष्ये दण्डवाचिके।
स्तेयं च साहसं चैव स्त्रीसंग्रहणमेव च॥
स्त्रीपुंधर्मो विभागश्च द्यूतमाह्वय एव च।
पदान्यष्टादशैतानि व्यवहारस्थिताविह॥

क्रियाभेदान्मनुष्याणां शतशाखो निगद्यते इति पण्डितमतम्।

वर्षादिचिह्नितं प्रत्यर्थिनः पुरतो राज्ञा लेखयितव्यम्

एतान्यपि साध्यभेदेन पुनर्बहुत्वं गतानि च। अतः श्रद्धया व्यवहारो दर्शनीयः इत्यर्थः। आवेदयति चेद्राज्ञे इत्यनेनैव राज्ञा पृष्टो विनीतवेष आवेदयेत्। व्यवहारकाले च प्रापितं प्रमाणिकं न ग्रसेत। केन पुरुषेण कस्मिन् कार्ये कदा कस्माद्धेतोः परिभूतोऽसीति सभां गतः सभ्यः आवेदयितारं पृच्छेत्।

*व्यवहारान् पश्यतः प्रथमं यत्कार्यं तथा प्रत्यर्थिनि मुद्रालेख्यपुरुषाणाम् अन्यतमेनानीते किं कुर्यादित्यतः आह* -

**प्रत्यर्थिनोऽग्रतो लेख्यं यद्यावेदितमर्थिना।**

**समामासतदर्धाहर्नामजात्यादिचिह्नितम्॥ 6॥**

**अन्वयः** - अर्थिना यथा आवेदितं(तथा) समामासतदर्धाहर्नाम-जात्यादिचिह्नितम् प्रत्यर्थिनः अग्रतः लेख्यम्।

**व्याख्या** - अर्थिना = वादिना, यथा = येन प्रकारेण, आवेदितम्=आवेदनं कृतं निवेदितमिति वा, (तथा) समामासतदर्धाहर्नामजात्यादिचिह्नितम् = समा= वर्षः, मासः = त्रिंशद्दिनात्मकश्चैत्रादिसंज्ञकः कालविशेषः, तदर्धम् = मासार्ध पक्षः, अहः = दिनम्, नाम = देवदत्तादिसंज्ञा, जात्यादिः = ब्राह्मणादिः, चिह्नितम् = लक्षितम्, प्रत्यर्थिनः = प्रतिवादिनः, अग्रतः = समीपे, लेख्यम् = लेखनीयम्।

**सारः** - सर्वप्रथमावेदनकाले वादिना यथावेदितं तथैव प्रत्यर्थिसमक्षं लेखनीयम्, अन्यथाव्यवहारभङ्गप्रसङ्गात् । पुनर्लेखने च

श्रुतभाषार्थस्य प्रतिवादिन उत्तरं लेख्यमिति

वैशिष्ट्यमिदं वर्त्तते यत्तत्र वर्षमासपक्षदिननामजात्यादीनामपि समावेशो भवेत्।

अर्थ्यत इति अर्थः। सोऽस्यस्तीति अर्थी। तत्प्रतिपक्षः प्रत्यर्थी। तस्य अग्रतः लेखनीयम्। यथा येन प्रकारेण पूर्वमावेदनकाले आवेदितम्, तथा न पुनरन्यथा अन्यथावादित्वेन व्यवहारस्य भङ्ग- प्रसङ्गात्। आवेदनकाले एव आर्तिवचनस्य लिखितत्वात् पुनर्लेखनम् अनर्थकमित्यतः आह समामास इति। संवत्सरमासपक्षतिथिवारादिना अर्थिप्रत्यर्थिनां ब्राह्मणजात्यादिचिह्नितम्।

अर्थिना अग्रवादिना धर्माधिकारे येन येन प्रकारेण कार्यमावेदितं तत्तेनैव प्रकारेण वर्षादिचिह्नितं प्रत्यर्थिनः पुरतो राज्ञा लेखयितव्यम्। तत्र आवेदनप्रकारो यथा- मदीयं सुवर्णमेतावदमुकवत्सरेऽमुक- मासेऽमुकपक्षेऽमुकतिथौ अमुकेन अमुकजातीयेनाधर्मेण गृहीतमिति। अथवा विवादास्पदधनस्य नामजात्यादिचिह्नितम्। आदिशब्देन खण्डत्वमुण्डत्वसंख्या परिमाणादि गृह्यते। अन्यथा संख्यादि रहितद्रव्यविषयविवादस्य अनादेयता स्यात्।

**श्रुतार्थस्योत्तरं लेख्यं पूर्वावेदार्थसन्निधौ।**

**अन्वयः** - पूर्वावेदार्थसन्निधौ श्रुतार्थस्य उत्तरं लेख्यम्।

**व्याख्या** - पूर्वावेदकसन्निधौ = अर्थिनः समीपे, श्रुतार्थस्य = श्रुतभाषार्थस्य, उत्तरम् = पूर्वपक्षप्रतिबन्धकं समाधानम्। लेख्यम्-लेखनीयम्।

**सारः** - पूर्वपक्षोत्थापकस्य वादिनः समीपे एव श्रुतभाषार्थस्य प्रतिवादिन उत्तरं लेख्यमिति भावः।

स्वप्रतिज्ञातार्थ-साधनय प्रमाणं निर्दिशेत्

श्रुतो भाषार्थो येन प्रत्यर्थिनोऽसौ श्रुतार्थः। तस्य उत्तरं पूर्वपक्षादुत्तरत्र भवतीत्युत्तरम्। लेख्यं लेखनीयम्। पूर्वावेदकस्य अर्थात् अर्थिनः सन्निधौ पूर्वोक्तस्य निराकरणं तदधिकृत्य उच्यते। योग्यतया अवतारितस्य अर्थस्य उत्तरं पूर्वावेदकस्य सन्निधौ एव राज्ञा लेखनीयम्। यथाह - पक्षस्य व्यापकं सारम् असन्दिग्धम् अनाकुलम्। अव्याख्यागम्यम् इत्येददुत्तरम्। इति राजा उत्तरं लेखयेत्। भाषावदुत्तरस्यापि दोषः। सारं- न्याय्यम्, असन्दिग्धं सन्देहरहितम्। अनाकुलं पूर्वापराविरुद्धम्। अव्याख्या गम्यम् अप्रसिद्धपदप्रोगेण अन्यदेशभाषाप्रयोगेण वा यद् व्याख्येयार्थं न भवति तद्सदुत्तरम्। सत्यं गृहीतम्, प्रतिदत्तं प्रतिग्रहेण लब्धमिति। अत्र मिथ्योत्तरस्य प्रभूतविषयत्वात् अर्थिनः क्रियामादाय प्रथमं व्वहारः प्रवर्तितव्यः।

*एवमुत्तरपक्षे पत्रे निवेशिते साध्यसिद्धेः साधनायत्तत्वात् साधननिर्देशं कः कुर्यादित्यपेक्षित आह-*

**ततोऽर्थो लेखयेत् सद्यः प्रतिज्ञातार्थसाधनम्॥ 7॥**

**अन्वयः** - ततः अर्थी सद्यः प्रतिज्ञातार्थसाधनं लेखयेत्।

**व्याख्या** - ततः = उत्तरदानानन्तरम्, अर्थी = वादी, सद्यः = शीघ्रम्, प्रतिज्ञातार्थसाधनम् = प्रतिज्ञातार्थसाधनाय प्रमाणम्, लेखयेत् = निर्दिशेत्।

**सारः** - उत्तरदानानन्तरं वादी शीघ्रमेव स्वप्रतिज्ञातार्थसाधनाय प्रमाणं निर्दिशेत्।

ततः उत्तरानन्तरम्, अर्थी साध्यवान् सद्य एव अनन्तरमेव प्रतिज्ञातः- साध्यः स चासावित्यर्थश्चेति प्रतिज्ञातार्थः तस्य साधनं - साध्यतेऽनेन इति साधनम् प्रमाणमित्यर्थः। तद् सद्यो लेखयेत्। वदतो उत्तराभिधाने कालविलंबनमपि अङ्गीकृतमिति गम्यते। अर्थी प्रतिज्ञातार्थसाधनं लेखयेदित्युक्तम्, अतश्च प्राङ्न्यायोत्तरे प्राङ्न्यायस्यैव साध्यत्वात् प्रत्यर्थ्येवार्थी जात इति स एव साधनं लेखयेत्। कारणोत्तरेऽपि कारणस्व साध्यत्वात् कारणवाद्येवार्थीति स एव लेखयेत्। मिथ्योत्तरे तु पूर्ववाद्येवार्थी स एव साधनं निर्दिशेत्। अतश्च संप्रतिपत्युत्तरे साध्याभावेन भाषोत्तरत्वादिनोः द्वयोरपि अर्थित्वाभावत् साधननिर्देश एव नास्तीति तावतैव व्यवहारः परिसमाप्यत इति गम्यते।

*तदनन्तरं किं कुर्यादित्याह-*

**तत्सिद्धौ सिद्धिमाप्नोति विपरीतमतोऽन्यथा।**

**चतुष्पाद्व्यवहारोऽयं विवादेषूपदर्शितः॥ 8॥**

चतुष्पाद् व्यवहारः

**अन्वयः** - तत्सिद्धौ सिद्धिम् आप्नोति, अतः अन्यथा विपरीतम् अयं चतुष्पाद् व्यवहारः विवादेषु उपदर्शितः।

**व्याख्या** - तत्सिद्धौ = साधननिर्वृत्तौ, सिद्धिम् = जयलक्षणाम्, आप्नोति = प्राप्नोति, अतः = अस्मात्, अन्यथा = प्रकारान्तरेण, विपरीतम् = पराजयलक्षणम्, प्राप्नोतीति शेषः। अयम् = पूर्वोक्तः, चतुष्पाद् = चतुरंशः, व्यवहारः = विवादनिर्णयप्रकारः, विवादेषु = ऋणादानादिषु, उपदर्शितः = समुपवर्णितः।

**सारः** - साधनसिद्धौ सिद्धिर्भवति । साधनासिद्धौ च साध्यासिद्धिः सञ्जायते। तस्मात्साधनसिद्धिरावश्यकी। चतुरंशयुक्तोऽयं व्यवहारः ऋणादानादिव्यवहारप्रसङ्गे समुपवर्णितो वर्त्तते।

तस्य साधनस्य प्रमाणस्य वक्ष्यमाणलिखित-साक्ष्यादिलक्षणस्य सिद्धौ निवृत्तौ सिद्धिं साध्यस्य जयलक्षणां प्राप्नोति। अतो अस्माद् प्रकारादन्यथा प्रकारान्तरेण साधनसिद्धौ विपरीतं साध्यस्य असिद्धिं अर्थात् पराजयलक्षणमाप्नोति। अनन्तरं व्यवहाररूपमभिधाय उपसंहरति द्वितीयपादे। व्यवहारान् नृपः पश्येत् इति व्यवहाराध्याये प्रथमपादे यदुक्तम् सोऽयमित्थं प्रकार इति वर्णितः। व्यवहारः चतुष्पात् अर्थात् चतुरंशकल्पनया विवादेषु कल्पित इत्यर्थः।

परस्परं मनुष्याणां स्वार्थविप्रतिपत्तिषु।

वाक्यन्यायाद्व्यवस्थानं व्यवहार उदाहृतः।। इत्युक्तम् खलु।

उत्तराभिधानानन्तरं सभ्यानामर्थिप्रत्यर्थिनोः कस्य क्रिया स्यादिति परामर्शलक्षणस्य प्रत्याकलितस्य योगीश्वरेण व्यवहारपादत्वेन अनभिधानात् व्यवहर्तृसंबन्धाभावाच्च न व्यवहारपादत्वमिति स्थितम्। एतावत् पर्यन्तविषयः साधारणव्यवहारमातृकाप्रकरणमिति कथ्यते।

## Summarised Overview

अन्यविरोधेन आत्मसंबन्धितया कथनं व्यवहारः। नृपस्य इत्यनेन प्रजापालनाधिकृतस्य यस्यापि धर्म इत्यर्थः, न केवलं राजवंशजातस्येत्यर्थः। विद्वद्भिः ब्राह्मणैः सह धर्मशास्त्रानुसारेण नृपः क्रोधलोभविवर्जितः व्यवहारान् पश्येत्। श्रुताध्ययनसंपन्नाः सत्यवादिनः धर्मज्ञाः रिपौ मित्रे च ये समाः ते राज्ञा सभासदः कार्या। कार्यवशात् व्यवहारान् अपश्यता नृपेण तु सर्वधर्मवित् ब्राह्मणः सभ्यैः सह नियोक्तव्यः। प्राड्विवाकसंज्ञकब्राह्मणो राजन्योऽपि नियोक्तव्य एव। प्राड्विवाकगुणाः - कात्यायनेनोक्तं - दान्तं कुलीनं मध्यस्थमनुद्वेगकरं स्थविरम्। रागाद् लोभाद् भयाद् वा स्मृत्यपेतादिकारिणः सभ्याः विवादाद् द्विगुणं दमं पृथक् पृथक् दण्ड्याः। धर्मशास्त्रसमाचारविरुद्धेन मार्गेण परैः अभिभूतः यः विषयः राज्ञे प्राड्विवाकाय वा विज्ञापयति तदावेद्यमानं विषयं व्यवहारास्पदं भवति। आवेदनस्य व्यवहारदर्शने निमित्तत्वेन आवेदनादृते व्यवहारदर्शनं राज्ञा न कार्यम्। स च द्विविधः शङ्काभियोगस्त्वाभियोगश्च। तदन्यायं पुनः अष्टादशधा भिद्यते। अर्थिना प्रत्यर्थिनः अग्रतो यद् आवेदितं, तद् लेख्यम्। तदर्धार्हः नामजात्यादिचिह्नितम् समामास। अर्थिना अग्रवादिना धर्माधिकारे येन येन प्रकारेण कार्यमावेदितं तत्तेनैव प्रकारेण वर्षादिचिह्नितं प्रत्यर्थिनः पुरतो राज्ञा लेखयितव्यम्। श्रुतार्थस्य पूर्वावेदार्थसन्निधौ उत्तरं लेख्यम्। ततः अर्थी प्रतिज्ञातार्थसाधनं सद्य लेखयेत्। तत्सिद्धौ सिद्धिमाप्नोति, अतो अन्यथा विपरीतम् इति प्रथमपादस्यान्वयः। विवादेषु उपदर्शितं चतुष्पाद् व्यवहारः अयम्।

## Assignments

**एकेन वाक्येन वाक्यद्वयेन वा उत्तरयत-**

1. याज्ञवल्क्य स्मृति ग्रन्थे अध्यायसंख्या कति?
2. व्यवहारलक्षणं किम्?
3. अन्यविरोधेन आत्मसंबन्धितया कथनं किमुच्यते?
4. “नृपः” इत्यनेन शब्देन कः अभिप्रेतः ?

5. कार्यवशात् व्यवहारान् अपश्यता नृपेण सभ्यैः सह कः नियोक्तव्यः
6. प्राड्विवाकलक्षणं किम्
7. कथं सभासदः नियुक्तव्याः?
8. व्यवहारान् पश्यतः प्रथमं यत्कार्यं तथा प्रत्यर्थिनि मुद्रालेख्यपुरुषाणाम् अन्यतमेनानीते किं कुर्यात्
9. "रिपौ मित्रे च ये समाः" क एवं भवेत्?
10. "सभ्याः पृथक् पृथक् दण्ड्या विवादाद्द्विगुणं दमम्" कस्मिन् विषये इदं वाक्यं भवति?

**टिप्पणिं लिखत-**

1. सभासदः कीदृशी ?
2. ब्राह्मणानां दोषः कः ?
3. प्राड्विवाकादयः सभ्याः यदि रागादिना स्मृत्यपेतं व्यवहारं विचारयन्ति तदा राज्ञा किं कर्तव्यम्
4. प्राड्विवाकब्राह्मणस्य नियोजनं कथं कर्तव्यम्? तस्य गुणाः के?
5. व्यवहारस्य अष्टादशभेदाः के, विशदयत।
6. साधारणव्यवहारः कः?
7. चतुष्पाद् व्यवहार - समर्थयत।
8. विवादेषु चतुष्पाद् व्यवहारः कः? सः कथं प्रदर्शितः अस्ति?
9. लेख्यविधानं कथं क्रियते व्यवहारे? अर्थी, प्रत्यर्थी च कथं लेख्यं ददतः?

**निबन्धात्मकः प्रश्नः-**

1. राज्ञः धर्मशास्त्रसम्मतं व्यवहारदर्शनं केन सह सम्पद्यते? तस्य प्रयोजनं स्पष्टं कुरुत।
2. "धर्मशास्त्रविहितं राजव्यवहारः" विषयकं विस्तीर्णं वर्णनं कुरुत।
3. याज्ञवल्क्यस्मृतेः व्यवहाराध्यायम् अनुसृत्य साधारणव्यवहारमातृकाप्रकरणस्य विषयान् विशदयत।

## Suggested Readings


1. Hinduism and Law: An Introduction, Timothy Lubin et. al, Cambridge University
2. Studies in Hindu Law and Dharmaśāstra, Ludo rocher, anthem Press, 2014.


## References


1. श्रीमद् योगीश्वरमहर्षियाज्ञवल्क्यप्रणीता, याज्ञवल्क्यस्मृतिः, व्वाहाराधायायः, वायारव्याकारः -डां.कमलनयनशर्मा, राष्ट्रिय-संस्कृतृसंस्थानम्-जयपुरम्, 2021
2. Yanjavalkyasmrti or Yogishwara Yanjavalkya with the Mitakshara commentary or Vijnaneswar, Choukhamba sanskrit series office, Varanasi, 1967
3. Yajnavalkya Smrti - Prescribed portions
4. History of Dharmasasta, P. V. Kane.


### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 4

# व्यवहाराध्यायः- असाधारणव्यवहारमातृकाप्रकरणम्
## (द्वितीयोऽध्यायः 9- 36 श्लोकाः)

## Learning Outcomes

- याज्ञवल्क्यसमृतेः सामान्यपरिचयः।
- व्यवहाराध्यायस्य सामान्यपरिचयः।
- असाधारणव्यवहार-मातृका-प्रकरणस्य विषयस्य अवगमनम्।

## Background

याज्ञवल्क्यस्मृतेः द्वितीयाध्यायस्य व्यवहाराध्यायस्य आसाधारणव्यवहार-मातृका-प्रकरणस्य 9-39 श्लोकाः अस्मिन् भागे पठामः। अस्माभिः ज्ञातमेव भवति यत् प्रजापरिपालनमेव राज्ञः परमो धर्मः। दुष्टनिग्रहं शिष्टपरिपालनं च राज्ञा अवश्यं ज्ञेयम्। तदर्थं व्यवहारदर्शने राजा कुशकः भवेत्। व्वहाराध्यायम् नामानां द्वितीयमध्यायं याज्ञवल्क्याचार्येण आरब्दम्। अस्मिन् खण्डे भागचतुष्टयं वर्तते। प्रथमे भागे धर्मसूत्रं स्मृतिं चाधिकृत्य विशदीकृतम्। याज्ञवल्क्यस्मृतेः प्राधान्यं द्वितीये एकके(भागे) सूचितम्। तृतीये भागे साधारणव्यवहारानधिकृत्य वर्तमानान् नियमान् संसूचितवान्। चतुर्थेऽस्मिन्नेकके आसाधारणव्यवहारनियमाः महर्षिणा क्रोडीकृताः। तेषु व्यवहारविषय -प्रतिवादिसपक्षलेखादिकर्तव्यता-व्यवहारनिर्णयप्रकारः-चौरहृतस्य द्रव्यस्य राज्ञः संरक्षणादिकादिकं च सूचितम्। एतत्पठनाय सोत्साहं प्रविश्यामः।

## Keywords

कलहे साहसेषु च - प्रतिभूः - मिथ्याभियोगी- कालोऽन्यत्रेच्छया - सृक्किणी -परिलेढि - विवादः - सपणः - छलं - नैकम् - 'निह्नते लिखितं नैकम्' - दिव्यानि-प्रमाणम् - आधौ प्रतिग्रहौ - परेण - आधिसीमोपनिक्षेपजडबालधनैः - पूर्वक्रमागतात् - भुक्तिः गरीयसी - रिक्थी-पूगाः श्रेणयोऽथ कुलानि च - जानपदाय ।

## Discussion

अनन्तरं तु असाधारणव्यवहारमातृकाप्रकरणम् आरभ्यते ।

*एवं सर्वव्यवहारोपयोगिनीं व्यवहारमातृकामभिधाय अधुना क्वचित् व्यवहारविशेषे कञ्चित् विशेषं दर्शयितुमाह ।*

**अभियोगमनिस्तीर्य नैनं प्रत्यभियोजयेत् ।**

**अभियुक्तं च नान्येन नोक्तं विप्रकृतिं नयेत् ॥ 9॥**

**अन्वयः** - अभियोगम् अनिस्तीर्य एनं न प्रत्यभियोजयेत्, अन्येन अभियुक्तं न उक्तं विप्रकृतिं न नयेत् ।

**व्याख्या** - अभियोगम् = अपराधम्, अनिस्तीर्य = अपरिहृत्य, एनम् = अभियोक्तारम्, न = नहीं, प्रत्यभियोजयेत् = अपराधेन न संयोजयेत् । अन्येन = अपरेण केनचिद्वादिना, अभियुक्तम् =

अभियोग-विशिष्टम्, न= नहि (अन्यः कश्चिद्वादी अभियोजयेत्)। उक्तम्=आवेदनसमये प्रतिपादितम्, विप्रकृतिम् = विरुद्धभावम्, न= नहि, नयेत् = प्रापयेत्।

**सारः** - स्वकीयमपराधं परिहृत्यैवाभियोक्तारं प्रत्यभियोजयेत्, नान्यथेति भावः। अन्येन वादिनाभियुक्तं जनं नान्येन वादिनाभियोजयेत्, यावत् पूर्वाभियोगस्य परिहारो न स्यात्। एवमेवावेदनसमये स्वकीयावेदने यदुक्तम् भाषासमयेऽपि तदेव वक्तव्यम्, न तत्र विरुद्धभावमुत्पादयेद्वस्त्वन्तरादि संयोजनेनेति भावः।

उक्तमावेदनसमये यदुक्तं तद्विप्रकृतिं विरुद्धभावं न नयेत्

अभियुज्यते इति अभियोगः। अपराध इत्यर्थः। तम् अभियोगं अनिस्तीर्य अर्थात् तमपरिहृत्य एनमभियोक्तारं नाभियोजयेत्। उक्तमावेदनसमये यदुक्तं तद्विप्रकृतिं विरुद्धभावं न नयेत्, प्रापयेदिति। एतदुक्तं भवति यद्वस्तु येन रूपेणावेदनसमये निवेदितं, तद्वस्तु तदैव भाषाकालेऽपि लेखनीयम्। नान्यथेति।

यथा अनेन रूपकशतं वृद्ध्या गृहीतम् इत्यावेदनसमये प्रतिपाद्य प्रत्यर्थिसन्निधौ भाषासमये वस्त्रशतं वृद्ध्या गृहीतम् इति न वक्तव्यम्। तथा सति पादान्तरागमने अपि वस्त्वन्तरगमनाद् हीनवादी दण्ड्यो भवति।

*अनन्तरम् "अभियोगमनिस्तीर्य नैनं प्रत्यभियोजयेत्"-इत्यस्य अपवादमाह-*

**कुर्यात्प्रत्यभियोगं च कलहे साहसेषु च।**

अर्थप्रत्यर्थिनोर्विधिमुक्त्वा ससभ्यस्य सभापतेः कर्तव्यमाह-

**उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्यनिर्णये ॥ 10॥**

अर्थिप्रत्यर्थिनोर्निर्णय -कार्ये ससभ्येन सभापतिना प्रतिभूः ग्राह्यः

**अन्वयः** - कलहे साहसेषु च प्रत्यभियोगं कुर्यात्। उभयोः कार्यनिर्णये समर्थः प्रतिभूः ग्राह्यः।

**व्याख्या** - कलहे = वाग्दण्डपारुष्यात्मके, साहसेषु च = विषशस्त्रादिनिमित्तकप्राणवियोगानुकूलव्यापारसम्पादने च, प्रत्यभियोगम् = स्वाभियोगमनिस्तीर्याप्यभियोक्तारम्, कुर्यात् = प्रत्यभियोजयेत् । उभयोः = अर्थिप्रत्यर्थिनोः, कार्यनिर्णये = निर्णयस्य कार्ये, समर्थः = दण्डादिदाने सामर्थ्यवान्, प्रतिभूः = प्रतिनिधिभूतः । ग्राह्यः = ग्रहीतव्यः।

**सारः** - वाक्पारुष्यदण्डपारुष्यात्मके विवादे तथा विषशस्त्रादिद्वारा प्राणवियोगानुकूलव्यापारे च स्वाभियोगमनिस्ती- र्याप्यभियोक्तारं प्रत्यभियोजयेत्। वादिप्रतिवादिनोर्मध्ये निर्णय- कार्यस्य सम्पादनार्थं दण्डादिदाने कश्चित्समर्थः प्रतिभूः (प्रतिनिधिः) ग्रहीतव्यः।

कलहे वाग्दण्डपारुष्यात्मके साहसेषु विषशस्त्रादि निमित्तप्राण व्यापादनादिषु प्रत्यभियोगसंभवे स्वाभियोग-निस्तीर्याप्यभियोक्तारं प्रत्यभियोजयेत्। अनेनाहं ताडितः शप्तो वा इत्यदिव्यानिभियोगे पूर्वमहमनेन ताडितः शप्तो वा इति प्रत्यभियोगे दण्डाल्पत्वम्।

उभयोः - अर्थिप्रत्यर्थिनोः सर्वेषु विवादेषु निर्णयस्य कार्यमेव उच्यते। निर्णयस्य च यत्कार्यं साधितधनदानं तस्मिन् समर्थः प्रतिभूः कार्यः। प्रतिभूः नाम - प्रतिभवति तत्कार्यं तद्द्भवतीति

प्रतिभूः। ससभ्येन सभापतिना। तस्य असंभवे अर्थप्रत्यर्थिनोः रक्षणे पुरुषा नियोक्तव्याः।

*अनन्तरं अर्थिप्रत्यर्थिनोर्निर्णयकार्ये ससभ्येन सभापतिना प्रतिभूः ग्राह्यः इत्युक्तम्। तद् किमर्थमिति उच्यते -*

**निह्नवे भावितो दद्याद्धनं राज्ञे च तत्समम्।**

**मिथ्याभियोगी द्विगुणमभियोगाद्धनं वहेत्॥ 11॥**

**अन्वयः** - निह्नवे भावितः (अर्थिने)राज्ञे च तत्समं धनं दद्यात्। मिथ्याभियोगी अभियोगाद् द्विगुणं धनं वहेत्।

**व्याख्या** - निह्नवे = वादिना निवेदितस्याभियोगस्य प्रत्यर्थिनापलापे कृते, भावितः = साक्ष्यादिभिरङ्गीकारितः (अर्थिने), राज्ञे च = भूपतये च, तत्समम् = प्रकृतधनसमम -पलापनिमित्तकदण्डम्, धनम् = द्रव्यम्, दद्यात् = प्रयच्छेत्, मिथ्याभियोगी = मिथ्याभियोगवान्, अभियोगात् = अभियुक्तधनात्, द्विगुणम् = द्विगुणितम्, धनम् = द्रव्यम्, वहेत् = दद्यात्।

निह्नवे भावितः राज्ञे तत्समं धनं दद्यात्

**सारः** - वादिना निवेदितस्याभियोगस्य प्रतिवादिनापलापे कृते सति साक्ष्यादिभिः प्रकारितः प्रत्यर्थी अर्थिने भूपतये च मूलधनं तथा अपलापनिमित्तकदण्डं स्वरूपमभियुक्तधनाद्विगुणं धनं दद्यात्। स एवार्थी साक्ष्यादिप्रमाणैः नाभियोगं साधयितुं समर्थो भवति, तर्ह्य-भियुक्तधनाद्विगुणं धनं राज्ञे दण्डस्वरूपं प्रयच्छेत्।

अर्थिना निवेदितस्य अभियोगस्य प्रत्यर्थिना निह्नवे कृते यदा अर्थिना साक्ष्यादिभिर्भावितः अङ्गीकारितः प्रत्यर्थी तदा प्रकृतं धनं अर्थिने राज्ञे च दद्यात्। तत्सममपलापदण्डं कुर्यादित्यर्थः।

अर्थार्थी भावयितुं न शक्यः सः मिथ्याभियोगी जातः। सः द्विगुणं धनं राज्ञे दद्यात्।

*अर्थी लेखयेदिति सप्तमे सूत्रे कथितस्य कालप्रतीक्षणं दर्शितं तत्रा-पवदन्नाह -*

**साहसस्तेयपारुष्यगोभिशापात्यये स्त्रियाम्।**

**विवादयेत् सद्य एव कालोऽन्यत्रेच्छया स्मृतः॥ 12॥**

**अन्वयः** - साहस- स्तेय -पारुष्य -गोऽभिशापात्यये स्त्रियां सद्य एव विवादयेत्। अन्यत्र इच्छया कालः स्मृतः।

**व्याख्या** - साहसस्तेयपारुष्यगोभिशापात्यये = साहसम् = विषशस्त्रा-दिनिमित्तकप्राणव्यापनादि, स्तेयम् = चौर्यम्, पारुष्यम् = वाक्दण्डपारुष्यादि, गौः = दोग्ध्री, अभिशापः = पातकाभियोगः, अत्ययः = प्राणधनातिपातस्तस्मिन्, स्त्रियाम् = कुलवनितायाम्, सद्य एव = शीघ्रमेव, विवादयेत्= उत्तरं दापयेत्, अन्यत्र = विवादान्तरेषु, इच्छया = अर्थिप्रत्यर्थि-सभ्यसभापतीनां वाञ्छ्या, कालः = उत्तरदानकालः, स्मृतः = प्रतिपादितः।

न कालप्रतीक्षणं कुर्यात्

**सारः** - साहसचौर्यवाक्दण्डपारुष्यगोपालकादिविवादे तथा प्राणात्यये कुलवधूविवादे च शीघ्रमेवोत्तरं दापयेत्, न कालप्रतीक्षणं कुर्यात्। विवादान्तरेषु चोत्तरदाने कालप्रतीक्षणं विहितं वर्त्तते। तत्रार्थिप्रत्यर्थिसभ्यसभापतीनामिच्छैव प्रमाणभूता भवतीति भावः।

साहसं विषशस्त्रादिनिमित्तं प्राणव्यापादनादि। स्तेयं चौर्यम्, पारुष्यं वाक्पारुष्यं दण्डपारुष्यम्, गोः दोग्ध्र्यः अभिशापः- अपहरणम् अथवा पातको वा। अत्ययः प्राणधनापहरणम्,

स्त्रियाम् कुलस्त्रियां दास्यां च। कुलस्त्रियां चारित्रविवादे, दास्यां स्वत्वविवादे विवादयेत्। उत्तरं सद्य एव दापयेत्। न कालप्रतीक्षणं कुर्यात्। अन्यत्र विवादान्तरेषु कालः उत्तरदानकालः इच्छया - अर्थिप्रत्यर्थिनोः सभ्यसभापतीनां इच्छया योजयेत्।

*अनन्तरं दुष्टस्य लक्षणमाह –*

**देशाद् देशान्तरं याति सृक्किणी परिलेढि च**

**ललाटं स्विद्यते चास्य मुखं वैवर्ण्यमेति च ॥ 13॥**

**परिशुष्यत्स्खलद्वाक्यो विरुद्धं बहु भाषते।**

**वाक्चक्षुः पूजयति नो तथोष्ठौ निर्भुजत्यपि ॥ 14॥**

**स्वभावाद्विकृतिं गच्छेत् मनोवाक्कायकर्मभिः।**

**अभियोगेऽथ साक्ष्ये वा दुष्टः स परिकीर्तितः ॥ 15॥**

सः अभियोगे साक्ष्ये वा दुष्ट परिकीर्तितः

**अन्वयः** - यः देशाद् देशान्तरं याति, सृक्किणी च परिलेढि, अस्य ललाटं च स्विद्यते, मुखं च वैवर्ण्यम् एति, परिशुष्यत्स्खलद्वाक्यः विरुद्धं बहु भाषते, वाक्चक्षुः न पूजयति तथा ओष्ठावपि निर्भुजति मनोवाक्कायकर्मभिः स्वभावाद् विकृतिं गच्छेत् सः अभियोगे अथ साक्ष्ये वा दुष्टः परिकीर्तितः।

**व्याख्या** - देशात् = एकस्मात्स्थानात्, देशान्तरम् = स्थानान्तरम्, याति = गच्छति, सृक्किणी = ओष्ठभागौ, परिलेढि जिह्वया स्पर्शयति, मुखञ्च = आस्यञ्च, वैवर्ण्यम् = विरुद्धवर्णताम्, एति = प्राप्नोति, परिशुष्यत्स्खलद्वाक्यः = गद्गदव्यस्तवाक्यः, विरुद्धम् = पूर्वापरव्यस्तम्, बहु=अधिकम्, भाषते वदति, वाक्चक्षु वाणीनेत्रे, न= नहि, पूजयति = प्रतिवचनदानेन, प्रतिवीक्षणेन च प्रसादयति,

तथा वैवर्ण्यादिवत्, ओष्ठावपि = दन्तच्छदावपि, निर्भुजति = वक्रयति, मनोवाक्कायकर्मभिः = हृद्वाणीशरीरक्रियादिभिः, स्वभावात् = प्रकृत्या न भयादिना, विकृतिम् = विकारम्, गच्छेत् = प्राप्नुयात्, सः = साक्षी, अभियोगे = अपराधे, अथ=अथवा, साक्ष्ये = साक्षिकार्ये, दुष्टः = दोषयुक्तः, परिकीर्त्तितः = कथितः।

**सारः** - यो मनुष्यो मनोवाक्कायकर्मभिः भयादिनिमित्तरहितादपि स्वभाववशादेव विकारं गच्छति, सोऽभियोगे साक्ष्ये वा दुष्टः परिकीर्त्तितः। ताश्च विकृतयः सन्ति, यथा-एकस्मिन् स्थाने स्थिरभावेन न तिष्ठति, अपि त्वेकस्मात्स्थानात्स्थानान्तरं गच्छति, जिह्वाग्रेणौष्ठौ परिघट्टयति। ललाटञ्चास्य स्वेदयुक्तं भवति, मुखमपि वैवर्ण्यमाप्नोति, कण्ठं परिशुष्यति, वाक्यञ्च स्खलितं जायते, पूर्वापरविरुद्धमधिकञ्च वदति, वाणी प्रतिवचनदाने न समर्था भवति, न वा चक्षुः प्रतिवीक्षणे। पौनः पुन्येनौष्ठौ वक्रयति। मनोवाक्कायकर्मभिः स्वभावादेव विकृतिं प्राप्नुयादिति। एतल्लक्षणं दुष्टसाक्षिणो वर्त्तते।

मनोवाक्कायकर्मभिः यः स्वभावादेव विकृतिं प्राप्नोति, न भयादिनिमित्ताद् विकृतिं विकारं गच्छति सः अभियोगे साक्ष्ये वा दुष्टः इति परिकीर्तितः। विकृतिमेव विभजते - यः देशाद् देशान्तरं याति, क्वचित् नावतिष्ठते सः दुष्टः। सृक्किणी ओष्ठपर्यन्तौ जिह्वाग्रेण स्पर्शयति सः दुष्टः। यस्य ललाटं स्विद्यते स्वेदबिन्दूङ्कितं भवति, मुखं च विवर्णं, पाण्डुत्वं कृष्णत्वं वा एति, यस कायस्य विकृतिः तादृशः दुष्टः। परिशुष्यद्स्खलद्वाक्यः - यस्य वाक्यं स्खलद् गद्गदयुतं व्यत्यस्तं च भवति सः दुष्टः। विरुद्धं पूर्वापरविरुद्धं बहु यः भाषते सा वचोविकृतिः तादृशः दुष्टः। परोक्तां वाचं प्रतिवचनदानेन न पूजयति चक्षुर्वा प्रतिवीक्षणेन न पूजयति मनसः विकृतिस्तु सा, तादृशः दुष्टः

भवति। यः ओष्ठौ निर्भुजति वक्रयति सः दुष्टः। एतच्च दोषसंभावनामात्रमुच्यते, न दोषनिश्चयाय। स्वाभाविकनैमित्तिक विकारयोः विवेकस्य दुर्ज्ञेयत्वम्। अथ कश्चिन्निपुणमतिर्विवेकं प्रतिपद्येत। तथापि न पराजयनिमित्तं कार्यं भवति।

**सन्दिग्धार्थं स्वतन्त्रो यः साधयेद्यश्च निष्पतेत्।**

**न चाहूतो वदेत्किञ्चिद्धीनो दण्ड्यश्च स स्मृतः॥** 16॥

पुर्वोक्तोऽभियुक्तः हीनः दण्ड्यश्चेति स्मृतः

**अन्वयः** - यः स्वतन्त्रः सन्दिग्धार्थं साधयेत् यश्च निष्पतेत् आहूतश्च न किञ्चित् वदेत् सः हीनः दण्ड्यश्च स्मृतः।

**व्याख्या** - यः = अभियुक्तः, स्वतन्त्रः = साधनान्तरनिरपेक्षः, सन्दिग्धार्थम् = सन्देहास्पदमर्थ पूर्वपक्षम्, साधयेत् = प्रसाधयेत्, यश्च = पूर्वोक्तः, निष्पतेत् = पलायेत, आहूतश्च = आकारितश्च, न= नहि, किञ्चित् = स्वल्पमपि, वदेत् कथयेत्, सः = पूर्वोक्तोऽभियुक्तः, हीनः = स्वपक्षरहितः, दण्ड्यश्च = दण्डयोग्यश्च, स्मृतः = कथितः।

**सारः** - सः सन्दिग्धमर्थ साधननिरपेक्षोऽप्यासेधादिना साधयति, यः साधितमर्थमपि प्रतुतीकरणे पलायेत, यश्चाहूतो राज्ञा सभायां न किञ्चिदपि वदेत्, सः स्वार्थाद्धीयते तथा दण्ड्यश्चापि भवतीति भावः।

अपरोऽपि दण्ड्यः दुष्ट इति विवृणोति - यः कश्चित् सन्दिग्धम् अधर्मेण लब्धं, अधर्मेण अनङ्गीकृतं धनं स्वतन्त्रः सन् साधयेत् सः हीनः दण्ड्यश्च भवति। यश्च स्वयं संप्रतिपन्नं साधनेन वा साधनं याच्यमानो निष्पतेत् पलायेत, यः अभियुक्तः राज्ञा सदसि

आहूतः अपि न किञ्चिद्वदति सोऽपि हीनः दण्ड्यः स्मृतः। अभियोगे साक्ष्ये वा दुष्टः च।

अथ यत्र द्वावपि युगपद् धर्माधिकरणं प्राप्तौ भाषावादिनौ। तद्यथा कश्चित्प्रतिग्रहेण क्षेत्रं लब्ध्वा कञ्चित्कालमुपभुज्य कार्यवशात्स कुटुंबो देशान्तरं गतः। अन्योऽपि तदेव क्षेत्रं प्रतिग्रहेण लब्ध्वा कञ्चित्कालमुपभुज्य देशान्तरं गतः। ततो द्वावपि युगपदागत्य मदीयमिदं क्षेत्रं मदीयमिदं क्षेत्रम् इति परस्परं विवदमानौ धर्माधिकरणं प्राप्तौ तत्र कस्य कियत्याकांक्षित इति वदति।

**साक्षिषूभयतः सत्सु साक्षिणः पूर्ववादिनः।**

**पूर्वपक्षेऽधरीभूते भवन्त्युत्तरवादिनः॥ 17॥**

उभयतः साक्षिषु सत्सु पूर्ववादिनः साक्षिणः

**अन्वयः** - उभयतः साक्षिषु सत्सु पूर्ववादिनः साक्षिणः (पूर्वं प्रष्टव्याः भवन्ति) पूर्वपक्षे अधरीभूते उत्तरवादिनः (साक्षिणः प्रष्टव्याः)भवन्ति।

**व्याख्या** - उभयतः = उभयोर्वादिनोः, साक्षिषु साक्षाद् दृष्टु श्रोतृषु वा, सत्सु = विद्यमानेषु, पूर्ववादिनः = पूर्वं मया गृहीतमिति वादिनः, साक्षिणः = साक्षाद् द्रष्टारः श्रोतारो वा (पूर्व प्रष्टव्याः) पूर्वपक्षे = प्रथममुपस्थापिते वादे, अधरीभूते = असाध्यतया निश्चयाभावे, उत्तरवादिनः = पश्चात्प क्षोपस्थापकस्य (साक्षिणः प्रष्टव्याः) भवन्ति = जायन्ते।

**सारः** - उभयोः पक्षयोः साक्षिणां विद्यमानत्वे प्रथमं पूर्ववादोपस्थापकस्य साक्षिणः प्रष्टव्या भवन्ति । तेन

पूर्वपक्षस्यानिश्चये सति पश्चाद्वादोपस्थापकस्य साक्षिणः प्रष्टव्याः भवन्तीति।

उभयोरपि वादिनोः संभवत्सु साक्षिषु सत्सु, यः पूर्वं निवेदयति तस्य साक्षिणः प्रष्टव्याः। पूर्ववादी तु - पूर्वस्मिन् काले मया प्रतिगृहीतमुपभुक्तं च इति यो वदति असौ। न पुनः. पूर्वं निवेदयति। यदा त्वन्य एवं वदति, सत्यमनेन पूर्वं प्रतिगृहीतम्, उपभुक्तं, च किन्तु राज्ञा इदमेव क्षेत्रमस्मादेव क्रयेण लब्ध्वा मह्यं दत्तमिति, अनेन वा प्रतिग्रहेण लब्ध्वा मह्यं लब्धम् इति, तत्र पूर्वपक्षोऽसाध्यतया अधरीभूतः। तस्मिन् पूर्वपक्षे अधरीभूते उत्तरकालं प्रतिगृहीतमुपभुक्तं चेति वादिनः साक्षिणः प्रष्टव्याः भवन्ति। मिथ्योत्तरे पूर्ववादिनः साक्षिणः भवन्ति।

**सपणश्चेद्विवादः स्यात्तत्र हीनं तु दापयेत्।**

**दण्डं च स्वपणं चैव धनिने धनमेव च॥ 18॥**

**अन्वयः** - चेत् विवादः सपणः स्यात्, तत्र हीनं दण्डं, स्वपणञ्च(राज्ञे) दापयेत् धनिने धनमेव दापयेत्।

पणप्रतिज्ञावादी यदि हीयते, तदा स सपणं दण्डं दाप्यः

**व्याख्या** - चेद्यदि, विवादः = व्यवहारः, सपणः = पणसहितः, स्यात् = भवेत्, तत्र = तस्मिन् सपणे व्यवहारे, हीनम् = पराजितम्, दण्डम् = प्रकृतार्थसमं दमम्, स्वपणञ्च = स्वकृतं पणञ्च, (राज्ञे) दापयेत् = प्रदद्यात्, धनिने = अर्थिने च, धनमेव = विवादास्पदीभूतं द्रव्यमेव, प्रदापयेदित्यर्थः।

**सारः -** विवादः सपणः स्याच्चेत्तदा तस्मिन् विवादे पराजितः पुरुषः राज्ञे प्रकृतार्थसमं दण्डं तथा स्वकृतं पणञ्च दद्यात्। धनिने तु केवलं विवादविषयीभूतमेव धनं दद्यात्।

यदि विवादः अथवा व्यवहारः, सपणः-पणनं पणः, तेन सह वर्तत इति सपणः, स्यात्तदा तत्र तस्मिन् पणे व्यवहारे हीनं पराजितं पूर्वोक्तं दण्डं, स्वकृतं पणं राज्ञे अर्थिने च विवादास्पदीभूतं धनं च राजा दापयेत्। यत्र पुनरेकः कोपावेशवशात् यद्यहमत्र पराजितो भवामि तदा अहं पणशतं दास्यामि इति प्रतिजानीते, तत्रापि व्यवहारः प्रवर्तते। तस्मिंश्च प्रवृत्ते, पणप्रतिज्ञावादी यदि हीयते, तदा स सपणं दण्डं दाप्यः। अन्यस्तु पराजितो दण्डं दाप्यः। न पणम्। यत्र तु एकशतं, अन्यस्तु पञ्चशतं प्रतिजानीते, तत्रापि पराजये स्वकृतमेव पणं दाप्यौ।

**छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः।**

**भूतमप्यनुपन्यस्तं हीयते व्यवहारतः॥ 19॥**

**अन्वयः** - नृपः छलं निरस्य भूतेन व्यवहारान् नयेत् भूतमपि अनुपन्यस्तं व्यवहारतः हीयते।

नृपः छलं निरस्य भूतेन व्यवहारान् नयेत्

**व्याख्या** - नृपः = राजा, छलम् = प्रमादाभिहितम्, निरस्य = परित्यज्य, भूतेन = वस्तुतत्त्वानुसारेण, व्यवहारान् = विवादान्, नयेत्=आन्तं यावत् प्रापयेत्, भूतमपि = वस्तुतत्त्वमपि, अनुपन्यस्तम् = अनभिहितमकथितमिति वा, व्यवहारतः = व्यवहारेण, हीयते = हानिमुपगच्छति।

**सारः** - भूपतिः प्रमादाभिहितं वादं परित्यज्य वस्तुतत्त्वानुसारेण व्यवहारान् अन्तं नयेत्। वस्तुतत्त्वमप्यनुपन्यस्तं व्यवहारेण हीयते।

छलं प्रमादात् अभिहतम्। निरस्य परित्यज्य भूतेन वस्तुतत्वेन अनुसारेण राजा व्यवहारान् नृपः अन्तं नयेत्। यस्मात् भूतमपि, वस्तुतत्वमपि अनुपस्तम् अनभिहितं, हीयते,

हानिमुपगच्छति। व्यवहारतः इत्यस्य व्यवहारेण साक्ष्यादिभिरित्यर्थः। तस्मात् भूतानुसरणं कर्तव्यम्। यथा अर्थिप्रत्यर्थिनौ सत्यमेव वदतः तदा ससभ्येन सभापतिना सामादिभिरुपायैः यतितव्यम्। अथ सर्वथापि भूतानुसरणं न शक्यते कर्तुम्, तथा सति साक्ष्यादिभिर्निर्णयः कार्यः।

*'भूतमप्यनुपन्यस्तं हीयते व्यवहारतः'* (*व्य.19*) इत्यत्रोदाहरणमाह-

**निह्नुते लिखितं नैकमेकदेशे विभावितः।**

**दाप्यः सर्वं नृपेणार्थं न ग्राह्यस्त्वनिवेदितः ॥20॥**

**अन्वयः** - नैकं निह्नुते एकदेशे विभावितः लिखितं सर्वम् अर्थं नृपेण दाप्यः, अनिवेदितस्तु न ग्राह्यः।

**व्याख्या** - नैकम् अनेकं सुवर्णरजतादिकम्, निह्नुते = अपलापे सति, एकदेशे = सुवर्णाद्येकभागे, विभावितः = अङ्गीकारितः, लिखितम् = भाषाकाले निवेदितम्, सर्वम् = सुवर्णरजतादिकम्, अर्थम् = द्रव्यम्, नृपेण राज्ञा, दाप्यः = दापनीयः, अनिवेदितस्तु = भाषाकालेऽलिखितस्तु, न= नहि, ग्राह्यः = ग्रहणयोग्यः, भवतीति शेषः।

भाषाकालेऽलिखितस्तु न ग्राह्यः

**सारः** - वादी सुवर्णाद्यनेकवस्तुविषयकं वादं प्रस्तौति । तत्र प्रतिवादी सर्ववस्तुविषयकमपलापं करोति। वादी च साक्ष्यादिप्रमाणैरेक- वस्तुविषयकमन्त्रीकारितस्तदा राजा भाषाकाले लिखितं सर्वं धनं दापयेत्। भाषाकाले यद्वस्तुविषयकं निवेदनं न कृतम्, तद्वस्तु न विचारयोग्यं भवतीति।

अथ भूतमप्यनुपन्यस्तं हीयते इत्यत्र उदाहरणमाह। नैकम् अनेकम् अर्थात् सुवर्णरजतवस्त्रादि लिखितमर्थिना प्रत्यर्थी यदि

सर्वमेव निह्नुते अपजानीते तदा अर्थिनैकदेशे हिरण्ये साक्ष्यादिभिः प्रत्यर्थी भावितः अङ्गीकारितः सर्वं रजताद्यर्थं पूर्वलिखितं अर्थिने नृपेण दाप्यः। पूर्वं भाषाकाले अनिवेदितः पश्चादर्थिना पूर्वं मया विस्मृतः इति निवेद्यमानः न ग्राह्यो नादर्तव्यो नृपेण। एतच्च न केवलं वाचनिकम्। एकदेशे प्रत्यर्थिनः मिथ्यावादित्वनिश्चयादेक देशान्तरेऽपि मिथ्यावा- दित्व संभवात्।

*ननु 'निह्नते लिखितं नैकम्' (व्य. 20) इतीयं स्मृतिस्तथा 'अनेकार्थ- भियोगेऽपि' इतीयमपि स्मृतिरेव, तत्रानयोः स्मृत्योः परस्परविरोधे सतीतरेतरबाधनादप्रामाण्यं कस्मान्न भवति, विषयव्यवस्था किमित्याश्रीयत इत्यत आह-*

**स्मृत्योर्विरोधे न्यायस्तु बलवान् व्यवहारतः।**

**अन्वयः** - स्मृत्योः विरोधे न्यायः तु बलवान्(तस्य ज्ञानम्) व्यवहारतः भवतीति।

**व्याख्या** - स्मृत्योः = धर्मशास्त्रयोः, विरोधे = विषयभेदे, न्यायः = उत्सर्गा-पवादरूपा युक्तिः, तु = एव, बलवान् = प्रबलः। तादृशस्य न्यायस्य च ज्ञानं, व्यवहारतः = आवापो-द्वापादिरूपाल्लोक-व्यवहारात्, भवतीति शेषः।

**सारः** - एकस्मिन्नेव विषये व्यवस्थाभेदात्स्मृत्योः परस्परं विरोधे न्यायस्य प्राबल्यं भवति। स च न्याय उत्सर्गापवादरूपः। तस्य च ज्ञानं लोकव्यवहाराज्जायते।

*एवं सर्वत्र च प्रसङ्गेऽपवादमाह-*

**अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिः ॥ 21॥**

**अन्वयः** - अर्थशास्त्रात् तु धर्मशास्त्रं बलवत् इति स्थितिः।

**व्याख्या** - अर्थशास्त्रात् = राजनीतिशास्त्रात्, तु = पूर्वपक्षव्यावर्त्तकः, धर्मशास्त्रम् = मन्वादिप्रणीतस्मृतिशास्त्रम्, बलवत् = प्रबलम्, इति = एतादृशी, स्थितिः = मर्यादा।

**सारः** - एकस्मिन्नेव विषये व्यवस्थाभेदात्स्मृत्योः परस्परं विरोधे न्यायस्य प्राबल्यं भवति। स च न्याय उत्सर्गापवादरूपः। तस्य च ज्ञानं लोकव्यवहाराज्जायते।

अर्थिप्रत्यर्थिनो स्मृत्योः परस्परविरोधे सति इतरेतरबाधनादप्रामाण्यं कस्मान्न भवति, विषयव्यवस्था किमित्याश्रीयते इत्यतः उक्तमिदम्।

यत्र स्मृत्योः परस्परतो विरोधः तत्र विरोधपरिहाराय विषयव्यवस्थापनादौ उत्सर्गापवादलक्षणो न्यायः बलवान् -समर्थः भवति। स च न्यायः कुत प्रत्येतव्य इत्याह व्यवहारत इति। व्यवहारतः वृद्धव्यवहारात् अन्वयव्यतिरेकलक्षणादवगम्यते। एवमुक्ते सति कस्य प्राधान्यमित्याह - धर्मशास्त्रानुसारेण इत्यनेन औशनसाद्यर्थशास्त्रस्य निरस्तत्वात् धर्मशास्त्रगतमेव राजनीतिलक्षणमर्थशास्त्रम् इह विवक्षितम्। अर्थशास्त्रस्मृतेः धर्मशास्त्रस्मृतेश्च परस्परविरोधे अर्थशास्त्राद् धर्मशास्तं बलवदिति स्थितिर्मर्यादा। यद्यपि समानकर्तृकतया अर्थशास्त्रधर्मशास्त्रयोः स्वरूपगतो विशेषो नास्ति तथापि प्रमेयस्य धर्मस्य प्राधान्यादर्थस्य च अप्राधान्यात् धर्मशास्तं बलवदित्यभिप्रायः। धर्मस्य च प्राधान्यं शास्त्रादौ दर्शितमेव। तस्मात् धर्मशास्त्रार्थशास्त्रयोर्विरोधे अर्थशास्त्रस्य बाध एव न विषयव्यवस्था।

*अनन्तरं अर्थी किं लेखयेदिति उच्यते –*

**प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितम्।**

**एषामन्यतमाभावे दिव्यान्यतममुच्यते॥ 22॥**

मानुषं प्रमाणं त्रिविधम्

**अन्वयः** - लिखितं भुक्तिः साक्षिणश्च इति प्रमाणं कीर्तितम् एषाम् अन्यतमाभावे दिव्यानि अन्यतमम् उच्यते।

**व्याख्या** - लिखितम्= ताम्रपट्टे कर्गजे वा लिपिबद्धम्, भुक्तिः = भोगः, साक्षिणश्च = साक्षाद् द्रष्टारश्श्रोतारो वा, इति इत्येव, प्रमाणम् = साधनम्, कीर्त्तितम् = कथितम्, एषाम् = प्रमाणानाम्, अन्यतमाभावे कस्यचिदपि प्रवृत्त्यभावे, दिव्यानि = मानुषभि-न्नानि, अन्यतमम् = किमप्येकम्, उच्यते = साध्यसाधनाय कथ्यते।

**सारः** - लिखितं भुक्तिः साक्षी चेति प्रमाणत्रयं प्रतिपादितं वर्त्तते। यत्र साध्ये एतेषां प्रमाणानां प्रवृत्तिर्न भवति, तत्र दिव्यप्रमाणेषु कस्याप्येकस्य प्रमाणस्य प्रवृत्तिर्भवति। तेनैव साध्यसिद्धिर्बोध्या।

प्रमीयते परिच्छेद्यत इति प्रमाणम्। तच्च द्विविधम् मानुषम्, दैविकञ्चेति। तत्र मानुषं प्रमाणं त्रिविधम् - लिखितं भुक्तिः साक्षिणश्च इति । कीर्तितमित्यस्य महर्षिभिरुक्तमित्यर्थः। तत्र लिखितम् द्विविधम् - शासनं, चीरकं चेति। शासनमुक्तलक्षणम्। चीरकं तु वक्ष्यते। भुक्तिरुपभेगः।

*उभयत्र प्रमाणसद्भावे प्रमाणगतबलाबलविवेके चासति पूर्वापरयोः कार्ययोः कस्य बलीयस्त्वमित्यत आह-*

**सर्वेष्वर्थविवादेषु बलवत्युत्तराक्रिया।**

**अन्वयः -** सर्वेषु अर्थविवादेषु उत्तरा क्रिया बलवती।

ऋणादिविषयकेष्वर्थ विवादेषूत्तरा क्रिया प्रबला भवति

**व्याख्या** - सर्वेषु = ऋणादिषु, अर्थविवादेषु = द्रव्यविषयक-विविधवादेषूपस्थितेषु, उत्तरा = पश्चाद्भाविनी, क्रिया = कार्यम्, बलवती = प्रबलम्, भवतीति शेषः।

**सारः** - ऋणादिविषयकेष्वर्थविवादेषूत्तरा क्रिया प्रबला भवति, न पूर्वा।

*अस्यापवादमाह-*

**आधौ प्रतिग्रहौ क्रीते पूर्वा तु बलवत्तरा॥ 23॥**

**अन्वयः** - आधौ, प्रतिग्रहे क्रीते तु पूर्वा बलवत्तरा।

**व्याख्या** - आधौ = निक्षेपे, प्रतिग्रहे = दाने, क्रीते = क्रये, तु=तु शब्दः पूर्वपक्षव्यावर्त्तकः, पूर्वा = पूर्वोपस्थिता क्रिया, बलवत्तरा = प्रबलतरा। भवतीतिशेषः।

**सारः** - ऋणादिषु विवादेषु यद्यपि उत्तरा क्रिया प्रबला भवति, तथापि निक्षेपादिषु सीमा पूर्वाक्रियैव बलवत्तरा भवति, नोत्तरेत्यर्थः।

ऋणादिषु सर्वेषु अर्थविवादेषु उत्तरा क्रिया-क्रियत इति क्रिया। कार्यं बलवती। उत्तरकार्ये साधिते तद्वादी विजयी भवति। पूर्वकार्ये सिद्धेऽपि तद्वादी पराजीयते। तद्यथा कश्चित् ग्रहणेन धारणं साधयति, कश्चित्प्रतिदानेन आधारणम्, तत्र ग्रहणप्रतिपादनयोः प्रमाणसिद्धयोः प्रतिदानं बलवदिति प्रतिदानवादी जयी भवति। तथा पूर्वं द्विकं त्रिकं शतं गृहीत्वा कालान्तरे त्रिकं शतमङ्गीकृतवान् तत्रोभयत्र प्रमाणसद्भावे अपि त्रिकशतग्रहणं बलवत्।

पश्चाद्भाषितत्वात् पूर्वाबाधेनानुत्पत्तेः। अस्य अपवादमाह - आध्यादिषु त्रिषु पूर्वमेव कार्यं बलवत्। तद्यथा एकमेव क्षेत्रमन्यस्याधिं कृत्वा किमपि गृहीत्वा पुनरन्यस्याप्याधाय किमपि गृह्णाति तत्र पूर्वस्यैव तद्भवति। नोत्तरस्य। एवं प्रतिग्रहे क्रये च।

*नन्वहितस्य भुक्तेः कैश्चिद्विशेषणैर्युक्तायाः प्रामाण्यं दर्शयिष्यन् कस्याश्चिद्भुक्तेः कार्यान्तरमाह -*

**पश्यतोऽब्रुवतोभूमेर्हानिर्विंशतिवार्षिकी।**

**परेण भुज्यमानाया धनस्य दशवार्षिकी ॥ 24॥**

**अन्वयः** - परेण भुज्यमानायाः भूमेः पश्यतः अब्रुवतः विंशतिवार्षिकी हानिः धनस्य दशवार्षिकी (हानिरिति)।

**व्याख्या** - परेण = असम्बद्धेन, भुज्यमानायाः = भोगं सम्पाद्यमानायाः, भूमेः = पृथिव्याः, पश्यतः = समवलोकयतः, अब्रुवतः = अप्रतिषेधयतः, विंशतिवार्षिकी = विंशतिसाम्वत्सरी, हानिः = स्वत्वनिवृत्तिः, भवतीति शेषः। धनस्य = हस्त्यश्वादेः, दशवार्षिकी = दशवर्षानन्तरम्, हानिरिति।

भूमेः पश्यतः अब्रुवतः विंशतिवार्षिकी हानिः धनस्य दशवार्षिकी

**सारः** - विंशतिवर्षं यावन्निरन्तरं प्रत्यक्षं प्रतिषेधरहितेन भोगेन धनस्वामिनः स्वत्वं निवर्त्तते। हस्त्यश्वादौ तु दशवर्षभोगानन्तरमेव स्वत्वस्य निवृत्तिः सञ्जायते।

परेणासंबद्धेन भुज्यमानां भुवं धनं वा पश्यतः अब्रुवतः 'मदीयेयं भूः न त्वया भोक्तव्या' इत्यप्रतिषेधयतः तस्याः भूमे त्रिंशतिवार्षिकी अप्रतिरवं विंशतिवर्षोपभोगनिमित्ता हानिर्भवति। धनस्य तु हस्त्यश्वादेर्दशवार्षिकी हानिः। नन्वेतदनुपपन्नम्, नह्यप्रतिषेधात्स्व-

स्वमपगच्छति। अप्रतिषिद्धस्य दानविक्रयादिवत्स्वत्वनिवृत्ति-हेतुत्वस्य लोकशास्त्रयोरप्रसिद्धत्वात्। नापि विंशतिवर्षोपभोगा-त्स्वत्वम्, उपभोगस्य स्वत्व प्रमाणत्वात्, प्रमाणस्य च प्रमेयप्रत्यनुत्पादकत्वात्, रिक्थक्रयादिषु स्वत्वकारकहेतुत्व-पाठाच्च।

*अस्यापवादमाह-*

**आधिसीमोपनिक्षेपजडबालधनैर्विना।**

**तथोपनिधिराजस्त्रीश्रोत्रियाणां धनैरपि।।25।।**

**अन्वयः** - आधिसीमोपनिक्षेपजडबालधनैः, विना (फलहानिर्भवति) तथा, उपनिधिराजस्त्रीश्रोत्रियाणाम्, धनैरपि, (फलहानिर्न भवति)।

**व्याख्या** - आधिसीमोपनिक्षेपजडबालधनैः = आधिः = निक्षेपः, सीमा = मर्यादा, उपनिक्षेपः = स्वरूपसंख्याप्रदर्शनपूर्वकं रक्षणार्थं प्रदत्तं द्रव्यम्, जडः = विवेकशून्यः, बालः = अप्राप्तव्यवहारस्तेषाम्, धनम् द्रव्यम्, विना=परित्यज्य (शेषाणां फलहानिर्भवति) तथा = तेनैव प्रकारेण, उपनिधिः = स्वरूपसंख्याप्रदर्शनरहितं मुद्राङ्कितं रक्षाणार्थं प्रदत्तं दव्यम्, राजा=प्रजापालनतत्परः, स्त्री = वनिता, श्रोत्रियः = स्वाध्याध्यापननिरतस्तेषाम्, धनैरपि = द्रव्यैरपि (फलहानिर्न भवति)।

**सारः** - आध्यादिपरिगणितानां परित्यागपूर्वकं शेषाणां फलहानिर्भवति तथोपनिध्यादीनां द्रव्याणां फलहानिर्न भवति।

आधिश्च सीमा च उपनिक्षेपश्च आधिसीमोपनिक्षेपाः। जडच बालक्ष जडबालौ, तयोर्धने जडबालधने;

आधिसीमोपनिक्षेपाश्च जडबालधने च आधिसीमोपनिक्षेप-जडवालधनानि तैर्विना। उपनिक्षेपो नाम रूपकसंख्या प्रदर्शनेन रक्षणार्थ परस्य हस्ते निहितं द्रव्यम्। यथाह नारदः 'स्वं द्रव्यं यत्र विस्त्रम्भान्निक्षिपत्यविशङ्कितः। निक्षेपो नाम तत्प्रोक्तं व्यवहारपदं बुधैः॥' इति उपनिधानमुपनिधिः। आध्यादिषु पश्यतोऽब्रुवतोऽपि भूमेर्विंशतेरूध्वं धनस्य च दशभ्यो वर्षेभ्य ऊर्ध्वमप्युपचयहानिर्न भवति।

*आध्यादिषु दण्डविशेष प्रतिपादनार्थमाह-*

**आध्यादीनांविहर्तारम्धनिने दापयेद्धनम्।**

**दण्डं च तत्समं राज्ञे शक्त्यपेक्षमथापि वा॥ 26॥**

**अन्वयः** - आध्यादीनां विहर्त्तारं धनिने धनं दापयेत् तत्समं दण्डञ्च राज्ञे, प्रदद्यात्। अथवा शक्त्यपेक्षमपि दण्डं दद्यात्।

आध्यादीनां विहर्त्तारं धनिने धनं दापयेत् तत्समं दण्डञ्च राज्ञे, प्रदद्यात्

**व्याख्या** - आध्यादीनाम् = निक्षिप्तधनानाम्, विहर्त्तारम् = अपहर्त्तारम्, धनिने = द्रव्यस्वामिने, धनम् = आहितं द्रव्यम्, दापयेत् = प्रणिदापयेत्, तत्समम्=आधिसमम्, दण्डञ्च दमनहेतुकं धनम्, राज्ञे नृपाय, दद्यादित्यर्थः। अथ वा = पक्षान्तरोपस्थापनं करोति, शक्त्यपेक्षमपि = शक्त्यनुसारमपि दण्डं प्रदद्यात्।

**सारः** - आध्याद्यपहर्तृभिः धनिनेआहितं धनं दापयेत्, तथा तत्समं धनं दण्डस्वरूपं राज्ञे प्रदद्यात्। अथवा शक्त्यपेक्षं दण्डयेत्।

आध्यादीनां श्रोत्रियद्रव्यपर्यन्तानां चिरकालोपभोगबलेनापहर्तारं विवादास्पदीभूतं धनं स्वामिने दापयेदित्यनुवादः। दण्डं च तत्समं विवादास्पदीभूतद्रव्यसमं राज्ञे दापयेदिति विधिः। यद्यपि गृहक्षेत्रादिषु तत्समो दण्डो न संभवति तथापि - 'मर्यादायाः प्रभेदे

च सीमातिक्रमणे तथा' इत्यादिर्वच्यमाणो दण्डो द्रष्टव्यः । अथ तत्समदण्डेनापहर्तुर्दमनं न भवति बहुधनत्वे। तदा शक्त्यपेक्षितं धनं दापयेत् यस्य पुनः किमपि धनं नास्ति असौ धिग्दण्डादिना दमनीयः।

*स्वत्वाव्यभिचारत्वेन भोगस्य स्वत्वे प्रामाण्यमुक्तम्। भोगमात्रस्य स्वत्वव्यभिचारित्वात्कीदृशो भोगः प्रमाणमित्यत आह-*

**आगमोऽभ्यधिको भोगाद्विना पूर्वक्रमागतात्।**

**अन्वयः -** पूर्वक्रमागतात् विना आगमः भोगात् अभ्यधिकः।

**व्याख्या** - पूर्वक्रमागतात् = वंशपरम्पराप्राप्तात्, विना = अन्तरेण, आगमः = प्राप्तिः, भोगात्= उपयोगात्, अभ्यधिकः = बलीयान्, प्रबल इत्यर्थः।

अविशुद्धागमो भोगः प्रामाण्यं नैव गच्छति

**सारः** - कुलपरम्पराप्राप्ताद्धनाद्विना शेषेषु सर्वेषु धनेषु भोगापेक्षयागमस्य बलीयस्त्वं (प्राबल्यम्) भवतीति भावः।

स्वत्वहेतुः प्रतिग्रहक्रयादिः आगमः। स भोगादप्यधिको बलीयान्; स्वत्वबोधने भोगस्यागमसापेक्षत्वात्। यथाह नारदः 'आगमेन विशुद्धेन भोगो याति प्रमाणताम्। अविशुद्धागमो भोगः प्रामाण्यं नैव गच्छति॥' इति। नच भोगमात्रात्स्वत्वागमः; परकीयस्याप्यपहारादिनोपभोगसंभवात्। अतएव- 'भोगं केवलतो यस्तु कीर्तयेन्नागमं क्वचित्। भोगच्छलापदेशेन विज्ञेयः स तु तस्करः॥' इति स्मर्यते। अतश्च सागमो दीर्घकालो निरन्तरो निराक्रोशः प्रत्यर्थिप्रत्यक्षश्चेति पञ्चविशेषणयुक्तो भोगः प्रमाणमित्युक्तं भवति। तथा च स्मर्यते - 'सागमो दीर्घकालश्चा-

विच्छेदोऽपरचोज्झितः। प्रत्यर्थिसंनिधानश्च परिभोगोऽपि पञ्चधा।' इति।

*आगमसापेक्षो भोगः प्रमाणमित्युक्तम्, आगमस्तर्हि भोगनिरपेक्ष एव प्रमाणमित्यत आह -*

**आगमेऽपि बलं नैव भुक्तिः स्तोकापि यत्र नो॥ 27॥**

**अन्वयः -** यत्र स्तोकापि भुक्तिः नो(तत्र) आगमेऽपि बलं नैव।

**व्याख्या** - यत्र यस्मिन्नागमे, स्तोकापि स्वल्पापि, भुक्तिः = भोगः, नो= नहि, (तत्र) आगमेऽपि = आगमप्रमाणेऽपि, बलम् = सामर्थ्यम् सम्पूर्णम्, नैव = न विद्यते। स्वत्वसाधने इत्यर्थः।

स्वत्वसाधने तस्यागमस्य सामर्थ्यमेव नास्ति

**सारः** - यस्मिन्नागमे स्वल्पापि भुक्तिर्नास्ति, स आगमः स्वत्वसाधने नास्ति सम्पूर्णः, अथवा स्वत्वसाधने तस्यागमस्य सामर्थ्यमेव नास्ति।

यस्मिन्नागमे स्वल्पापि भुक्तिर्भागो नास्ति तस्मिन्नागमे बलं संपूर्ण नैवास्ति। अयमभिसंधिः- स्वस्वत्वनिवृत्तिः परस्वत्वापादनं च दानम्; परस्वस्वापादनं च परो यदि स्वीकरोति तदा संपद्यते, नान्यथा। स्वीकारश्च त्रिविधः - मानसः, वाचिकः, कायिकश्चेति। तत्र मानसो ममेदमिति संकल्परूपः। वाचिकस्तु ममेदमिध्याद्यभिव्याहारोल्लेखी सविकल्पकः प्रत्ययः। कायिकः पुनरुपादानाभिमर्श- नादिरूपोऽनेकविधः। तत्र च नियमः स्मर्यते - 'दद्यात्कृष्णाजिनं पृष्ठे गां पुच्छे करिणं करे। केसरेषु तथैवाश्वं दासीं शिरसि दापयेत्॥' इति।

*'पश्यतोऽब्रुवर्त' इत्यत्र विंशतिवर्षोपभोगादूर्ध्वं भूमेर्धनस्यापि दशवर्षो- पभोगादूर्ध्वं फलानुसरणं न भवतीत्युक्तम्, तत्र*

*फलानुसरणवद्दण्डानु- सरणमपि न भविष्यतीत्याशङ्क्य पुरुषव्यवस्थया च दण्डव्यवस्थां दर्शयितुमाह-*

**आगमस्तु कृतो येन सोऽभियुक्तस्तमुद्धरेत्।**

**न तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसी ॥ 28॥**

**अन्वयः** - येन आगमः कृतः सः अभियुक्तः तम् उद्धरेत् तत्सुतः तत्सुतः वा न (उद्धरेत्) तत्र भुक्तिः गरीयसी।

**व्याख्या -** येन = पुरुषेण, आगमः स्वीकारः, कृतः = सम्पादितः, सः = पूर्वोक्त आगमकर्त्ता, अभियुक्तः = आगमविषये प्रश्ने सति, तम् = आगमम्, उद्धरेत् = साधयेत्, तत्सुतः = आगमकर्तृपुत्रः, तत्सुतः = पौत्रः, वा= अथवा, न= नहि, (उद्धरेत्) तत्र = पुत्रपौत्रयोः, भुक्तिः = भोगः, गरीयसी = श्रेष्ठतरः।

**सारः** - येन पुरुषेण भूम्यादिकमर्जितम्, कुतस्ते धनमिदमागत-मित्यादिके पृष्टे सति स एव पुरुषस्तस्य समाधानं कुर्यात्। तस्य धनस्यागमविषये तत्पुत्रः पौत्रो वा न साधयेत्। तयोस्तु भुक्तिरेव गरीयसी। श्रेष्ठतरं प्रमाणमिति भावः।

धनस्यागमविषये तत्पुत्रः पौत्रो वा न साधयेत्

येन पुरुषेण भूम्यादेरागमः स्वीकारः कृतः स पुरुषः 'कुतस्ते क्षेत्रादिकम्' इत्यभियुक्तस्तमागमं प्रतिग्रहादिकं लिखितादिभि-रुद्धरेत् भावयेत्। अनेन चाद्यस्य पुरुषस्यागममनुद्धरतो दण्ड इत्युक्तं भवति। तत्सुतो द्वितीयोऽभियुक्तो नागममुद्धरेत्, किन्तु अविच्छिन्नाऽप्रति- रवसमक्षभोगम्। अनेन चागममनुद्धरतो द्वितीयस्य न दण्डोऽपि तु विशिष्टं भोगमनुद्धरतो इति प्रतिपादितम्। तत्सुतस्तृतीयो नागमं नापि विशिष्टं भोगमुद्धरेत्, अपि तु क्रमागतं भोगमात्रम्।

*अस्मार्तकालोपभोगस्यागमज्ञाननिरपेक्षस्य प्रामाण्यमुक्तं 'विना पूर्वक्रमागतात्' इत्यत्र, तस्यापवादमाद -*

**योऽभियुक्तः परेतः स्यात्तस्य रिक्थी तमुद्धरेत्।**

**न तत्र कारणं भुक्तिरागमेन विना कृता॥ 29॥**

यः अभियुक्तः परेतः स्यात् तस्य रिक्थी तम् उद्धरेत्

**अन्वयः** - यः अभियुक्तः परेतः स्यात् तस्य रिक्थी तम् उद्धरेत्, आगमेन विना कृता भुक्तिः न तत्र कारणम्।

**व्याख्या** - यः पुरुषः, अभियुक्तः = आगमकर्ता, परेतः = दिवंगतः, स्यात् = भवेत्, तस्य = आगमकर्तुः, रिक्थी = दायहरः, तम्=आगमम्, उद्धरेत् = साधयेत्, आगमेन = आगमप्रमाणेन, विना = रहिता, कृता=सम्पादिता, भुक्तिः = भोगः, न= नहि, तत्र = व्यवहारे, कारणम् = प्रमाणम्। भवतीति शेषः।

**सारः** - कश्चिदागमकर्ता पुरुषः व्यवहारनिर्णयात्प्रागेव मृतस्तदा तस्य यो दायहरः पुत्रादिः, स तमागमं साधयेत् यतो ह्यागमेन विना सम्पादिता भुक्तिः व्यवहारे प्रमाणं न भवतीति।

यदा पुनराहर्त्रादिरभियुक्तोऽकृतव्यवहारनिर्णय एव परेतः स्यात् परलोकं गतो भवेत्तदा तस्य रिक्थी पुत्रादिस्तमागममुद्धरेत्। यस्मात्तत्र तस्मिन्व्यवहारे भुक्तिरागमरहिता साक्ष्यादिभिः साधितापि न प्रमाणम् पूर्वाभियोगेन भोगस्य सापवादत्वात्। नारदेनाप्युक्तम् - 'तथा रूढविवादस्य प्रेतस्य व्यवहारिणः। पुत्रेण सोऽर्थः संशोध्यो न तं भोगो निर्वर्तयेत्॥

*अनिर्णीतव्यवहारे व्यवहर्तरि प्रेते व्यवहारो न निवर्तत इति स्थितम्। निर्णीतेऽपि व्यवहारे, स्थिते च व्यवहर्तरि व्यवहारः*

*क्वचित्प्रवर्तते क्वचिन्न प्रवर्तत इतिव्यवस्थासिद्धये व्यवहारदर्शिनां बलाबलमाह-*

**नृपेणाधिकृताः पूगाः श्रेणयोऽथ कुलानि च।**

**पूर्वं पूर्वं गुरु ज्ञेयं व्यवहारविधो नृणाम्॥ 30॥**

पूगाः श्रेणयः कुलानि च पूर्वं पूर्वं गुरुः

**अन्वयः** - नृणां व्यवहारविधौ नृपेण अधिकृताः पूगाः श्रेणयः कुलानि च पूर्वं पूर्वं गुरु ज्ञेयम्।

**व्याख्या** - नृणाम् = मनुष्याणाम्, व्यवहारविधौ व्यवहारदर्शनकार्ये, नृपेण = राज्ञा, अधिकृताः = नियुक्ताः, पूगाः = विभिन्नजातीय-विभिन्नकार्यकारिणां जनानां समूहाः, श्रेणयः = नानाजातीनामेक-जातीनां वाप्येककर्मकारिणां समूहाः, कुलानि च = ज्ञातिसम्बन्धिबन्धूनां समूहाश्च, पूर्व पूर्वम् = पूर्वपूर्वपठितम्, गुरु बलवत्, ज्ञेयम् = वेदितव्यम्।

**सारः** - प्रजाजनानां व्यवहारदर्शनकार्ये भूपतिना नियुक्ताः पूगाः, श्रेणयः, कुलानि च भवन्ति । तेषु पूर्वस्य पूर्वस्य प्राबल्यं परस्य परस्य च दौर्बल्यं भवति।

नृपेण राज्ञा अधिकृताः व्यवहारदर्शने नियुक्ताः - 'राज्ञा सभासदः कार्याः' इत्यादिनोक्ताः पूगाः समूहाः, भिन्नजातीनां भिन्नवृत्तीनां एकस्थाननिवासिनां, यथा ग्रामनगरादयः, श्रेणयो नानाजातीनामेकजातीनामप्येककममोंपजीविनां संघाताः, यथा हेडाबुकादीनां ताम्बूलिककुविन्दचर्मकारादीनां च, कुलानि ज्ञातिसंबन्धिवन्धूनां समूहाः, एतेषां नृपाधिकृतादीनां चतुर्णा पूर्वं पूर्वं यद्यत्पूर्वं पठितं तत्तद्गुरु बलवज्ज्ञेयं वेदितव्यम्। नृणां व्यवहर्तृणां, व्यवहारविधौ व्यवहारदर्शनकार्ये। एतदुक्तं भवति -

नृपाधिकृतैर्निर्णीते व्यवहारे पराजितस्य यद्यप्यसंतोषः कुदृष्टिबुद्ध्या भवति, तथापि न पूगादिषु पुनर्व्यवहारो भवति। एवं पूगनिर्णीतेऽपि न श्रेण्यादिगमनम्। तथा श्रेणिनिर्णीते कुत्रापि गमनं न भवति । कुलनिर्णीते तु श्रेण्यादिगमनं भवति। श्रेणिनिर्णीते पूगादिगमनम्। पूगनिर्णीतं नृपाधिकृतगमनं भवतीति।

*दुर्बलैव्यवहारदर्शिभिर्दृष्टो व्यवहारः परावर्तते, प्रबलदृष्टस्तु न निवर्तत इत्युक्तम्; इदानीं प्रबलदृष्टोऽपि व्यवहारः कश्चिन्निवर्तत इत्याह-*

**बलोपाधिविनिर्वृत्तान्व्यवहारान्निवर्तयेत्।**

**स्त्रीनक्तमन्तरागारबहिःशत्रुकृतांस्तथा ॥ 31 ॥**

शत्रुकृतान् व्यवहारान् निवर्त्तयेत्

**अन्वयः** - बलोपाधिविनिर्वृत्तान् तथा स्त्रीनक्तमन्तरागारबहिः शत्रुकृतान् व्यवहारान् निवर्त्तयेत्।

**व्याख्या** - बलोपाधिविनिर्वृत्तान् = पराक्रमेण भयेन वा निष्पन्नान्, तथा = तथैव, स्त्रीनक्तमन्तरागारबहिः शत्रुकृतान् = स्त्रीभिः = वनिताभिः, नक्तम्-रात्रौ, अन्तरागारे = गृहाभ्यन्तरे, बहिः = ग्रामाद्बहिः, शत्रुभिः = विपक्षिभिः, कृतान् = सम्पादितान्, व्यवहारान् = निर्णयादिकान्, निवर्त्तयेत् = परिसमापयेत्, परावर्त्तयेत्।

**सारः** - बलात्कारेण, भयादिना, स्त्रीभिः, कृतान्, रात्रौ, गृहाभ्यन्तरे, ग्रामाद्बहिर्वा निर्जने स्थाने, शत्रुभिश्च सम्पादितान् व्यवहारान् निवर्त्तयेदिति भावः।

बलेन बलात्कारेण उपाधिना भयादिना विनिर्वृत्तान्निष्पन्ना-न्व्यवहारान्निर्वर्तयेत्। तथा स्त्रीस्भिः, नक्तं रात्रावस्त्रीभिरपि, अन्तरागारे गृहाभ्यन्तरे, बहिर्यामादिभ्यः, शत्रुभिश्च कृतान् व्यवहारान् 'निवर्तयेत्' इति संबन्धः।

*असिद्धव्यवहारिण आह-*

**मत्तोन्मत्तार्तव्यसनिबालभीतादियोजितः।**

**असंबद्धकृतश्चैव व्यवहारो न सिद्ध्यति॥ 32॥**

**अन्वयः** - मत्तोन्मत्तार्त्तव्यसनिबालभीतादियोजितः असम्बद्धकृत-श्चैव व्यवहारो न सिद्ध्यति।

**व्याख्या** - मत्तोन्मत्तार्त्तव्यसनिबालभीतादियोजितः = मत्तः = मदनीय-द्रव्येण सुरादिना विवेकरहितः, उन्मत्तः = सन्निपातेन ग्रहावेशादिना वा विवेकशून्यः, आर्त्तः = व्याध्यादिना क्लेशयुक्तः, व्यसनी = दुःखी, बालः = अप्राप्तव्यवहारः, भीतः = भययुक्तः, आदि-शब्देन पुरराष्ट्रादिविरुद्धस्तैः योजितः = प्रयोजितः (सम्पादितः), असम्बद्धकृतश्चैव = राजादिभिरनियुक्तस्तैः, कृतः = निष्पादितः, व्यवहारः = विवादनिर्णयादिः, न= नहि, सिद्ध्यति = प्रसिद्ध्यति, प्रामाणिको भवतीत्यर्थः।

**सारः** - मत्तोन्मत्तादिभिः सम्पादितस्तथा राजादिभिरनियुक्त व्यक्तिनिष्पादितो व्यवहारो न सिद्ध्यतीति भावः।

मत्तो मदनीयद्रव्येण, उन्मत्तेन उन्मादेन पञ्चविधेन वातपित्तश्लेष्मसंनिपातग्रहसंभवेनोपसृष्टः, आर्तो व्याध्यादिना, व्यसनमिष्टवियोगाऽनिष्टप्राप्तिजनितं दुःखं, तद्वान्व्यसनी; बालो

व्यवहारायोग्यः, भीतोऽरातिभ्यः, 'आदि' ग्रहणात्पुरराष्ट्रादिविरुद्धः। एतैर्योजितः कृतो व्यवहारो न सिद्ध्यति। यदि गुरुः कोपवेशवशम्महता दण्डेनोत्तमाङ्गे ताडयति, तदा स्मृतिव्यपेतेन मार्गेणाधर्षितः शिष्यो यदि राज्ञे निवेदयति, तदा भवत्येव व्यवहारपदम्॥ यदि पिता विक्रयादिना पितामहोपात्तं भूम्यादि नाशयति तदा पुत्रो यदि धर्माधिकरणं प्रयेषायति तदा पितापुत्रयोरपि भवत्येव व्यवहारः॥ दुर्भिक्षादिव्यतिरेकेण यदि स्त्रीधनं भर्ता व्ययीकृत्य विद्यमानधनोऽपि याच्यमानो न ददाति तदा दम्पत्योरपीष्यत एव व्यवहारः। तस्मादृष्टादृष्ट्योः श्रेयस्करो न भवति गुर्वादिभिर्व्यवहार इति प्रथमं शिष्यादयो निवारणीयाः राज्ञा ससभ्येनेति 'गुरोः शिष्ये' इत्यादि श्लोकस्य तात्पर्यार्थः। अत्यन्तनिर्बन्धे तु शिष्यादीनामप्युक्तरीत्या प्रवर्तनीयो व्यवहारः।

*परावार्थ्यं व्यवहारमुक्त्वा इदानीं परावर्थ्यं द्रव्यमाह-*

**प्रणष्टाधिगतं देयं नृपेण धनिने धनम्।**

**विभावयेन्न चेल्लिङ्गैस्तत्समं दण्डमर्हति ॥33॥**

**अन्वयः** - नृपेण प्रणष्टाधिगतं धनं धनिने देयं लिङ्गैः न विभावयेत् चेत् (तर्हि) तत्समं दण्डम् अर्हति।

राजा तद्धनं धनस्वामिने दापयेत्

**व्याख्या** - नृपेण = राज्ञा, प्रणष्टाधिगतम् = विनष्टानन्तरं प्राप्तम्, धनम् = हिरण्यादिकं द्रव्यम्, धनिने = धनस्वामिने, देयम् = दाप्यम्, लिङ्गैः = हेतुभिः, न= नहि, विभावयेत् = संसाधयेत्, चेद्यदि, (तर्हि) तत्समम्= तद्धनतुल्यम्, दण्डम् = दमस्वरूपं धनम्, अर्हति = दातुं योग्यो भवतीत्यर्थः।

**सारः** - प्रणष्टं हिरण्यादिकं धनं स्थानपालादिभिः सम्प्राप्तम्, ततश्च राज्ञेऽर्पितम्, राजा तद्धनं धनस्वामिने दापयेत्। यदि स धनस्वामी स्वरूपसंख्यादिहेतुभिः स्वकीयत्वं न संसाधयति, तर्हि तद्धनसमं धनं राज्ञे दण्डस्वरूपं प्रदद्यात्।

प्रणष्टं हिरण्यादि शौल्किकस्थानपालादिभिरधिगतं राज्ञे समर्पितं यत्तद्राज्ञा धनिने दातव्यम्। यदि धनी रूपसंशयादिभिर्लिङ्गैर्भावयेत्। यदि न भावयति तदा तत्समं दण्ड्यः। असत्यवादित्वात्। अधिगमस्य स्वत्वनिमित्तत्वात्स्वत्वे प्राप्ते तत्परावृत्तिरनेनोक्तः।। तत्र वर्षत्रयपर्यन्तमवश्यं रक्षणीयम्। तत्र यदि संवत्सरादर्वाक् स्वाम्यागच्छेत्तदा कृत्स्नमेत्र दद्यात्। यदा पुनः संवत्सरादूर्ध्वमागच्छति, तदा किंचिद्भोगं रक्षणमूल्यं गृहीत्वा शेषं स्वामिने दद्यात्, यथाह 'आददीताथ षड्भागं प्रणष्टाधिगतान्नृपः। दशमं द्वादशं वापि सतां धर्ममनुस्मरन्। तत्र प्रथमे वर्षे कृत्स्नमेव दद्यात्, द्वितीये द्वादशं भागं, तृतीये दशमं, चतुर्थादिषु षष्ठं भागं गृहीत्वा शेषं दद्यात्। राजभागस्य चतुर्थोंऽशोऽधिगन्त्रे दातव्यः। स्वास्थनागमे तु कृत्स्नस्य धनस्य चतुर्थमंशमधिगन्त्रे दत्त्वा शेपं राजा गृह्णीयात्।

*रथ्याशुल्कशालादिनिपतितस्य सुवर्णादेर्नष्टस्याधिगमे विधिमुक्त्वा अधुना भूमौ चिरनिखातस्य सुवर्णादेर्निधिशब्दवाच्यस्याधिगमे विधिम् आह -*

**राजा लब्ध्वा निधिं दद्याद् द्विजेभ्योऽर्धं द्विजः पुनः।**

**विद्वानशेषमादद्यात्स सर्वस्य प्रभुर्यतः॥ 34॥**

**इतरेण निधौ लब्धे राजा षष्ठांशमाहरेत्।**

**अनिवेदितविज्ञातो दाप्यस्तं दण्डमेव च ॥ 35॥**

**अन्वयः** - राजा निधिं लब्ध्वा अर्धं द्विजेभ्यः दद्यात् विद्वान् द्विजः पुनः (निधिं लब्ध्वा) अशेषम् आदद्यात् यतः सः सर्वस्य प्रभुः । इतरेण निधौ लब्धे राजा षष्ठांशम् आहरेत् अनिवेदितविज्ञातः तं (निधिम्) दण्डमेव च दाप्यः ।

निधिं राजा लब्ध्वा अर्धं ब्राह्मणेभ्यो दत्त्वा शेषं कोशे निवेशयेत्

**व्याख्या** - राजा भूपतिः, निधिम् = भूमौ निखातद्रव्यम्, लब्ध्वा = सम्प्राप्य, अर्धम् = समांशकम्, द्विजेभ्यः = ब्राह्मणेभ्यः, दद्यात् = प्रयच्छेत् । विद्वान् = वेदधर्म-शास्त्रज्ञः, द्विजः = ब्राह्मणः, पुनरिति वाक्यालङ्कारे, अशेषम् = सम्पूर्णम्, आदद्यात् = गृह्णीयात्, यतः = यस्मात्, सः = ब्राह्मणः, सर्वस्य = सम्पूर्णायाः पृथिव्याः, प्रभुः = स्वामी (भवति), इतरेण = ब्राह्मणातिरिक्तेन, निधौ = निखातद्रव्ये, लब्धे सम्प्राप्ते, राजा भूपतिः, षष्ठांशम् = षष्ठभागम्, आहरेत् = स्वीकुर्यात्, अनिवेदितविज्ञातः = निवेदनाभावेऽपि तद्विषयक-ज्ञानवान्, तम् = पुरुषम्, दण्डमेव च = दण्डमपि च, दाप्यः = प्रदापयेत् । चकारेण च निधेरपि ग्रहणं भवति ।

**सारः** - राजा निधिं सम्प्राप्य तदर्धं ब्राह्मणेभ्यो दद्यात्, शेषञ्च स्वयं स्वीकुर्यात् । यदि तं निधिं विद्वान् ब्राह्मणः कश्चित् प्राप्नोति, तर्हि स एव सम्पूर्ण धनं गृह्णीयात्, यतो हि स सम्पूर्णायाः पृथिव्याः स्वामी भवति, ब्रह्मणः ज्येष्ठपुत्रत्वात् । यदि ब्राह्मणातिरिक्तः कश्चित्प्राप्नोति तर्हि, षष्ठांशं स्वयमादद्यात्, शेषञ्च धनमधिगन्ता ग्रहीष्यति । यदि कश्चिन्निधिं सम्प्राप्यापि राजानं न निवेदयति, राजा च स्वचारेण जानाति, तर्हि तस्मान्निधिमपि गृह्णीयादपराधाय दण्डमपि दद्यात् ।

उक्तलक्षणं निधिं राजा लब्ध्वा अर्धं ब्राह्मणेभ्यो दत्त्वा शेषं कोशे निवेशयेत् । ब्राह्मणस्तु विद्वान् श्रुताध्ययनसंपन्नः सदाचारो यदि

निधिं लभेत तदा सर्वमेव गृह्णीयात्, यस्मादसौ सर्वस्य जगतः प्रभुः। इतरेण तु राजविद्वद्ब्राह्मणव्यतिरिक्तेनअविद्वद्ब्राह्मणक्षत्रियादिना निधौ लब्धे राजा षष्ठांशमधिगन्त्रे दत्वा शेषं निधिं स्वयमाहरेत्। अनिवेदितश्चासौ विज्ञातश्च राज्ञेऽप्यनिवेदितविज्ञातः, यः कश्चिन्निधिं लब्ध्वा राज्ञे न निवेदितवान् विज्ञातश्च राज्ञा स सर्वं निधिं दाप्यो दण्डं च शक्त्यपेक्षया। अथ निधेरपि स्वाभ्यागत्य रूपकसंख्यादिभिः स्वत्वं भावयति तदा तस्मै राजा निधि दत्वा षष्ठं द्वादशं वाऽशं स्वयमाहरेत्।

*चौरहृतं प्रत्याह-*

**देयं चौरहृतं द्रव्यं राज्ञा जानपदाय तु।**

**अददद्धि समाप्नोति किल्विषं यस्य तस्य तत्॥ 36॥**

**अन्वयः** - राज्ञा चौरहृतं द्रव्यं जानपदाय देयम्। हि अददत् यस्य तत् तस्य च किल्बिषं समाप्नोति।

**व्याख्या** - राज्ञा = भूपतिना, चौरहृतम्=चौरेण चोरितम्, द्रव्यम् = हिरण्यादिधनम्, जानपदाय = जनपदे यस्य तद्धनं तस्मै, देयम् = दातव्यम्। हि यस्मात्, अददत् समाप्नोति = प्राप्नोति। = अप्रयच्छत्, यस्य = पुरुषस्य, तत्= धनम्, तस्य, तस्य च = चौरस्य च, किल्बिषम् = पापम्, समाप्नोति = प्राप्नोति।

राजा चौरधनं सम्प्राप्य तस्य स्वामिने दीयते

**सारः** - राजा चौरधनं सम्प्राप्य यस्य तद्धनमासीत्, तस्मै प्रदद्यात्, अन्यथा तद्धनंस्वामिनश्चौरस्य च पापं समाप्नोति।

चौरैर्हृतं द्रव्यं चौरेभ्यो विजित्य जानपदाय स्वदेशनिवासिने यस्य तत् द्रव्यं तस्मै राज्ञा दातव्यम्। हि यस्मात् अददत् प्रायच्छत् यस्य

तदपहृतं द्रव्यं तस्य किल्विषमाप्नोति। तस्य चौरस्य च। यथाह मनुः 'दातव्यं सर्ववर्णेभ्यो राज्ञा चौरैर्हृतं धनम्। राजा तदुपयुञ्जानश्चौरस्याप्नोति किल्बिषम्। यदि चौरहस्तादादाय स्वयमुपभुङ्क्ते तदा चौरस्य किल्बिषमाप्नोति। अथ चौरहृतमुपेक्षते तदा जानपदस्य किल्विषम्। अथ चौरहृताहरणाय यतमानोऽपि न शक्नुयादाहर्तुं तदा तावद्धनं स्वकोशाद्वा दद्यात्। यथाह गौतमः - 'चौरहृतमवजित्य यथास्थानं गमयेत्कोशाद्वा दद्यात् ' इति। कृष्णद्वैपायनोऽपि - 'प्रत्याहर्तुं न शक्तस्तु धनं चौरैर्हृतं यदि। स्वकोशातद्धि देयं स्यादशक्तेन महीक्षिता॥ इत्यसाधारणव्यवहार मातृकाप्रकरणम्।

## Summarised Overview

स्वकीयमपराधं परिहृत्यैवाभियोक्तारं प्रत्यभियोजयेत्। ससभ्यस्य सभापतेः कर्तव्यम्-वादिप्रतिवादिनोर्मध्ये निर्णयकार्यस्य सम्पादनार्थं दण्डादिदाने कश्चित्समर्थः प्रतिभूः (प्रतिनिधिः) ग्रहीतव्यः । अर्थिना निवेदितस्य अभियोगस्य प्रत्यर्थिना निह्नवे कृते यदा अर्थिना साक्ष्यादिभिर्भावितः अङ्गीकारितः प्रत्यर्थी तदा प्रकृतं धनं अर्थिने राज्ञे च दद्यात्। प्राणात्यये कुलवधूविवादे च शीघ्रमेवोत्तरं दापयेत्, न कालप्रतीक्षणं कुर्यात्।

अनन्तरं दुष्टस्य लक्षणमाह- यो मनुष्यो मनोवाक्कायकर्मभिः भयादिनिमित्तरहितादपि स्वभाववशादेव विकारं गच्छति, सोऽभियोगे साक्ष्ये वा दुष्टः परिकीर्त्तितः। विवादः सपणः स्याच्चेत्तदा तस्मिन् विवादे पराजितः पुरुषः राज्ञे प्रकृतार्थसमं दण्डं तथा स्वकृतं पणञ्च दद्यात्।

भूपतिः प्रमादाभिहितं वादं परित्यज्य वस्तुतत्त्वानुसारेण व्यवहारान् अन्तं नयेत् । वादी सुवर्णाद्यनेकवस्तुविषयकं वादं प्रस्तौति ।अर्थिप्रत्यर्थिनो स्मृत्योः परस्परविरोधे सति इतरेतरबाधनादप्रामाण्यं कस्मात्र भवति, विषयव्यवस्था किमित्याश्रीयते इत्यतः उक्तम्। मानुषं प्रमाणं लिखितं, भुक्तिः, साक्षिणश्चेति त्रिविधम् कीर्तितम्। एषाम् अन्यतमाभावे दिव्यानि अन्यतमम्

उच्यते। ऋणादिषु विवादेषु यद्यपि उत्तरा क्रिया प्रबला भवति, तथापि निक्षेपादिषु सीमपूर्वाक्रियैव बलवत्तरा भवति। आध्यादिषु दण्डविशेष प्रतिपादनार्थमाह। स्वत्वाव्यभिचारत्वेन भोगस्य स्वत्वे प्रामाण्यमुक्तम्। भोगमात्रस्य स्वत्वव्यभिचारित्वात्कीदृशो भोगः प्रमाणमित्यत आह-कुलपरम्पराप्राप्ताद्धनाद्विना शेषेषु सर्वेषु धनेषु भोगापेक्षयागमस्य बलीयस्त्वं (प्राबल्यम्) भवतीति।यस्मिन्नागमे स्वल्पापि भुक्तिर्मागो नास्ति तस्मिन्नागमे बलं संपूर्ण नैवास्ति।

कश्चिदागमकर्ता पुरुषः व्यवहारनिर्णयात्प्रागेव मृतस्तदा तस्य यो दायहरः पुत्रादिः, स तमागमं साधयेत्। प्रजाजनानां व्यवहारदर्शनकार्ये भूपतिना नियुक्ताः पूगाः, श्रेणयः, कुलानि च भवन्ति। नृपेण प्रणष्टाधिगतं धनं धनिने देयं लिङ्गैः न विभावयेत् चेत् (तर्हि) तत्समं दण्डम् अर्हति।चौरैर्हृतं द्रव्यं चौरेभ्यो विजित्य जानपदाय स्वदेशनिवासिने यस्य तत् द्रव्यं तस्मै राज्ञा दातव्यम्।

# Assignments

**एकेन वाक्येन वाक्यद्वयेन वा उत्तरयत-**

1. सः हीनः दण्ड्यश्चेति स्मृतः- कीदृशः जनः?
2. उभयोरपि वादिनोः संभवत्सु साक्षिषु सत्सु, कस्य साक्षिणः प्रष्टव्याः ?
3. “कलहे साहसेषु च प्रत्यभियोगं कुर्यात्” इत्यत्र ‘कलहः’ किं सूचयति?
4. "मिथ्याभियोगी" इत्युक्तौ कः आशयः ?
5. "अन्यत्रेच्छया कालः स्मृतः" इत्यस्य अर्थं कीदृशः?
6. स्वपणः कस्य दातव्यः?
7. न्यायस्य प्राबल्यं कुत्र दृश्यते?
8. अर्थशास्त्रे बलवद्वस्तु किम्?

9. मानुषप्रमाणस्य प्रकाराः के?

10. कस्य हानिः विंशतिवार्षिकी इति उल्लेखितः?

11. यदा आगमः कृतः तदा कः तं उद्धर्तव्यः? न तत्सुतस्ततो वा भुक्तिः कथं भवति?

12. निधिं लब्ध्वा राजा कति अंशं ब्राह्मणेभ्यः दद्यात्?

13. चौरहृतं द्रव्यं कस्य देयम्?

**टिप्पणिं लिखत-**

1. "अभियोगेऽथ साक्ष्ये वा दुष्टः स परिकीर्तितः" - सन्दर्भं विशदयत।
2. दुष्टसाक्षिणः वाणी, चक्षुः, ओष्ठौ च कथं भवन्ति?
3. "साक्षिषूभयतः सत्सु साक्षिणः पूर्ववादिनः।

   पूर्वपक्षेऽधरीभूते भवन्त्युत्तरवादिनः।।" इत्यस्य श्लोकस्य आधारं कृत्वा न्यायप्रक्रियायां साक्षिणां क्रमोपस्थितेः महत्त्वं वर्णयत।

4. छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः।

   भूतमप्यनुपन्यस्तं हीयते व्यवहारतः॥ श्लोकस्य आधारेण न्यायव्यवस्थायां सत्यम् एव किमर्थं मुख्यं मन्यते? नृपः निर्णये कानि विवेचनानि कर्तव्यानि?

5. स्मृत्योर्विरोधे न्यायस्य प्राबल्यं कथं स्यात्? तस्य प्रामाण्यं किं प्रमाणीकुर्वन्ति?
6. 'अर्थशास्त्रात् तु बलवद्धर्मशास्त्रमिति स्थितिः' इत्यत्र कः तात्पर्यः?
7. "प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितम्।

   एषामन्यतमाभावे दिव्यान्यतममुच्यते" इत्यस्य श्लोकस्य व्याख्यां कुरुत।

8. सर्वेष्वर्थविवादेषु बलवत्युत्तराक्रिया इति किमर्थं कथ्यते?
9. आध्यादीनां विहर्तृभ्यः धनिनः कस्य धनं दातव्यं? किमर्थं च दण्डं राज्ञे प्रदातव्यं?
10. यदि अभियुक्तः पुरुषः मृतः स्यात्, तर्हि तमागमं कः साधयेत्? आगमं विना कृता भुक्तिः

    व्यवहारे प्रमाणं किमर्थं न स्यात्?

**निबन्धात्कः प्रश्नाः**

1. दुष्टस्य किं लक्षणं उक्तम् अस्ति?

2. व्यवहारविधौ नृपेण नियुक्तेषु पूगेषु, श्रेण्यः, कुलेषु च कस्य प्राबल्यं कस्य च दौर्बल्यं भवति? तेषां परस्परगौरवक्रमः कः?
3. निधेः लाभे राजा तथा ब्राह्मणः च किं कर्तव्यं करोति? ब्राह्मणातिरिक्तः कोऽपि निधिं प्राप्नोति चेत् कः नियमः? अनिवेदितनिधिग्रहणे का दण्डव्यवस्था?
4. यदि राजा चौरहृतं द्रव्यं प्राप्नोति, तर्हि किमकर्तव्यं तेन? यदि तं न करोति तर्हि कः दोषः सम्पद्यते?
5. याज्ञवल्क्यस्मृतेः व्यवहाराध्यायम् अनुसृत्य असाधारणव्यवहारमातृकाप्रकरणस्य विषयान् विशदयत।

## Suggested Readings


1. Hinduism and Law: An Introduction, Timothy Lubin et. al, Cambridge University
2. Studies in Hindu Law and Dharmaśāstra, Ludo rocher, anthem Press, 2014.


## References


1. श्रीमद् योगीश्वरमहर्षियाज्ञवल्क्यप्रणीता, याज्ञवल्क्यस्मृतिः, व्याहाराधायायः, वायाख्याकारः -डां.कमलनयनशर्मा, राष्ट्रिय-संस्कृतसंस्थानम्-जयपुरम्, 2021
2. Yanjavalkyasmrti or Yogishwara Yanjavalkya with the Mitakshara commentary or Vijnaneswar, Choukhamba sanskrit series office, Varanasi, 1967
3. Yajnavalkya Smrti - Prescribed portions
4. History of Dharmasasta, P. V. Kane.

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

# याज्ञवल्क्यस्मृतेः सविशेषाध्ययनम्

## BLOCK 2

SGOU

UNIT 1

# व्यवहाराध्यायः ऋणादानप्रकरणम्
# (द्वितीयोध्यायः 37- 50 श्लोकाः)

## Learning Outcomes

- याज्ञवल्क्यस्मृतौ व्यवहाराध्याये ऋणदानप्रकरणस्य सविशेषज्ञानं लभते।
- पूर्विकाणां धर्मबोधं अवगच्छति।
- समृतीनां मूल्यानां च अवगमनम्।

## Background

महर्षिणा याज्ञवल्क्येन रचितः ग्रन्थः भवति याज्ञवल्क्यस्मृतिः। याज्ञवल्क्यस्मृतिः त्रिषु अध्यायेषु विभक्ता वर्तते - 1. आचारः, 2. व्यवहारः, 3. प्रायश्चित्तं च। व्यवहाराध्यायस्य साधारणव्यवहार-मातृकाप्रकरणे व्यवहारलक्षणं, सभासदलक्षणं, सभासदसंख्या, सभासदां दण्डः, ब्राह्मणानां दोषः, प्राड्विवाकः, प्राड्विवाकगुणाः, प्राड्विवाकलक्षणम्, व्यवहारविषयः, व्यवहारस्य अष्टादशभेदाः, आसेधलक्षणम्, आसेधश्चतुर्विधः, भाषाकरणप्रकारः, पक्षाभासाः, अनादेयव्यवहाराः, आदेयव्यवहाराः, उत्तरदानप्रकारः, उत्तरस्वरूपम्, चतुर्विधमुत्तरम्, उत्तरभासानां लक्षणानि उदाहरणानि च, अनुत्तरत्वे कारणत्वं, व्यवहारस्य चत्वारः पादाः इत्यादिविषयाः समुपलभ्यन्ते। व्यवहारमातृकाप्रकरणे प्रत्यभियोगः, प्रतिभूग्रहणम्, निह्नवे प्रतिभूकर्तव्यम्, कालविलम्बापवादः, छलनिरसनप्रकारः, प्रमाणभेदाः, दण्डपरिमाणम्, दण्डप्रकाराः, आगमसापेक्षभोगः इत्यादीनां विषयाणाम् उल्लेखः उपलभ्यते। अस्मिन् एकके ऋणदानप्रकरणात् ईदृशमृणं देयं, देयमृणं यदा येन

च देयं, येन देयं पुनरपि यद्दणं दातव्यं, येन च दातव्यं, यत्र च काले दातव्यं इत्यादिविषयाः प्रतिपादयन्ति। तस्मिन् काले सामाजिके ऋणदानव्यवस्थां पश्यामः।

## Keywords

वर्णक्रमाच्छतं, कान्तारगास्तु, सामुद्रा, चतुस्त्रिद्विगुणा, प्रपन्नं, अधमर्णिकः, उत्तमर्णिकः, परिक्षीणं, स्वकं , अविभक्तैः, रिक्थिनः, पैतृकम्, गौपशौण्डिकशैलूषरजकव्याधयोषिताम्, प्रेते।

## Discussion

### अथ ऋणादानप्रकरणम्

साधारणासाधारणरूपां व्यवहारमातृकामभिधायाधुनाष्टादशानां व्यवहारपदानामाद्यमृणादानपदं दर्शयति- 'अशीतिभागो वृद्धिः स्यात्' इत्यादिना, 'मोच्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने' इत्येवम्। तच्च ऋणादानं सप्तविधम् - ईदृशमृणं देयं, ईदृशमदेयं, अनेनाधिकारिणादेयं, अस्मिन् समये देयं, अनेन प्रकारेण देयम् इत्यादीनि। उत्तमर्णे दानविधिः, आदानविधिश्चेति द्विविधमप्यस्ति। एतच्च नारदेन स्पष्टीकृतम् - 'ऋणं देयमदेयं च येन यत्र यया च यत्। दानग्रहणधर्माभ्यामृणादानमिति स्मृतम्॥' इति।

*तत्र प्रथममुत्तमर्णस्य दानविधिमाह, तत्पूर्वकत्वादितरेषाम् -*

**अशीतिभागो वृद्धिः स्यान्मासि मासि सबन्धके।**
**वर्णक्रमाच्छतं द्वित्रिचतुःपञ्चकमन्यथा॥ 37॥**

**अन्वयः** - सम्बन्धके, मासि मासि, अशीतिभागः, वृद्धिः स्यात्, अन्यथा, वर्णक्रमात्, द्वित्रिचतुष्पञ्चकं, शतम् (वृद्धिः स्यादिति)।

**व्याख्या** - सम्बन्धके - बन्धकसाहिते प्रयोगे, मासि मासि - प्रतिमासं, अशीतिभागः - प्रयुक्तद्रव्यस्याशीतिभागः, वृद्धिः - वर्धनम्, स्यात् - भवेत्, अन्यथा - बन्धकरहिते प्रयोगे, वर्णक्रमात् - ब्राह्मणादिक्रमेण, द्वित्रिचतुष्पञ्चकं - एतत्संख्याकं, शतम् - प्रतिशतम् । वृद्धिः स्यादित्यर्थः।

ब्राह्मणादीनां वृद्धेः व्यवस्था

मासि मासि प्रतिमासं बन्धकं विश्वासार्थे यदाधीयते, आधिरिति यावत्। बन्धकेन सह वर्तत इति सबन्धकः प्रयोगः तस्मिन्सबन्धके प्रयोगे प्रयुक्तस्य द्रव्यस्य अशीतितमो भागो वृद्धिः भवति। अन्यथा प्रयोगे वर्णानां ब्राह्मणादीनां क्रमेण द्वित्रिचतुष्पञ्चकं शतं धर्म्यं भवति। ब्राह्मणेऽधमर्णे द्विकं शतं, क्षत्रिये त्रिकं, वैश्ये चतुष्कं, शूद्रे पञ्चकम्। मासि मासीत्येव द्वौ वा त्रयो वा चत्वारो वा पञ्च वः द्वित्रिचतुःपञ्चः, अस्मिन् शते वृद्धिर्दीयते इति द्वित्रिचतुःपञ्चकं शतम्।

**सारः** - वृद्ध्यर्थं सम्बन्धकधनप्रयोगे प्रतिमासमशीतितमो भागो वृद्धिः धर्मयुक्ता वर्त्तते। अबन्धकधनप्रयोगो च ब्राह्मणादिवर्णे क्रममनुसृत्य द्विित्रचतुष्पञ्चकं प्रतिशतं वर्धितं धनं ग्राह्यम्।

*ग्रहीतृविशेषेण वृद्धेः प्रकारान्तरमाह -*

**कान्तारगास्तु दशकं सामुद्रा विंशकं शतम् ।**

**अन्वयः** - कान्तारगास्तु, दशकं, सामुद्राः, विंशकं, शतं (दद्युरिति)।

अरण्यसमुद्रमार्गगानां वृद्धेः व्यवस्था

**व्याख्या** - कान्तारगाः - अरण्यमार्गगाः, दशकं - दश, समुद्राः - समुद्रमार्गगाः, विंशकं - विंशतिः, शतं - प्रतिशतं, दद्युरिति।

कान्तारमरण्यं तत्र गच्छन्तीति कान्तारगाः। ये वृद्ध्या धनं गृहीत्वा-धिकलाभार्थमतिगहनं प्राणधनविनाशशङ्कास्थानं प्रविशन्ति ते दशकं

शतं दद्युः। ये च समुद्रगास्ते विंशकं शतम्। मासि मासीत्येव। एतदुक्तं भवति - कान्तारगेभ्यो दशकं शतं, सामुद्रेभ्यश्च विंशकं शतं, उत्तमर्ण आदद्यात् मूलविनाशस्यापि शङ्कितत्वादिति।

**सारः** - अरण्यमार्गेण व्यापारं कुर्वाणाः दशप्रतिशतं तथा समुद्रमार्गेण व्यापारनिरताः विंशतिप्रतिशतं वृद्धिं दद्युरिति।

*इदानीं कारितां वृद्धिमाह -*

**दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु जातिषु॥ 38॥**

**अन्वयः** - वा, सर्वे, सर्वासु जातिषु, स्वकृतां वृद्धिं, दद्युः।

**व्याख्या** - वा - अथवा, सर्वे - ब्राह्मणादयोऽधमर्णाः, सर्वासु - विश्वासु, जातिषु - ब्रह्मणप्रभृतिषु, स्वकृतां - स्वाभ्युपगतां, वृद्धिं - वर्द्धितं द्रव्यं, दद्युः - प्रदद्युः इति।

सर्वासु जातिषु स्वकृतां वृद्धिं दद्युः

सर्वे वा ब्राह्मणादयोऽधमर्णाः अबन्धके सबन्धके वा स्वकृतां स्वाभ्युपगतां वृद्धिं सर्वासु जातिषु दद्युः। क्वचिदकृतापि वृद्धिर्भवतिः यथाह नारदः 'न वृद्धिः प्रीतिदत्तानां स्यादनाकारिता क्वचित्। अनाकारितमप्यूर्ध्वं वत्सरार्धाद्विवर्धते॥' इति। यस्तु याचितकं गृहीत्वाः देशान्तरं गतस्तं प्रति कात्यायनेनोक्तम्- 'यो याचितकमादाय तमदत्वा दिशं व्रजेत्। ऊर्ध्वं संवत्सरात्तस्य तद्धनं वृद्धिमाप्नुयात्॥' इति। यो याचितकमादाय याचितोऽप्यदत्वा देशान्तरं व्रजति तं प्रति तेनैवोक्तम्- 'कृतोद्धारमदत्वा यो याचितस्तु पुनः दिशं व्रजेत्। ऊर्ध्वं संवत्सरात्तस्य तद्धनं वृद्धिमाप्नुयात्॥' इति स्वदेशे स्थित एव याचितो याचितकं न ददाति तं याचिनकालादारभ्याकारितां वृद्धिं दापयेद्राजा। यथाह- 'स्वेदेशेऽपि स्थितो यस्तु न दद्याद्याचितः कश्चित्। तं ततोऽकारिता वृद्धिमनिच्छन्तं च दापयेत्॥' इति। अनाकारितवृद्धेरपवादो नारदेनोक्तः 'पण्यमूल्यं भृतिर्न्यासो दण्डो यश्च प्रकल्पितः। वृथादानाक्षिकपणा वर्धन्ते नाविवक्षिताः।' अविवक्षिता अनाकारिता इति।

**सारः** - सर्वे ब्राह्मणादयोऽधमर्णाः सर्वजातियोत्तमर्णेषु स्वाभ्युपगतां वृद्धिं दद्युः।

*अधुना द्रव्यविशेषे वृद्धिविशेषमाह -*

**सन्ततिस्तु पशुस्त्रीणां रसस्याष्टगुणा परा।**
**वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा परा॥ 39॥**

**अन्वयः** - पशुस्त्रीणां तु सन्ततिः। रसस्य अष्टगुणा परा, वस्त्रधान्यहिरण्यानां (क्रमशः) चतुस्त्रिद्विगुणा परा।

**व्याख्या** - पशुस्त्रीणाम् - स्त्रीत्वविशिष्टपशूनाम्, सन्ततिः - सन्तानं, तु - एव (वृद्धिः)। तैलघृतादेः, अष्टगुणा - अष्टगुणिता, परा - अन्तिमा (वृद्धि ) वस्त्रधान्यहिरण्यानां - वसनान्नसुवर्णादीनां, चतुस्त्रिद्विगुणा - एतत्संख्या प्रगुणिता, पराः - अन्तिमा, वृद्धिरित्यर्थः। नातः परं वर्द्धत इति तात्पर्यम्।

पशुस्त्रीणां सन्ततिः एव वृद्धिः

पशूनां स्त्रीणां पोषणासमर्थस्य तत्पुष्टिसन्ततिकामस्य प्रयोगः संभवति। ग्रहणं च क्षीरपरिचर्यार्थिनः॥

रसस्य तैलघृतादेर्वृद्धिग्रहणमन्तरेण चिरकालावस्थितस्य स्वकृतया वृद्ध्या वर्धमानस्य अष्टगुणा वृद्धिः परा, नातः परं वर्धते। तथा वस्त्रधान्यहिरण्यानां यथासंख्यं चतुर्गुणा। त्रिगुणा द्विगुणा च वृद्धिः परा। वसिष्ठेन तु रसस्य त्रैगुण्यमुक्तम्। द्विगुणं हिरण्यं त्रिगुणं धान्यम्। धान्येनैव रसा व्याख्याताः पुष्पमूलफलानि च। तुलाधृतमष्टगुणम्' इति। मनुना तु धान्यस्य पुष्पमूलफलादीनां च पञ्चगुणत्वमुक्तम्- 'धान्ये शदे लवे वाह्ये नातिक्रामति पञ्चताम्' इति। शदः क्षेत्रफलं पुष्पमूलफलादि, लवो मेषोर्णाचमरीकेशादिः, वाह्यो बलीवर्दतुरगादिः। धान्यशदलववाह्यविषया वृद्धिः पञ्चगुणत्वे नातिक्रामतीति। तत्राधमर्ण- योग्यतावशेन दुर्भिक्षादिकालवशेन च व्यवस्था द्रष्टव्या। एतच्च सकृत्प्रयोगे सकृदाहरणे च वेदितव्यम्। पुरुषान्तरसंक्रमणेन प्रयोगान्तरकरणे तस्मिन्नेव वा पुरुषे रेकसेकाभ्यां अनेकशः

प्रयोगान्तरकरणे सुवर्णादिकं द्वैगुण्याद्यतिक्रम्य पूर्ववद्वर्धते। सकृत्प्रयोगेऽपि प्रतिदिनं प्रतिमासं प्रतिसंवत्सरं वा वृद्ध्याहरणे- ऽधमर्णदेयस्य द्वैगुण्यासंभवात्पूर्वाहृतवृद्ध्या सह द्वैगुण्यमतिक्रम्य वर्धत एव। यथाह मनुः- 'कुसीदवृद्धिर्द्वैगुण्यं नात्येति सकृदाहृता।' इति। सकृदाहितेत्यपि पाठोऽस्ति। उपचयार्थे प्रयुक्तं द्रव्यं कुसीदं, तस्य वृद्धिः कुसीदवृद्धिः, सा द्वैगुण्यं नात्येति नाति क्रामति। यदि सकृदाहिता सकृत्प्रयुक्ता। पुरुषान्तरसंक्रमणादिना प्रयोगान्तरकरणे द्वगुण्यमत्येति। सकृदाहृतेति पाठे तु शनैः शनैः प्रतिदिनं प्रतिमासं प्रतिसंवत्सरं वाऽधमर्णादाहृता द्वैगुण्यमत्येतीति व्याख्येयम्। तथा गौतमेनाप्युक्तम् - चिरस्थाने द्वैगुण्यं प्रयोगस्य' इति। 'प्रयोगस्य' इत्येकवचननिर्देशात्प्रयोगान्तरकरणे द्वैगुण्यातिक्रमोऽभिप्रेतः। 'चिरस्थान' इति निर्देशात् शनैः शनैर्वृद्धिग्रहणे द्वैगुण्यातिक्रमो दर्शितः॥

वस्त्रधान्यहिरण्यानां यथासंख्यं चतुस्त्रिद्विगुणान्तिमा वृद्धिः

**सारः** - पशुस्त्रीणां सन्ततिः एव वृद्धिः भवति। तैलघृतादेः अष्टगुणान्तिमा वृद्धिः भवति एवमेव वस्त्रधान्यहिरण्यानां यथासंख्यं चतुस्त्रिद्विगुणान्तिमा वृद्धिः भवति। नातः परं वर्द्धत इति तात्पर्यार्थः।

*ऋणप्रयोगधर्मा उक्ताः; सांप्रतं प्रयुक्तस्य धनस्य ग्रहणधर्मा उच्यन्ते -*

**प्रपन्नं साधयन्नर्थं न वाच्यो नृपतेर्भवेत्।**
**साध्यमानो नृपं गच्छन्दण्ड्यो दाप्यश्च तद्धनम्॥40॥**

**अन्वयः** - प्रपन्नम्, अर्थम्, साधयन्, नृपं गच्छन्, दण्ड्यः, तद्धनञ्च दाप्यः।

**व्याख्या** - प्रपन्नम् - अधमर्णेन स्वीकृतम्, अर्थम् - धनम्, साधयन् - प्रत्याहरन्, नृपतेः - राज्ञः, वाच्यः - निवारणीयः, न - नहि, भवेत् - स्यात्, साध्यमानः - याच्यमानः, नृपं - राजानम्, गच्छन्- व्रजन्, दण्ड्यः - दण्डनार्हः, तद्धनञ्च - पूर्वं स्वीकृतमर्थञ्च, धनिने दाप्यः - प्रदाप्यः।

प्रपन्नमभ्युपगतमधमर्णेन धनं साक्ष्यादिभिर्भावितं वा साधयन्

प्रत्याहरन् धर्मादिभिरुपायैरुत्तमर्णो नृपतेर्वाच्यो निवारणीयो न भवति॥ धर्मादयश्चोपार्या मनुना दर्शिताः 'धर्मेण व्यवहारेण छलेनाचरितेन च। प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च॥' इति। धर्मेण प्रीतियुक्तेन सत्यवचनेन, व्यवहारेण साक्षिलेख्याद्युपायेन, छलेन उत्सवादिव्याजेन भूषणादिग्रहणेन, अचरितेन अभोजनेन, पञ्चमेनोपायेन बलेन निगडबन्धनादिना, उपचयार्थं प्रयुक्तं द्रव्यमेतैरुपायैरात्मसात्कुर्यादिति। 'प्रपन्नं साधयन्नर्थं न वाच्य' इति वदन् अप्रतिपन्नं साधयन् राज्ञा निवारणीय इति दर्शयति। एतदेव स्पष्टीकृतं कात्यायनेन - 'पीडयेद्यो धनी कश्चिद्दणिकं न्यायवादिनम्। तस्मादर्थात्स हीयेत तत्समं चाप्नुयाद्दमम्॥' इति। यस्तु धर्मादिभिरुपायैः प्रपन्नमर्थं साध्यमानो याच्यमानो नृपं गच्छेद्राजानमभिगम्य साधयन्तमभियुङ्क्ते स दण्ड्यो भवति, शक्त्यनुसारेण धनिने तद्धनं दाप्यश्च राज्ञा। दापने च प्रकारा दर्शिताः - 'राजा तु स्वामिने विप्रं सान्त्वेनैव प्रदापयेत्। देशाचारेण चान्यांस्तु दुष्टान्संपीड्य दापयेत्॥ रिक्थिनं सुहृदं वापि छलेनैव प्रदापयेत्॥' इति। 'साध्यमानो नृपं गच्छन्' इत्येतत् 'स्मृत्याचारव्यपेतेन' इत्यस्य प्रत्युदाहरणं बोद्धव्यम्।

प्रयुक्तस्य धनस्य ग्रहण धर्मा

**सारः** - अधमर्णेनाभ्युगतमर्थं प्रत्याहारन्नुत्तमर्णे नृपतेः निवारणियो न भवति। याच्यमानो - यदि नृपमधिगच्छति, तर्हि स दण्डनीयो भवति। पूर्वं स्वीकृतं धनमपि देयं भवति।

*बहुषूत्तमर्णिकेषु युगपत्प्राप्तेष्वेकोऽधमर्णिकः केन क्रमेण दाप्यो राज्ञेत्यपेक्षित आह-*

**गृहीतानुक्रमाद्दाप्यो धनिनामाधमर्णिकः।**
**दत्त्वा तु ब्राह्मणायैव नृपतेस्तदनन्तरम्॥ 41॥**

**अन्वयः** - अधमर्णिकः, धनिनां, गृहीतानुक्रमात्, ब्राह्मणायैव, दत्त्वा, तदनन्तरं, नृपतेः (प्रदाप्यः)।

**व्याख्या** - अधमर्णिकः - ऋणग्रहीता, धनिनां - उत्तमर्णनाम्, ग्रहीतानुक्रमात् - धनग्रहणक्रमात्, दाप्यः - प्रदाप्यः, ब्राह्मणायैव - विप्रायैव, दत्त्वा - प्रदाय, तदनन्तरं - ततः पश्चात्, नृपतेः - राज्ञः, प्रदाप्य इत्यर्थः।

अधमर्णिकः धनिनां गृहीतानुक्रमात् दाप्यः

समानजातीयेषु धनिषु येनैव क्रमेण धनं गृहीतं तेनैव क्रमेणाधमर्णिको राज्ञा दाप्यः। भिन्नजातीयेषु तु ब्राह्मणादिक्रमेण।

**सारः** - यत्र उत्तमर्णाः सर्वे समानजातीयाः भवन्ति, तत्र ऋणग्रहणक्रमात् प्रदाप्यः। तत्र च विभिन्नजातीयाः सन्ति, तत्र ब्राह्मणक्रमेण प्रदाप्य इति।

*यदा पुनरुत्तमर्णो दुर्बलः प्रतिपन्नमर्थं धर्मादिभिरुपायैः साधयितुमशक्नुयाद्राज्ञा साधितार्थो भवति तदाऽधमर्णस्य दण्डमुत्तमर्णस्य च भृतिदानमाह -*

**राज्ञाऽधमर्णिको दाप्यः साधिताद् दशकं शतम्।**
**पञ्चकं च शतं दाप्यः प्राप्तार्थोऽप्युत्तमर्णिकः ॥42॥**

**अन्वयः** - राज्ञा, अधमर्णिकः, साधितात्, दशकम्, शतम्, दाप्यः हि प्राप्तार्थः उत्तमर्णिकः पञ्चकम् शतम् दाप्यः।

**व्याख्या** - राज्ञा - नृपेण, अधमर्णिकः - ऋणग्रहीता, साधितात् - प्रतिपादितात्, दशकम् - दशसंख्यकम्, शतम् - प्रतिशतम्, दाप्यः - राजकोषाय, हि - यतः, प्राप्तार्थः - सम्प्राप्तधनः, (ततः), उत्तमर्णिकः - ऋणप्रदाता, पञ्चकम् पञ्चसंख्याकम्, शतम् - प्रतिशतं, दाप्यः - प्रदाप्यः राजकोषाय इत्यर्थः।

अधमर्णिको राज्ञा साधितात् दशकं दाप्यः, उत्तमर्णस्तु प्राप्तार्थः पञ्चकं शतं दाप्यः

अधमर्णिको राज्ञा प्रतिपन्नार्थात्साधिताद्दशकं शतं दाप्यः। प्रतिपन्नस्य साधितार्थस्य दशममंशं राजाऽधमर्णिकाद्दण्डरूपेण गृह्णीयादित्यर्थः। उत्तमर्णस्तु प्राप्तार्थः पञ्चकं शतं भृतिरूपेण दाप्यः। साधितार्थस्य विंशतितमं भागमुत्तमर्णाद्राजा भृत्यर्थं गृह्णीयादित्यर्थः। अप्रतिपन्नार्थसाधने तु दण्डविभागो दर्शितः 'निह्नवे भावितो दद्यात्' इत्यादिना॥

**सारः** - प्रतिपन्नस्य साधितार्थस्य दशमंशं राजाधमर्णिकाद्दण्डरूपेण गृह्णीयात्। साधितार्थस्य च पञ्चकं शतमुत्तमर्णाद्राजा भृत्यर्थं गृह्णीयादित्यर्थः।

*सधनमधमर्णिकं प्रत्युक्तम्, अधुना निर्धनमधमर्णिकं प्रत्याह-*

हीनजाति - परीक्षीणयोः ऋणदानव्यवस्था

**हीनजातिं परिक्षीणमृणार्थं कर्म कारयेत्।**
**ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथोदयम् ॥43॥**

**अन्वयः** - हीनजातिं परिक्षीणं ऋणार्थं कर्म कारयेत्। परिक्षीणः ब्रह्मणस्तु यथोदयं शनैः दाप्यः।

**व्याख्या** - परिक्षीणं - निर्धनम्, हीनजातिं - उत्तमर्णापेक्षया निम्नजातिं, ऋणार्थं - ऋणनिवृत्यर्थं, कर्म - स्वजात्यनुरूपं कार्यं, कारयेत् - साधयेत्। परिक्षीणः - निर्धनः, ब्राह्मणस्तु - विप्रस्तु, यथोदयं - स्वसमृद्ध्यनुसारं, शनैः - मन्दं मन्दं, दाप्यः - प्रदाप्यः।

ब्राह्मणादिजातिरुत्तमर्णो हीनजातिं क्षत्रियादिजातिं परिक्षीणं निर्धनमृणार्थं ऋणनिवृत्यर्थं कर्म स्वजात्यनुरूपं कारयेत् तत्कुटुम्बा-निरोधेन। ब्राह्मणस्तु पुनः परिक्षीणो निर्धनः शनैः शनैः यथोदयं यथासंभवमृणं दाप्यः। अत्र च 'हीनजाति' ग्रहणं समानजातेरप्यु-पलक्षणम्। अतश्च समानजातिमपि परिक्षीणं यथोचितं कर्म कारयेत्। 'ब्राह्मण' ग्रहणं च श्रेयोजातेरुपलक्षणम्। अतश्च क्षत्रियादिरपि परिक्षीणो वैश्यादेः शनैः शनैर्दाप्यो यथोदयम्। एतदेव मनुना स्पष्टीकृतम् - 'कर्मणापि समं कुर्याद्धनिकेनाधमर्णिकः। समोऽपकृष्ट-जातिश्च दद्याच्छ्रेयांस्तु तच्छनैः॥' इति। उत्तमर्णेन समं निवृत्तोत्तमर्णा-धमर्णव्यपदेशमात्मानमधमर्णः कर्मणा कुर्यादित्यर्थः।

सारः - उत्तमवर्णस्योत्तमर्णः निर्धनेभ्यस्तथा स्वापेक्षया हीनजाति-भ्याश्चाधमर्णेन स्वजात्यनुरूपं कर्म कारयेत्। निर्धनो ब्राह्मणस्तु स्वसमृद्ध्यनुसारं शनैः शनैः ऋणशोधनं कुर्यादिति भावः।

*मध्यस्थस्थापितं न वर्धते -*

**दीयमानं न गृह्णाति प्रयुक्तं यः स्वकं धनम्।**
**मध्यस्थस्थापितं तत्स्याद्वर्धते न ततः परम् ॥44॥**

**अन्वयः** - यः प्रयुक्तं स्वकं धनं दीयमानं न गृह्णाति चेत् मध्यस्थस्थापितं स्यात् ततः परं न वर्धते।

**व्याख्या** - यः - उत्तमर्णः, प्रयुक्तं - उपचयार्थं प्रयुक्तम्, स्वकं - स्वकीयम्, धनं - द्रव्यं, दीयमानं - प्रदीयमानं, न - नहि, गृह्णाति - स्वीकरोति, चेत् - यदि, मध्यस्थस्थापितं - प्रतिभूसमक्षं सुरक्षितं, स्यात् - भवेत्, तर्हि ततः - स्थापनानात्, परं - पश्चात्, न - नहि, वर्धते - वृद्धिं गच्छति।

मध्यस्थस्थापितं धनं परं न वर्धते

उपचयार्थं प्रयुक्तं धनं अधमर्णेन दीयमानमुत्तमर्णो वृद्धिलोभाद्यदि न गृह्णाति तदाऽधमर्णे न मध्यस्थहस्ते स्थापितं यदि स्यात्तदा ततः स्थापनादूर्ध्वं न वर्धते। अथ स्थापितमपि याच्यमानो न ददाति ततः पूर्ववद्वर्धत एव।

**सारः** - उत्तमर्णः प्रयुक्तं धनं दीयमानमपि न गृह्णाति, अधमर्णश्च मध्यस्थसमीपे स्थापयति तर्हि तद्दिनात् तद्धनं न वर्धते।

*इदानीं देयमृणं यदा येन च देयं तदाह-*

**अविभक्तैः कुटुम्बार्थे यदृणं तु कृतं भवेत्।**
**दद्युस्तद्रिक्थिनः प्रेते प्रोषिते वा कुटुम्बिनि ॥45॥**

**अन्वयः** - अविभक्तैः कुटुम्बार्थे तु यत् ऋणं कृतं भवेत्। प्रेते प्रोषिते वा कुटुम्बिनिः तद् (ऋणं) रिक्थिनः दद्युः।

कुटुम्बिनिः प्रेते प्रोषिते वा रिक्थिनः सर्वे दद्युः

**व्याख्या** - अविभक्तैः - विभाजनरहितैः, कुटुम्बार्थे - परिवार-परिपोषणाय, तु यत् ऋणं - यदुद्धारः, कृतं - गृहीतः, भवेत् - स्यात्। कुटुम्बिनि - परिवारप्रधाने, प्रेते - मृते, प्रोषिते - देशान्तरे गमने, वा - अथवा, तद् - ऋणं, रिक्थिनः - दायहराः, दद्युः - प्रदद्युः।

अविभक्तैर्बहुभिः कुटुम्बार्थमेकैकेन यो यदृणं कृतं तदृणं कुटुम्बी दद्यात्। तस्मिन्प्रेते प्रोषिते वा तद्रिक्थिनः सर्वे दद्युः।

**सारः** - अविभक्तकुटुम्बप्रधानैः कुटुम्बहितार्थं गृहीतमृणं गृहीतुः मृते देशान्तगमने वा दायहराः प्रदद्युरिति भावः।

*येन देयमित्यत्र प्रत्युदाहरणमाह -*

**न योषित्पतिपुत्राभ्यां न पुत्रेण कृतं पिता।**
**दद्यादृते कुटुम्बार्थान्न पतिः स्त्रीकृतं तथा॥ 46॥**

**अन्वयः** - कुटुम्बार्थात् ऋते पतिपुत्राभ्यां (कृतम्) न योषित् पुत्रेण कृतम् न पिता तथा स्त्रीकृतम् न पतिः दद्यात्।

**व्याख्या** - कुटुम्बार्थात् - पोष्यवर्गहितेन, ऋते - विना, पतिपुत्राभ्यां - भर्त्रा सुतेन वा (गृहीतम्) न - नही, योषित् - पत्नी माता वा, पुत्रेण - सुतेन, कृतम् - गृहीतम्, न नहि, पिता - जनकः, तथा - तथैव, स्त्रीकृतम् - पत्नीगृहीतम्, न - नहि, पतिः भर्त्ता, दद्यात् - प्रयच्छेत्।

कुटुम्बार्थात् ऋते गृहीतमृणं योषित् न दद्यात्

पत्या कृतमृणं योषिद्भार्या नैव दद्यात्। पुत्रेण कृतं योषिन्माता न दद्यात्। तथा पुत्रेण कृतं पिता न दद्यात्। तथा भार्याकृतं पतिर्न दद्यात्। 'कुटुम्बार्थादृते' इति सर्वशेषः। अतश्च कुटुम्बार्थं येन केनापि कृतं तत् कुटुम्बिना देयम्। तदभावे तद्दायहरैर्देयमित्युक्तमेव।

**सारः** - कुटुम्बपरिपोषणं विना पतिपुत्राभ्यां गृहीतमृणं पत्नी माता वा दद्यात्, पुत्रेण कृतञ्चर्णं पतिः न प्रयच्छेदिति भावः।

*'पुत्रपौत्रैर्ऋणं देयम्' इति वक्ष्यति तस्य पुरस्तादपवादमाह -*

**सुराकामद्यूतकृतं दण्डशुल्कावशिष्टकम्।**
**वृथादानं तथैवेह पुत्रो दद्यान्न पैतृकम्॥ 47॥**

**अन्वयः** - सुराकामद्यूतकृतं दण्डशुल्कावशिष्टकं तथैव इह वृथा दानं पैतृकं पुत्रः न दद्यात्।

पुत्रपौत्रैः ऋणदेयव्यवस्था

**व्याख्या** - सुराकामद्यूतकृतं - मद्यपानस्त्रीव्यसनकितवकृतं दण्ड-शुल्कावशिष्टकं - दमनादिनिमित्तकं घट्टादिदेयावशिष्टं वा द्रव्यं तथैव - तेनैव प्रकारेण इह - अदेयप्रसङ्गे, वृथादानं - धूर्त्तादिभ्यः प्रतिज्ञातं, पैतृकं - पितृकृतं ऋणं, पुत्रः- सुतः न - नहि दद्यात् - प्रयच्छेत् ।

सुरापानेन यत्कृतमृणं कामकृतं स्त्रीव्यसननिमित्तं द्यूते पराजयनिमित्तं दण्डशुल्कयोरवशिष्टं वृथादानं धूर्तबन्दिमल्लादिभ्यो यत्प्रतिज्ञातम् - 'धूर्ते बन्दिनि मल्ले च कुवैद्ये कितवे शठे । चाटचारणचौरेषु दत्तं भवति निष्फलम् ॥' इति स्मरणात् । एतदृणं पित्रा कृतं पुत्रादिः शौण्डिकादिभ्यो न दद्यात् । अत्र 'दण्डशुल्कावशिष्टक' मित्यवशिष्ट-ग्रहणात्सर्वं दातव्यमिति न मन्तव्यम् । - 'दण्डं वा दण्डशेषं वा शुल्कं तच्छेषमेव वा । न दातव्यं तु पुत्रेण यच्च न व्यावहारिकम् ॥' इत्यौशनसस्मरणात् । गौतमेनाप्युक्तम्- 'मद्यशुल्कद्यूतदण्डान्पुत्रा-नाध्यावहेयुः' इति । न पुत्रस्योपरि भवन्तीत्यर्थः ।

**सारः** - मद्यपानार्थं स्त्रीव्यसनार्थं कितवार्थं वा गृहीतं दण्डशुल्कावशिष्टं वृथादानं वा पैतृकं धनं पुत्रो न दद्यात् ।

*अनेनादेयमृणमुक्तम् ।*

**गोपशौण्डिकशैलूषरजकव्याधयोषिताम् ।**
**ऋणं दद्यात्पतिस्तासां यस्माद् वृत्तिस्तदाश्रया ॥ 48॥**

**अन्वयः** - गोपशौण्डिकशैलूषरजकव्याधव्योषितां पतिः ऋणं दद्यात् । यस्मात् तेषां तदाश्रया वृत्तिः । भवतीति शेषः ।

गोपप्रभृतीनां कृतमृणं तेषां पतिः प्रदद्यात्

**व्याख्या** - गोपशौण्डिकशैलूषरजकव्याधयोषितां - गोपः - गोपाल-सुराकारनटवस्त्ररञ्जकाखेटकपत्नीनां, पतिः - भर्त्ता, ऋणं - उद्धारं, दद्यात् - प्रयच्छेत् । यस्मात् - यस्मात् कारणात् तेषां - गोपप्रभृतीनां पतीनां, तदाश्रया - तन्निमित्तका, वृत्तिः - जीविका । भवतीत्यर्थः । गोपो गोपालः, शौण्डिकः सुराकारः, शैलूषो नटः, रञ्जको वस्त्राणां

रञ्जकः, व्याधो मृगयुः, एतेषां योषिद्भिर्यद्दणं कृतं तत्पतिभिर्देयम् । यस्मात्तेषां वृत्तिर्जीवनं तदाश्रया योषिदधीना।

**सारः** - गोपप्रभृतीनां कृतमृणं तेषां पतिः प्रदद्यात् यतो हि तेषां पत्नीनिमित्तिका जीविका भवति।

*'पतिकृतं भार्या न दद्यात् इत्यस्यापवादमाह -*

**प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत्कृतम्।**
**स्वयं कृतं वा यद्दणं नान्यत् स्त्री दातुमर्हति॥ 49॥**

**अन्वयः** - प्रतिपन्नं वा पत्या सह यत्कृतं वा स्वयंकृतं यद्दणं तत् स्त्रिया देयम् अन्यत् स्त्री दातुं न अर्हति।

**व्याख्या** - प्रतिपन्नं - अवसितं (ज्ञातं), वा - अथवा, पत्या - भर्त्ता, सह - साकं, यत्कृतं - यद्गृहीतं, वा - अथवा, स्वयंकृतम् - निजेन गृहीतं (तत् ), स्त्रिया - पत्न्या, देयं - दातव्यं, अन्यत् - एतत् भिन्नं स्त्री - पत्नी, दातुं - प्रत्यावर्त्तितुम्, न - नहि, अर्हति - योग्या भवतीति ।

स्त्रीणाम् ऋणदेयव्यस्था

मुमूर्षुणा प्रवत्स्यता वा पत्या नियुक्तया ऋणादाने यत्प्रतिपन्नं तत्पतिकृतमृणं देयम्। यच्च पत्या सह भार्यया ऋणं कृतं तदपि भर्त्रभावे भार्यया अपुत्रया देयम्। यच्च स्वयंकृतं ऋणं तदपि देयम्। ननु 'प्रतिपन्नादि त्रयं स्त्रिया देयमिति न वक्तव्यम्, संदेहाभावात्। उच्यते- 'भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः। यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनम्॥' इति वचनान्निर्धनत्वेन प्रतिपन्नादिष्वदानाशङ्कायामिदमुच्यते प्रतिपन्नं स्त्रिया देयमित्यादि। न चानेन वचनेन स्त्र्यादीनां निर्धनत्वमभिधीयते पारतन्त्र्यमात्र-प्रतिपादनपरत्वात्। एतच्च विभागप्रकरणे स्पष्टीकरिष्यते। 'नान्यत् स्त्री दातुमर्हति' इत्येतत्तर्हि न वक्तव्यम्; विधानेनैवान्यत्र प्रतिषेधसिद्धेः। उच्यते- 'प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत्कृतम्'

इत्येतयोरपवादार्थमुच्यते। अन्यत्सुराकामादिवचनोपात्तं प्रतिपन्नमपि पत्या सह कृतमपि न देयं इति॥

**सारः** - स्त्रिया ज्ञातं पत्या सह वा गृहीतं स्वयं वा कृतमृणं पत्नी प्रदद्यात्। अस्माद्भिन्नमृणां न दद्यात्।

*पुनरपि यद्दणं दातव्यं येन दातव्यं यत्र च काले दातव्यं तत्त्रितयमाह-*

**पितरि प्रोषिते प्रेते व्यसनाभिप्लुतेऽपि वा।**
**पुत्रपौत्रैर्ऋणं देयं निह्नवे साक्षिभावितम्॥ 50॥**

**अन्वयः** - पितरि प्रोषिते प्रेते व्यसनाभिप्लुते अपि वा , निह्नवे साक्षिभावितं ऋणं पुत्रपौत्रैः देयम्।

**व्याख्या** - पितरि - जनके, प्रोषिते - देशान्तरगमने, प्रेते - मृते, व्यसनाभिप्लुते अपि - असाध्यरोगाभिभूतेऽपि, वा - अथवा , निह्नवे - अपलापेऽपि, साक्षिभावितं - साक्ष्यादिप्रमाणप्रमाणितं, ऋणं - उद्धारं पुत्रपौत्रैः - सुततत्सुतैः, देयम् - दातव्यम्।

पितुर्देशान्तरगमने मृते दीर्घासाध्यरोगाभिभूते सति पुत्रैः तत्कृतमृणं देयम्

पिता यदि दातव्यमृणमदत्वा प्रेतः, दूरदेशे गतः अचिकत्सनीयाभिभूतो वा तदा तत्कृतमृणमाख्यापनेऽवश्यं देयं पुत्रेण वा पितृधनाभावेऽपि पुत्रत्वेन पौत्रत्वेन च, तत्र क्रमोऽप्येवमेव । - पित्रभावे पुत्रः, पुत्राभावे पौत्र इति । पुत्रेण पौत्रेण वा निह्नवे कृते अर्थिना साक्षादिभिर्भावितमृणं देयं पुत्रपौत्रैरित्यन्वयः। अत्र 'पितरि प्रोषित' इत्येतावदुक्तम्, कालविशेषस्तु नारदेनोक्तो दृष्टव्यः - 'नार्वाक्संवत्सराद्विंशात्पितरि प्रोषिते सुतः। ऋणं दद्यात्पितृव्ये वा ज्येष्ठे भ्रातर्यथापि वा॥' इति। प्रेतेऽप्यप्राप्तव्यवहारकालो न दद्यात्, प्राप्तव्यवहारकालस्तु दद्यात्। स च कालस्तेनैव दर्शितः गर्भस्थः सदृशो ज्ञेय आष्टमाद्वत्सराच्छिशुः। बाल आषोडशाद्वर्षात्पौगण्डश्चेति शब्द्यते॥ परतो व्यवहारज्ञः स्वतन्त्रः पितरावृते॥' इति। यद्यपि पितृमरणादूर्ध्वं बालोऽपि स्वतन्त्रो जातस्तथापि नर्णभाग्भवति। यथाह

'अप्राप्तव्यवहारश्चेत्स्वतन्त्रोऽपि हि नर्णभाक्। स्वातन्त्र्यं हि स्मृतं ज्येष्ठे ज्यैष्ठ्यं गुणवयःकृतम् ॥' इति । तथा आसेधाह्वाननिषेधश्च दृश्यते- 'अप्राप्तव्यवहारश्च दूतो दानोन्मुखो व्रती। विषमस्थाश्च नासेध्या न चैतानाह्वयेन्नृपः॥' इति। तस्मात् 'अतः पुत्रेण जातेन स्वार्थमुत्सृज्य यत्नतः। ऋणात्पिता मोचनीयो यथा नो नरकं व्रजेत्॥' इति। पुत्रेण व्यवहारज्ञतया जातेन निष्पन्नेनेति व्याख्येयम्। श्राद्धे तु बालस्याप्यधिकारः-' न ब्रह्माभिव्यवहारयेदन्यत्र स्वधानिनयनात्' इति गौतमस्मरणात्। 'पुत्रपौत्रै' रिति बहुवचननिर्देशाद्बहवः पुत्रा यदि विभक्ताः स्वांशानुरूपेण ऋणं दद्युः। अविभक्ताश्चेत्संभूयसमुत्थानेन गुणप्रधानभावेन वर्तमानानां प्रधानभूत एव वा दद्यादिति गम्यते। यथाह नारदः - 'अत ऊर्ध्वं पितुः पुत्रा ऋणं दद्युर्यथांशतः। अविभक्ता विभक्ता वा यस्तां चोद्वहते धुरम्॥' इति। अत्र च यद्यपि 'पुत्रपौत्रैर्ऋणं देयमित्यविशेषेणोक्तं, तथापि पुत्रेण यथा पिता सवृद्धिकं ददाति तथैव देयम्। पौत्रेण तु समं मूलमेव दातव्यं, न वृद्धिरिति विशेषोऽवगन्तव्यः। ऋणमात्मीयवत्पित्र्यं देयं पुत्रैर्विभावितम्। पैतामहं समं देयमदेयं तत्सुतस्य तु॥' इति बृहस्पतिवचनात्। अत्र 'विभावितमित्यविशेषो पादानात् साक्षिविभावितमित्यत्र साक्षिग्रहणं प्रमाणोपलक्षणम्। समं यावद्गृहीतं तावदेव, देयं, न वृद्धिः। तत्सुतस्य प्रपौत्रस्यादेयम-गृहीतधनस्य। एतच्चोत्तरश्लोके स्पष्टीक्रियते॥

तैरपलापेऽपि साक्ष्यादिप्रमाणसाधि-तमृणं तैः दातव्यमेव

**सारः** - पितुर्देशान्तरगमने मृते दीर्घासाध्यरोगाभिभूते सति दातु-मसर्थत्वात् पुत्रैः तत्सुतैर्वा तत्कृतमृणमवश्यं देयम् । तैरपलापेऽपि साक्ष्यादिप्रमाणसाधितमृणं तैः दातव्यमेव।

## Summarised Overview

याज्ञवल्कमुनेः याज्ञवल्यस्मृतौ ऋणदानप्रकरणे वृद्ध्यर्थं धनप्रयोगे प्रतिमासं विशिष्टवृद्धिः धर्मयुक्ता वर्त्तते। ब्राह्मणादिवर्णक्रमानुसारं धनवृद्धिः निर्धारिता अस्ति। अरण्यमार्गेण व्यापारिणः दशप्रतिशतं वृद्धिं, समुद्रमार्गेण व्यापारिणः विंशतिप्रतिशतं वृद्धिं दद्युः। पशुस्त्रीणां सन्ततिः एव वृद्धिः भवति। तैलघृतादीनां वस्त्रधान्यहिरण्यादीनां च निश्चित वृद्धिः अपि अस्ति। धनप्रदायः वृद्ध्यर्थं जातीयवर्णानुसारं नियमबद्धः अस्ति। उत्तमवर्णस्योत्तमर्णः निर्धनेभ्यस्तथा स्वापेक्षया हीनजाति-भ्याश्चाधमर्णेन स्वजात्यनुरूपं कर्म कारयेत्। निर्धनो ब्राह्मणस्तु स्वसमृद्ध्यनुसारं शनैः शनैः ऋणशोधनं कुर्यात्। मद्यपानार्थं स्त्रीव्यसनार्थं कितवार्थं वा गृहीतं दण्डशुल्कावशिष्टं वृथादानं वा पैतृकं धनं पुत्रो न दद्यात्।

पितुः देशान्तरे गमने मृते वा दीर्घरोगे सति धनप्रदानं दातव्यं, यत्र प्रमाणसाक्ष्यद्वारा ऋणं दाप्यम्। अत्र धनप्रयोगे धर्मयुक्तवृद्धिः, जातीयवर्णक्रमानुसारं वृद्धेः व्यवस्था, ऋणसंग्रहणं, मध्यस्थता, कुटुम्बहितमृणं, स्त्रीव्यसनम् आदि विविध विषयाः प्रस्तुताः सन्ति।

## Assignments

**I. वाक्येन वाक्यद्वयेन वा उत्तरयत -**

1. अबन्धकप्रयोगे ब्राह्मणादिभिः कियत् धनं ग्राह्यम्?
2. पशुस्त्रीणां वृद्धिः कीदृशी भवति?
3. बहुषु उत्तमर्णिकेषु युगपत् प्राप्तेषु एकोऽधमर्णिकः केन प्रकारेण दाप्यः?
4. प्रतिपन्नस्य साधितार्थस्य कियन्तमंशं अधमर्णिकात् उत्तमर्णिकात् च राजा भृत्यर्थं गृह्णीयात्?
5. उत्तमर्णः हीनजातिं परिक्षीणं केन प्रकारेण ऋणं ग्राह्यम् ?
6. यदि उत्तमर्णः प्रयुक्तं धनं दीयमानमपि न गृह्णाति तर्हि किं सम्भवति?
7. अविभक्तकुटुम्बप्रधानैः कुटुम्बहितार्थं गृहीतमृणं के दद्युः?
8. अविभक्तकुटुम्बप्रधानैः कुटुम्बहितार्थं गृहीतमृणं गृहीतुर्मृते देशान्तरेगमने वा के प्रदद्युः?
9. प्रतिपन्नं वा पत्या सह यत्कृतं वा स्वयंकृतं यदृणं तस्य परिहारः कीदृशः भवति ?

**II. उत्तरयत -**

1. वृद्धिं सर्वे सर्वासु जातिषु - विशदयत।
2. प्रयुक्तस्य धनस्य ग्रहणधर्मा कीदृशी ?
3. गृहीतृविशेषेण वृद्धेः प्रकाराः के? विशदयत।
4. सबन्धक - अबन्धक धनप्रयोगे प्रतिमासवृद्धिं विशदयत।
5. 'न योषित्पतिपुत्राभ्यां न पुत्रेण कृतं पिता।
   दद्यादृते कुटुम्बार्थान्न पतिः स्त्रीकृतं तथा'॥ - व्याख्यात।
6. 'ऋणं दद्यात्पतिस्तेषां यस्माद्वृत्तितदाश्रया' - विशदयत।
7. याज्ञवल्क्यस्मृतौ व्यवहाराध्याये पुत्रपौत्रैः परिहरणीयां ऋणदेयव्यवस्थां प्रतिपादयत।
8. याज्ञवल्क्यस्मृतौ व्यवहाराध्याये मध्यस्थव्यवस्थाम् अधिकृत्य विवृणुत।

# Suggested Readings


1. Hinduism and Law: An Introduction, Timothy Lubin et. al, Cambridge University
2. Studies in Hindu Law and Dharmaśāstra, Ludo rocher, anthem Press, 2014.


# References


1. श्रीमद् योगीश्वरमहर्षियाज्ञवल्क्यप्रणीता, याज्ञवल्क्यस्मृतिः, व्याहाराधायायः, वायारव्याकारः -डां.कमलनयनशर्मा, राष्ट्रिय-संस्कृतसंस्थानम्-जयपुरम्, 2021
2. Yanjavalkyasmrti or Yogishwara Yanjavalkya with the Mitakshara commentary or Vijnaneswar, Choukhamba sanskrit series office, Varanasi, 1967

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 2

# व्यवहाराध्यायः ऋणादानप्रकरणम् (द्वितीयोऽध्यायः 51-63 श्लोकाः)

## Learning Outcomes

- याज्ञवल्क्यस्मृतौ व्यवहाराध्याये ऋणदानप्रकरणस्य सविशेषज्ञानं लभते।
- पूर्विकाणां धर्मबोधं अवगच्छति।
- समृतीनां मूल्यानां च अवगमनम्।

## Background

याज्ञवल्क्यमुनेः याज्ञवल्क्यस्मृतौ ऋणदानप्रकरणे ऋणदानं सप्तविधम् -ईदृशमृणं देयं, ईदृशमदेयं, अनेनाधिकारिणा देयं, अस्मिन् समये देयं, अनेन प्रकारेण देयं, इत्याद्यादीनि। उत्तमर्णे दानविधिः, आदानविधिश्चेति द्विविधमिति। पूर्वस्मिन् एकके ब्राह्मणादीनां वृद्धेः व्यवस्था, ग्रहीतृविशेषेण वृद्धेः प्रकाराः, अधुना द्रव्यविशेषेण वृद्धिविशेषः तथा अधुना प्रयुक्तस्य द्रव्यस्य वृद्धिग्रहणमन्तरेणापि चिरकालावस्थितस्य कस्य द्रव्यस्य कियती परा वृद्धिः अपेक्षितम्, प्रयुक्तस्य धनस्य ग्रहणधर्मा, बहुषु उत्तमर्णिकेषु युगपत् प्राप्तेषु एकोऽधमर्णिकः केन क्रमेण दाप्यो राज्ञेत्यपेक्षितम्, यदा पुनरुत्तमर्णो दुर्बलः प्रतिपन्नमर्थं धर्मादिरुपायैः साधयितुं अशक्नुवन् राज्ञा साधितार्थे भवति तदाऽधमर्णस्य दण्डमुत्तमर्णस्य च भृत्तिदानं, सधनमधमर्णिकं प्रयुक्तम् निर्धनमधर्णिकं प्रति, मध्यस्थस्थापितं न वर्धते इत्यादिविषयाः उक्ताः। यद्दृणं दातव्यं, येन च दातव्यं, यत्र च काले दातव्यम् इत्यादि विषयाः अपि अधीताः। अस्मिन् एकके कर्त्रान्तरसमवायक्रमः, प्रतिभाव्यं, अधिः इत्यादिविषयाः पश्यामः। तद्वार प्राचिनकालस्य सम्पद्व्यवस्थां अपि अवगन्तुं शक्यते।

## Keywords

रिक्थिनः, प्रातिभाव्यमृणं, दर्शनप्रतिभूः, स्वांशैर्दद्युः, प्रतिभूर्दापितो, स्त्रीपशव्यं, आधिः, चरित्रबन्धककृतम्, स्तेनोऽन्यथा , तिष्ठेदवृद्धिकः।

## Discussion

ऋणापाकरणे ऋणी तत्पुत्रः पौत्र इति त्रयः कर्तारो दर्शितास्तेषां च समवाये क्रमोऽपि दर्शितः। इदानीं कर्त्रन्तरसमवाये च क्रममाह-

**रिक्थग्राह ऋणं दाप्यो योषिद् ग्राहस्तथैव च।**
**पुत्रोऽनन्याश्रितधनः पुत्रहीनस्य रिक्थिनः॥51॥**

**अन्वयः** - रिक्थग्राहः तथैव च योषिद्ग्राहः अनन्याश्रितद्रव्यः पुत्रः पुत्रहीनस्य रिक्थिनः ऋणं दाप्यः।

कर्त्रान्तरसमवाये क्रमः

**व्याख्या** - रिक्थग्राहः - दायहारः, तथैव च - तेनैव प्रकारेण च, योषिद्ग्राहः - पत्नीग्राहः, अनन्याश्रितद्रव्यः - यस्य द्रव्यमनाश्रितं न भवति, पुत्रः - सुतः, पुत्रहीनस्य - सुतरहितस्य, रिक्थिनः - धनहराः, ऋणं - उद्धारः, दाप्यः - देयः।

अन्यदीयं द्रव्यमस्य क्रयादिव्यतिरेकेण यत्स्वीयं भवति तद्रिक्थम्। विभागद्वारेण रिक्थं गृह्णातीति रिक्थग्राहः, ऋणं दाप्यः। एतदुक्तं भवति -'यो यदीयं द्रव्यं रिक्थरूपेण गृह्णाति स तत्कृतमृणं दाप्यो न चौरादिरिति। योषितं भार्यां गृह्णातीति योषिद्ग्राहः स तथैवर्णं दाप्यः। यो यदीयं योषितं गृह्णाति स तत्कृतमृणं दाप्यः। योषितोऽवि-भाज्यद्रव्यत्वेन रिक्थव्यपदेशानर्हत्वाद्भेदेन निर्देशः। पुत्रश्चानन्याश्रि-

यस्य दायं यौ ग्रहिष्यति तस्यर्णमपि स एव दास्यति

तद्रव्य ऋणं दाप्यः, अन्यमाश्रितमन्याश्रितं, अन्याश्रितं मातृपितृसंबन्धि द्रव्यं यस्यासावन्याश्रितद्रव्यः, न अन्याश्रितद्रव्योऽनन्याश्रितद्रव्यः, पुत्रहीनस्य रिक्थिनः ऋणं दाप्य इति संबन्धः । एतेषां समवाये क्रमश्च पाठक्रम एव। 'रिक्थमाह ऋणं दाप्यः, तदभावे योषिद्ग्राहः, तदभावे पुत्र इति। नन्वेतेषां समवाय एव नोपपद्यते; 'न भ्रातरो न पितरः पुत्रा रिक्थहराः पितुः' इति पुत्रे सत्यन्यस्य रिक्थग्रहणासंभवात्। योषिद्ग्राहोऽपि नोपपद्यते; (मनुः ५/१६२) - 'न द्वितीयश्च साध्वीनां क्वचिद्भर्तोपदिश्यते' इति स्मरणात्। तथा तदृणं पुत्रो दाप्य इत्यप्ययुक्तम् 'पुत्रपौत्रैर्ऋणं देयम्' इत्युक्तत्वात्। 'अनन्याश्रितद्रव्य' इति विशेषणमप्यनर्थकम् पुत्रे सति द्रव्यस्यान्याश्रयणासंभवात्, संभवे च रिक्थग्राह इत्यनेनैव गतार्थत्वात्। 'पुत्रहीनस्य रिक्थिनः' इत्येतदपि न वक्तव्यम्। पुत्रे सत्यपि 'रिक्थग्राह ऋणं दाप्यः' इति स्थितम् । असति पुत्रे रिक्थग्राहः सुतरां दाप्य इति सिद्धमेवेति। अत्रोच्यते-पुत्रे सत्यप्यन्यो रिक्थग्राही संभवति; क्लीबान्धबधिरादीनां पुत्रत्वेऽपि रिक्थहरत्वाभावात्। तथा च क्लीबादीननुक्रम्य 'भर्तव्याः स्युर्निरंशकाः' इति वक्ष्यति। तथा 'सवर्णापुत्रोऽप्यन्यायवृत्तिर्न लभेतैकेषाम्' इति गौतमस्मरणात्। अतश्च क्लीबादिषु पुत्रेषु सत्सु अन्यायवृत्ते च सवर्णापुत्रे सति रिक्थग्राही पितृव्यतत्पुत्रादिः। योषिद्ग्राहो यद्यपि शास्त्राविरोधेन न संभवति। तथाप्यतिक्रान्तनिषेधः; पूर्वपतिकृतर्णापाकरणाधिकारी भवत्येव।

यस्य च पत्नी यो ग्रहीष्यति तस्याप्यर्णं स एव दास्यति

योषिद्ग्राहो यश्चतसृणां स्वैरिणीनामन्तिमां गृह्णाति, यश्च पुनर्भुवां तिसृणां प्रथमाम्, यथाह नारदः 'परपूर्वाः स्त्रियस्त्वन्याः सप्त प्रोक्ता यथाक्रमम्। पुनर्भूस्त्रिविधा तासां स्वैरिणी तु चतुर्विधा॥ कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता। पुनर्भूः प्रथमा प्रोक्ता पुनः संस्कारकर्मणा॥ देशधर्मानवेक्ष्य स्त्री गुरुभिर्या प्रदीयते। उत्पन्नसाहसाऽन्यस्मै सा द्वितीया प्रकीर्तिता॥' उत्पन्नसाहसा उत्पन्नव्यभिचारा। 'असत्सु देवरेषु स्त्री बान्धवैर्या प्रदीयते। सवर्णाय

सपिण्डाय सा तृतीया प्रकीर्तिता ॥ श्री प्रसूताऽप्रसूता वा पत्यावेव तु जीवति। कामात्समाश्रयेदन्यं प्रथमा स्वैरिणी तु सा॥ कौमारं पतिमुत्सृज्य या त्वन्यं पुरुषं श्रिता। पुनः पत्युर्गृहं यायात्सा द्वितीया प्रकीर्तिता॥ मृते भर्तरि तु प्राप्तान्देवरादीनपास्य या। उपगच्छेत्परं कामात्सा तृतीया प्रकीर्तिता ॥ प्राप्ता देशाद्धनक्रीता क्षुत्पिपासातुरा च या। तवाहमित्युपगता सा चतुर्थी प्रकीर्तिता ॥ अन्तिमा स्वैरिणीनां या प्रथमा च पुनर्भुवाम्। ऋणं तयोः पतिकृतं दद्याद्यस्तां उपाश्रितः॥' इति। तथाऽन्योऽपि योषिद्ग्राह ऋणापाकरणेऽधिकारी तेनैव दर्शितः- 'या तु सप्रधनैव स्त्री सापत्या वाऽन्यमाश्रयेत्। सोऽस्या दद्यादृणं भर्तुरुत्सृजेद्वा तथैव ताम्॥' प्रकृष्टेन धनेन सह वर्तत इति सप्रधना, बहुधना यावत्। तथा 'अधनस्य ह्यपुत्रस्य मृतस्योपैति यः स्त्रियम्। ऋणं वोढुः स भजते सैव चास्य धनं स्मृतम्॥' इति। पुत्रस्य पुनर्वचनं क्रमार्थम्। 'अनन्याश्रितद्रव्य' इति बहुषु पुत्रेषु रिक्थाभावेऽप्यंश ग्रहणयोग्यस्यैवर्णापाकरणेऽधिकारी नायोग्यस्यान्धादेरित्येवमर्थम्। 'पुत्रहीनस्य रिक्थिन' इत्येतदपि पुत्रपौत्रहीनस्य प्रपौत्रादयो यदि रिक्थं गृह्णन्ति तदा ऋणं दाप्या नान्यथेत्येवमर्थम्। पुत्रपौत्रौ च रिक्थग्रहणाभावेऽपि दाप्यावित्युक्तम्, यथाह नारदः - 'क्रमदव्याहतं प्राप्तं पुत्रैर्यन्नर्णमुद्धृतम्। दद्युः पैतामहं पौत्रास्तच्चतुर्थान्निवर्तते॥' इति सर्वं निरवद्यम्॥ यद्वा, योषिद्ग्राहाभावे पुत्रो दाप्य इत्युक्तम्। पुत्राभावे योषिद्ग्राहो दाप्य इत्युच्यते। 'पुत्रहीनस्य रिक्थिनः' इति 'रिक्थ' शब्देन योषिदेवोच्यते। 'सैव चास्य धनं स्मृतम्' इति स्मरणात्, 'यो यस्य हरते दारान्स तस्य हरते धनम्' इति च॥ ननु योषिद्ग्राहाभावे पुत्र ऋणं दाप्यः, पुत्राभावे योषिद्ग्राह इति परस्परविरुद्धम्। उभयसद्भावे न कश्चिद्दाप्य इति। नैष दोषः; अन्तिमस्वैरिणीग्राहिणः प्रथमपुनर्भूग्राहिणः सप्रधनस्त्रीहारिणश्चाभावे पुत्रो दाप्यः; पुत्राभावे तु निर्धननिरपत्ययोषिद्ग्राही दाप्य इति। एतदेवोक्तं नारदेन - 'धनस्त्रीहारिपुत्राणामृणभाग्यो धनं हरेत्। पुत्रोऽसतोः स्त्रीधनिनोः

अनन्याश्रितद्रव्यस्य मातुः पितुश्चर्णं पुत्रो दास्यति

पुत्रहीनस्य च पुरुषस्य कृतमृणं तद्धनहरो दास्यति

स्त्रीहारी धनिपुत्रयोः। इति। धनस्त्रीहारिपुत्राणां समवाये यो धनं हरेत्स ऋणभाक् पुत्रोऽसतोः स्त्रीधनिनोः स्त्री च धनं च स्त्रीधने ते विद्येते ययोस्तौ श्रीधनिनौ, तयोः स्त्रीधनिनोरसतोः पुत्र एव ऋणभाक् भवति। धनिपुत्रयोरसतोः स्त्रीहार्येवार्णभाक्। स्त्रीहार्यभावे पुत्र ऋणभाक्। पुत्राभावे स्त्रीहारीति विरोधाभासपरिहारः पूर्ववत्। 'पुत्रहीनस्य रिक्थिन इत्यस्य अन्या व्याख्या। एते धनस्त्रीहारिपुत्राः ऋणं कस्य दाप्या इत्यपेक्षायां उत्तमर्णस्य दाप्यास्तदभावे तत्पुत्रादेः पुत्राद्यभावे कस्य दाप्या इत्यपेक्षायामिदमुपतिष्ठते पुत्रहीनस्य रिक्थिन इति। पुत्राद्यन्वयहीनस्य उत्तमर्णस्य यो रिक्थी रिक्थग्रहणयोग्यः सपिण्डादिस्तस्य रिक्थिनो दाप्याः। तथा च नारदेन - 'ब्राह्मणस्य तु यद्देयं सान्वयस्य च नास्ति चेत्। निर्वपेत्तत्सकुल्येषु तद्भावेऽस्य बन्धुषु' ॥' इत्यभिहितम्। 'यदा तु न सकुल्याः स्युर्न च संबन्धि-बान्धवाः। सदा दद्याद् द्विजेभ्यस्तु तेष्वसत्स्वप्सु निक्षिपेत्' ॥ इति॥

**सारः** - यस्य दायं यौ ग्रहिष्यति तस्यर्णमपि स एव दास्यति। यस्य च पत्नी यो ग्रहीष्यति तस्याप्यर्णं स एव दास्यति तथानन्याश्रितद्रव्यस्य मातुः पितुश्चर्णं पुत्रो दास्यति। पुत्रहीनस्य च पुरुषस्य कृतमृणं तद्धनहरो दास्यतीति भावः।

*अधुना पुरुषविशेषे ऋणग्रहणं प्रतिषेधयन्प्रसङ्गादन्यदपि प्रतिषेधति-*

**भ्रातृणामथ दम्पत्योः पितुः पुत्रस्य चैव हि।**
**प्रातिभाव्यमृणं साक्ष्यमविभक्ते न तु स्मृतम्॥52॥**

**अन्वयः** - अविभक्ते भ्रातृणां दम्पत्योः पितुः, पुत्रस्य च प्रातिभाव्यं ऋणं साक्ष्यं न तु स्मृतम्।

**व्याख्या** - अविभक्ते - द्रव्यविभाजनात्प्राक्, भ्रातृणां - सहोदराणां, दम्पत्योः - जायापत्योः, पितुः - जनकस्य, पुत्रस्य च - सुतस्य च, प्रातिभाव्यं - मध्यस्थम्, ऋणं - उद्धारः, साक्ष्यं - साक्षित्वं, न तु - नैव स्मृतम् - प्रतिपादितम्।

प्रतिभाव्यमृणं साक्षित्वञ्च न भवति

प्रतिभुवो भावः प्रातिभाव्यम्, भातृणां दम्पत्योः पितापुत्रयोश्चाविभक्ते द्रव्ये द्रव्यविभागात्प्राक्प्रातिभाव्यमृणं साक्ष्यं च न स्मृतं मन्वादिभिः। अपि तु प्रतिषिद्धं, साधारणधनत्वात्। प्रातिभाव्यसाक्षित्वयोः पक्षे द्रव्यव्ययावसानत्वात्, ऋणस्य चावश्यप्रत्तिदेयत्वात्। एतच्च परस्परानुमतिव्यतिरेकेण, परस्परानुमत्या त्वविभक्तानामपि प्रातिभाव्यादि भवत्येव। विभागादूर्ध्वं तु परस्परानुमतिव्यतिरेकेणापि भवति॥ ननु दम्पत्योर्विभागात्प्रातिभाव्यादि प्रतिषेधो न युज्यते; तयोर्विभागाभावेन विशेषणानर्थक्यात्। विभागाभावश्चापस्तम्बेन दर्शितः - 'जायापत्योर्न विभागो विद्यते' इति। सत्यम्; श्रौतस्मार्ताग्नि-साध्येषु कर्मसु तत्फलेषु च विभागाभावो न पुनः सर्वकर्मसु द्रव्येषु वा। तथा हि जायापत्योर्न विभागो विद्यते' इत्युक्त्वा किमिति न विद्यते इत्यपेक्षायां हेतुमुक्तवान्- 'पाणिग्रहणाद्धि सहत्वं कर्मसु तथा पुण्यफलेषु च' इति। हि यस्मात्पाणिग्रहणादारभ्य कर्मसु सहत्वं श्रूयते- 'जायापती अग्निमादधीयाताम्' इति, तस्मादाधाने सहाधिकारादाधानसिद्धाग्निसाध्येषु कर्मसु सहाधिकारः। तथा 'कर्म स्मार्तं विवाहाग्नौ' इत्यादिस्मरणाद्विवाहसिद्धाग्निसाध्येष्वपि कर्मसु सहाधिकार एव। अतश्चोभयविधाग्निनिरपेक्षेषु कर्मसु पूर्तेषु जायापत्योः पृथगेवाधिकारः संपद्यते। तथा पुण्यानां फलेषु स्वर्गादिषु जायापत्योः सहत्वं श्रूयते- 'दिविज्योतिरजरमारभेताम्' इत्यादि। येषु पुण्यकर्मसु सहाधिकारस्तेषां फलेषु सहत्वमिति बोद्धव्यं, न पुनः पूर्तानां भर्त्रनुज्ञयानुष्ठितानां फलेष्वपि॥ ननु द्रव्यस्वामित्वेऽपि सहत्वमुक्तम् 'द्रव्यपरिग्रहेषु च न हि भर्तुर्विप्रवासे नैमित्तिके दाने स्तेयमुपदिशन्ति' इति। सत्यम्। द्रव्यस्वामित्वं पत्न्या दर्शितमनेन, न पुनर्विभागाभावः। यस्मात् 'द्रव्यपरिग्रहेषु च' इत्युक्त्वा तत्र कारणमुक्तम्- 'भर्तुर्विप्रवासे नैमित्तिकेऽवश्यकर्तव्ये दानेऽतिथि-भोजनभिक्षाप्रदानादौ हि यस्मान्न स्तेयमुपदिशन्ति मन्वादयस्त-स्माद्भार्याया अपि द्रव्यस्वामित्वमस्ति, अन्यथा स्तेयं स्यात्' इति।

तस्मात् भर्तुरिच्छया भार्याया अपि द्रव्यविभागो भवत्येव, न स्वेच्छया। यथा वक्ष्यति- 'यदि कुर्यात्समानंशान्पत्न्यः कार्याः समांशिकाः' इति॥

**सारः** - द्रव्यविभागत्प्राक् सहोदराणां जायापत्योः पितापुत्रयोः परस्परं प्रातिभाव्यमृणं साक्षित्वञ्च न भवतीति भावः।

*अधुना प्रातिभाव्यं निरूपयितुमाह-*

**दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते।**
**आद्यौ तु वितथे दाप्यावितरस्य सुता अपि ॥53॥**

**अन्वयः** - दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते आद्यौ तु वितथे दाप्यौ इतरस्य सुता अपि (दाप्य इत्यर्थः)।

दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते

**व्याख्या** - दर्शने - दर्शनसामर्थ्ये, प्रत्यये - विश्वासे, दाने - प्रतिदानसामर्थ्ये, प्रातिभाव्यं - माध्यस्थ्यं, विधीयते - प्रतिपाद्यते, आद्यौ तु - दर्शनप्रत्ययप्रतिभुवौ तु, वितथे - मिथ्यायां, दाप्यौ - राज्ञा प्रदाप्यौ, इतरस्य - तदुभयभिन्नस्य दानस्य, (वितथे जाते) सुता अपि - पुत्रा अपि (दाप्यः)।

प्रातिभाव्यं नाम विश्वासार्थं पुरुषान्तरेण सह समयः, तच्च विषयभेदात् त्रिधा भिद्यते। यथा दर्शने 'दर्शनापेक्षायां एनं दर्शयिष्यामी'ति। प्रत्यये विश्वासे, 'मत्प्रत्ययेनास्य धनं प्रयच्छ, नायं त्वां वञ्चयिष्यते, यतोऽमुकस्य पुत्रोऽयं, उर्वराप्रायभूरस्य ग्रामवरो वास्ती'ति। दाने 'यद्ययं न ददाति तदानीमहमेव दास्यामी'ति। 'प्रातिभाव्यं विधीयत' इति प्रत्येकं सम्बध्यते। आद्यौ तु दर्शनप्रत्ययप्रतिभुवौ वितथे अन्यथाभावे अदर्शने विश्वासव्यभिचारे च दाप्यौ राज्ञा प्रस्तुतं धनमुत्तमर्णस्य। इतरस्य दानप्रतिभुवः सुता अपि दाप्याः॥ वितथ इत्येव शाठ्येन निर्धनत्वेन वाऽधमर्णेऽप्रतिकुर्वति इतरस्य सुता अपि इति वदता पूर्वयोः सुता न दाप्या इत्युक्तम्। 'सुता' इति वदता न पौत्रा दाप्या इति दर्शितम्॥

**सारः -** दर्शने प्रत्यये दाने च समर्थ एव प्रतिभूः भवितुर्महति। दर्शने प्रत्यये च वितथे (मिथ्यात्वे) सञ्जाते स प्रतिभूरेवोत्तमर्णस्य धनं दास्यति। दानस्य च मिथ्यात्वे प्रतिभूः दास्यति। तस्य च दानासमर्थे तस्य पुत्रा अपि दास्यन्तीति विशेषः।

एतदेव स्पष्टीकर्तुमाह-

**दर्शनप्रतिभूर्यत्र मृतः प्रात्ययिकोऽपि वा।**
**न तत्पुत्रा ऋणं दद्युर्दद्युर्दानाय यः स्थितः॥ 54॥**

दानाय स्थितः प्रतिभूः तस्य पुत्राः ऋणं दद्युः

**अन्वयः -** यत्र दर्शनप्रतिभूः प्रात्ययिकोऽपि वा मृतः (तत्र) तत्पुत्राः ऋणं न दद्युः दानाय यः स्थितः (तस्य पुत्राः) दद्युः।

**व्याख्या** - यत्र - यस्मिन् प्रातिभावे, दर्शनप्रतिभूः - दर्शविषयकः प्रतिभूः, प्रात्ययिकोऽपि - विश्वासविषयकोऽपि लग्नकः, वा - अथवा, मृतः - दिवंगतः (तत्र) तत्पुत्राः - प्रतिभूसुताः, ऋणं - उद्धारं, न - नहि, दद्युः - प्रयच्छेयुः, दानाय - दानविषयकः, यः - लग्नकः, स्थितः - स्वीकृतः, (तत्पुत्राः) दद्युः - प्रयच्छेयुः।

यदा तु दर्शनप्रतिभूः प्रात्ययिको वा प्रतिभूर्दिवं गतस्तदा तयोः पुत्राः प्रातिभाव्यायातं पैतृकमृणं न दद्युः। यस्तु दानाय स्थितः प्रतिभूर्दिवं गतस्तस्य पुत्रा दद्युः न पौत्राः। ते च मूलमेव दद्युर्न वृद्धिम्। 'ऋणं पैतामहं पौत्रः प्रातिभाव्यागतं सुतः। समं दद्यात्तत्सुतौ तु न दाप्याविति निश्चयः॥' इति व्यासवचनात्। प्रातिभाव्यव्यतिरिक्तं पैतामहमृणं पौत्रः सर्वं यावद् गृहीतं तावदेव दद्यान्न वृद्धिम्। तथा तत्सुतोऽपि प्रातिभाव्यागतं पित्र्यमृणं सममेव दद्यात्। तयोः पौत्रपुत्रयोः सुतौ पौत्र प्रपौत्रौ च प्रातिभाव्यायातं अप्रातिभाव्यं च ऋणं यथाक्रममगृहीतधनौ न दाप्याविति। यद्दपि स्मरणम्- 'खादको वित्तहीनः स्याल्लग्नको वित्तवान्यदि। मूलं तस्य भवेद् देयं न वृद्धिं दातुमर्हति' इति। तदपि लग्नकः प्रतिभूः, खादकोऽधमर्णः; लग्नको यदि वित्तवान्मृतस्तदा तस्य पुत्रेण मूलमेव दातव्यं न वृद्धिरिति व्याख्येयम्। यत्र दर्शनप्रतिभूः

प्रत्ययप्रतिभूर्वा बन्धकं पर्याप्तं गृहीत्वा प्रतिभूर्जातस्तत्र तत्पुत्रा अपि तस्मादेव बन्धकात् प्रातिभाव्यायातमृणं दद्युरेव। यथाह कात्यायनः- 'गृहीत्वा बन्धकं यत्र दर्शनेऽस्य स्थितो भवेत्। विना पित्रा धनात्तस्माद्दाप्यः स्यात्तदृणं सुतः॥' इति। दर्शनग्रहणं प्रत्ययस्योपलक्षणम्। विना पित्रा पितरि प्रेते दूरदेशं गते वेति ॥

दर्शनप्रतिभूः प्रत्ययभूः वा दिवंगतः तयोः पुत्राः प्रातिभाव्यमृणं न दद्युः

**सारः** - यदा दर्शनप्रतिभूः प्रत्ययभूः वा दिवंगतः तदा तयोः पुत्राः प्रातिभाव्यनिमित्तिकं पैतृकमृणं न दद्युः। यदि दानाय स्थितः प्रतिभूः दिवं प्रयाति तर्हि तस्य पुत्राः ऋणं दद्युः पौत्राः न प्रयच्छेयुः।

*यस्मिन्ननेकप्रतिभूसम्भवस्तत्र कथं दाप्यस्तत्राह-*

**बहवः स्युर्यदि स्वांशैर्दद्युः प्रतिभुवो धनम्।**
**एकच्छायाश्रितेष्वेषु धनिकस्य यथारुचि ॥ 55॥**

**अन्वयः** - यदि बहवः प्रतिभुवः स्युः (तर्हि) स्वांशैः, धनं दद्युः एषु एकच्छायाश्रितेषु धनिकस्य यथारुचि (धनं दद्युः)

**व्याख्या** - यदि - चेत्, बहवः - अनेके, प्रतिभुवः - लग्नकः, स्युः - भवेयुः, (तर्हि) स्वांशैः - स्वस्वभागैः, धनं द्रव्यं, दद्युः - प्रयच्छेयुः, एषु प्रतिभूषु, एकच्छायाश्रितेषु - एकस्याधमर्णस्य सादृश्यं भजमानाः धनिकस्य - उत्तमर्णस्य, यथारुचि - यथाकामं धनं दद्युः इति।

यदि बहवः प्रतिभुवः स्युः तर्हि स्वांशेन दद्युः

यद्येकस्मिन्प्रयोगे द्वौ बहवो वा प्रतिभुवः स्युस्तदर्णं संविभज्य स्वांशेन दद्युः। एकच्छायाश्रितेषु प्रतिभूषु एकस्याधमर्णस्य छाया सादृश्यं तामाश्रिता एकच्छायाश्रिताः। अधमर्णो यथा कृत्स्नद्रव्यदानाय स्थितस्तथा दाने प्रतिभुवोऽपि प्रत्येकं कृत्स्नद्रव्यदानाय स्थिताः। एवं दर्शने प्रत्यये च। तेष्वेकच्छायाश्रितेषु प्रतिभूषु सत्सु धनिकस्योत्तमर्णस्य यथारुचि यथाकामम्। अतश्च धनिको वित्ताद्यपेक्षायां स्वार्थं सयं प्रार्थयते स एव कृत्स्नं दाप्यो, नांशतः। एकच्छायाश्रितेषु यदि कश्चिद् देशान्तरं गतस्तत्पुत्रश्च संनिहितस्तदा धनिकेच्छया सर्वं दाप्यः।

मृते तु कस्मिंश्चित्तत्सुतः स्वपित्रंशमवृद्धिकं दाप्यः। यथाह कात्यायनः- 'एकच्छायाप्रविष्टानां दाप्यो यस्तत्र दृश्यते। प्रोषिते तत्सुतः सर्वं पित्रंशं तु मृते समम्॥' इति॥

**सारः -** यदि अनेके प्रतिभुवः स्युः तर्हि तदर्णं सम्विभज्य स्वांशेन दद्युः। एकस्य अधमर्णस्य सादृश्यं भजमानेषु धनिकस्य धनं यथाकाममेकोऽपि दद्यात्।

*प्रातिभाव्ये ऋणदानविधिमुक्त्वा प्रतिभूदत्तस्य प्रतिक्रियाविधिमाह -*

**प्रतिभूर्दापितो यत्र प्रकाशं धनिनां धनम्।**
**द्विगुणं प्रतिदातव्यं धनिकैस्तस्य तद्भवेत् ॥56॥**

**अन्वयः** - धनिनां यत् धनं तु प्रतिभूः प्रकाशं दापितः धनिकैः तस्य तत् द्विगुणं प्रतिदातव्यं भवेत्।

अधमर्णैः प्रतिभुवे द्विगुणितं तद्धनं प्रदातव्यम्

**व्याख्या -** यत् - यद्द्रव्यं, प्रतिभूः - लग्नकः, प्रकाशम् - सर्वजनसमक्षं, धनिनः - उत्तमर्णस्य, धनं - द्रव्यं, दापितः - राज्ञा प्रदापितः, धनिकैः - अधमर्णैः, प्रतिभुवे, द्विगुणं - द्विगुणितं, प्रतिदातव्यं - प्रतिदेयं, तद् - तच्च धनं, तस्य - प्रतिभुवः, भवेत् - स्यात्।

यद्द्रव्यं प्रतिभूस्तत्पुत्रो वा धनिकेनोपपीडितः प्रकाशं सर्वजनसमक्षं राज्ञा धनिनो दापितो न पुनर्द्वैगुण्यलोभेन स्वयमुपैत्य दत्तम्। यथाह नारदः- "यं चार्थं प्रतिभूर्दद्याद्धनिकेनोपपीडितः। ऋणिकस्तं प्रतिभुवे द्विगुणं प्रतिदापयेत्॥' इति। ऋणिकैरधमर्णैस्तस्य प्रतिभुवस्तद् द्रव्यं द्विगुणं प्रतिदातव्यं स्यात्। तच्च कालविशेषमनपेक्ष्य सद्य एव द्विगुणं दातव्यम् वचनारम्भसामर्थ्यात्। एतच्च हिरण्यविषयम्। ननु इदं प्रतिभूरिति वचनं द्वैगुण्यमात्रं प्रतिपाद्यति, तच्च पूर्वोक्तकालकल्पक्र- माबाधेनाप्युपपद्यते। यथा जातेष्टिविधानं शुचित्वाबाधेन। अपि च सद्यः सवृद्धिकदानपक्षे पशुस्त्रीणां सद्यः सन्तत्यभावान्मूल्यदानमेव प्राप्नोतीति, तदसत्; "वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा परा' इत्यनेनैव कालकल्पक्रमेण द्वैगुण्यादिसिद्धेः।

द्वैगुण्यमात्रविधाने चेदं वचनमनर्थकं स्यात्। पशुस्त्रीणां तु कालक्रमपक्षेऽपि सन्तत्यभावे स्वरूपदानमेव। यदा प्रतिभूरपि द्रव्यदानानन्तरं कियतापि कालेना- धमर्णेन संघटते तदा सन्ततिरपि संभवत्येव। यद्वा पूर्वसिद्धसन्तत्या सह पशुस्त्रियो दास्यन्तीति न किंचिदेतत्। अथ प्रातिभाव्यं प्रीतिकृतम्, अतश्च प्रतिभुवा दत्तं प्रीतिदत्तमेव। नच प्रीतिदत्तस्य याचनात् प्राग्वृद्धिरस्ति; यथाह- (नारदः) - 'प्रीतिदत्तं तु यत्किञ्चिद्वर्धते न त्वयाचितम्। याच्यमानमदत्तं चेद्वर्धते पञ्चकं शतम्॥' इति। अतश्चा प्रीतिदत्तस्यायाचितस्यापि दानदिवसादारभ्य यावद् द्विगुणं कालक्रमेण वृद्धिरित्यनेन वचनेनोच्यत इति, तदप्यसत्, अस्यार्थस्यास्माद्वचनादप्रतीतेः 'द्विगुणं प्रतिदातव्यम्' इत्येतावदिह प्रतीयते। तस्मात्कालक्रममनपेक्ष्यैव द्विगुणं प्रतिदातव्यं वचनारम्भसामर्थ्यादिति सुष्ठूक्तम्॥

**सारः** - उत्तमर्णेनोपपीडितः सन् राज्ञा धनिकाय प्रतिभुवः धनं प्रदापितम्। ततश्च अधमर्णैः प्रतिभुवे द्विगुणितं तद्धनं प्रदातव्यम्। तच्चाधिकं धनं तस्यैव प्रतिभुवः स्यादिति।

प्रतिभूदत्तस्य सर्वत्र द्वैगुण्ये प्राप्तेऽपवादमाह -

**ससन्तति स्त्रीपशुषु धान्यं त्रिगुणमेव च।**
**वस्त्रं चतुर्गुणं प्रोक्तं रसश्चाष्टगुणाः स्मृताः॥57॥**

स्त्रीत्वविशिष्टायाः पशोः सन्ततिरेव वृद्धिः

**अन्वयः** - स्त्रीपशुषु सन्ततिः एव धान्यं त्रिगुणं एव च, वस्त्रं चतुर्गुणं प्रोक्तम् तथा रसश्चाष्टगुणः (प्रोक्ताः)।

**व्याख्या** - स्त्रीपशुषु - स्त्रीत्वविशिष्टपशुषु, सन्ततिः एव - सन्तान एव (वृद्धिः), धान्यं च - अन्नादिकञ्च, त्रिगुणं एव - त्रैगुण्यमेव, (वर्धते), वस्त्रं - वसनं, चतुर्गुणं - चतुर्गुणितं, प्रोक्तम् - कथितं, तथा - तथैव, रसः - घृतादिः, अष्टगुणः - अष्टगुणितः प्रोक्ताः इति।

हिरण्यद्वैगुण्यवत्कालानादरेणैव स्त्रीपश्वादयः प्रतिपादितवृद्ध्या दाप्याः। श्लोकस्तु व्याख्यात एव। यस्य द्रव्यस्य यावती वृद्धिः पराकाष्ठोक्ता तद्रव्यं प्रतिभूदत्तं खादकेन तया वृद्ध्या सह कालविशेषमनपेक्षैव सद्यो दातव्यमिति तात्पर्यार्थः। यदा तु दर्शनप्रतिभूः संप्रतिपन्ने काले अधमर्णे दर्शयितुमसमर्थस्तदा तदन्वेषणाय तस्य पक्षत्रयं दातव्यम्। तत्र यदि तं दर्शयति तदा भोक्तव्योऽन्यथा प्रस्तुतं धनं दाप्यः; 'नष्टस्यान्वेषणार्थं तु दाप्यं पक्षत्रयं परम्। यद्यसौ दर्शयेत्तत्र मोक्तव्यः प्रतिभूर्भवेत्॥ काले व्यतीते प्रतिभूर्यदि तं नैव दर्शयेत्। निबन्धं दापयेत्तं तु प्रेते चैष विधिः स्मृतः॥' इति कात्यायनवचनात्। लग्नके विशेषनिषेधश्च तेनैवोक्तः 'न स्वामी न च वै शत्रुः स्वामिनाधिकृतस्तथा। निरुद्धो दण्डितश्चैव संदिग्धश्चैव न क्वचित्॥ नैव रिक्थी न मित्रं च न चैवात्यन्तवासिनः। राजकार्यनियुक्ताश्च ये च प्रवजिता नराः॥ न शक्तो धनिने दातुं दण्डं राज्ञे च तत्समम्। जीवन्वापि पिता यस्य तथैवेच्छाप्रवर्तकः॥ नाविज्ञातो ग्रहीतव्यः प्रतिभूः स्वक्रियां प्रति॥' इति। सन्दिग्धोऽभिशस्तः। अत्यन्तवासिनो नैष्ठिकब्रह्मचारिणः॥ स इति प्रतिभूविधिः॥

वस्त्रञ्च चतुर्गुणं तथा रसानां अष्टगुणं यावात् वृद्धिः भवति

धनप्रयोगे द्वौ विश्वासहेतू प्रतिभूराधिश्च। यथाह नारदः - 'विश्रम्भहेतू द्वावत्र प्रतिभूराधिरेव च' इति। तत्र प्रतिभूर्निरूपितः, इदानीमाधिर्निरूप्यते। आधिर्नाम गृहीतस्य द्रव्यस्योपरि विश्वासार्थमधमर्णेनोत्तमर्णोऽधिक्रियते, आधीयते इत्याधिः। स च द्विविधः कृतकालोऽकृतकालश्च। पुनश्चैकैकशो द्विविधः- गोप्यो भोग्यश्च। यथाह नारदः -'अधिक्रियते इत्याधिः स विज्ञेयो द्विलक्षणः। कृतकालोऽपनेयश्च यावद्देयोद्यतस्तथा॥ स पुनर्द्विविधः प्रोक्तो गोप्यो भोग्यस्तथैव च॥' इति। कृतकाल अधानकाल एवामुष्मिन्काले दीपोत्सवादौ मयायमाधमाधिर्मोक्तव्योऽन्यथा तवैवाधिर्भविष्यती'त्येवं निश्चिते काले उपनेय आत्मसमीपं नेतव्यः, मोचनीय इत्यर्थः। देयं

दानम्। देयमनतिक्रम्य यावद् देयम्। उद्यतः नियतः, स्थापित इत्यर्थः। यावद् देयमुद्यतो यावद्देयोद्यतः, गृहीत धनप्रत्यर्पणावधिरनिरूपितकाल इत्यर्थः। गोप्यो रक्षणीयः॥

**सारः -** स्त्रीत्वविशिष्टायाः पशोः सन्ततिरेव वृद्धिः भवति। धान्यञ्च त्रैगुण्यं यावत् वर्धते। वस्त्रञ्च चतुर्गुणं तथा रसानां अष्टगुणं यावात् वृद्धिः भवति। एवं चतुर्विधस्याधेर्विशेषमाह -

**आधिः प्रणश्येद् द्विगुणे धने यदि न मोक्ष्यते।**
**काले कालकृतो नश्येत्फलभोग्यो न नश्यति॥58॥**

**अन्वयः -** धने द्विगुणे यदि न मोक्ष्यते आधिः प्रणश्येत् कालकृतः काले नश्येत् फलभोग्यः न नश्यति।

**व्याख्या -** धने - वृद्ध्यर्थं प्रयुक्ते द्रव्ये, द्विगुणे - द्विगुणिते, जाते यदि - चेत् न - नहि, मोक्ष्यते - द्रव्यदानेन स्वयत्तीकरोति, तर्हि, आधिः - बन्धकः, प्रणश्येत् - नष्टो भवेत्, कालकृतः - निश्चितकालः, काले - निश्चितसमये, नश्येत् - प्रणश्येत्, फलभोग्यः - तदुत्पन्नं फलं भोग्यं यस्यासौ फलभोग्यः (आधिः), न - नहि, नश्यति - प्रणश्यति।

फलभोग्यश्चाधिर्न नश्यती

प्रयुक्ते धने स्वकृतया वृद्ध्या कालक्रमेण द्विगुणीभूते यद्याधिरधर्मेण द्रव्यदानेन न मोक्ष्यते तदा नश्यति। अधमर्णस्य धने प्रयोक्तुः स्वं भवति। कालकृतः कृतकालः, आहिताग्न्यादिषु पाठात् कालशब्दस्य पूर्वनिपातः। स तु काले निरूपिते प्राप्ते नश्येत् द्वैगुण्यात् प्रागूर्ध्वं वा। फलभोग्यः फलं भोग्यं यस्यासौ फलभोग्यः, क्षेत्रारामादिः, स कदाचिदपि न नश्यति। कृतकालस्य गोप्यस्य भोगस्य च तत्कालातिक्रमे नाश उक्तः 'काले कालकृतो नश्ये'दिति। अकृतकालस्य भोग्यस्य नाशाभाव उक्तः 'फलभोग्यो न नश्यती'ति। पारिशेप्यादाधिः प्रणश्येदिश्येतदकृतकालगोप्याधिविषयमवतिष्ठते। द्वैगुण्यातिक्रमेण निरूपितकालातिक्रमेण च विनाशे चतुर्दश-

दिवसप्रतीक्षणं कर्तव्यं, बृहस्पतिवचनात् - 'हिरण्ये द्विगुणीभूते पूर्ण काले कृतावधेः। बन्धकस्य धनी स्वामी द्विसप्ताहं प्रतीक्ष्य च ॥ तदन्तरा धनं दत्त्वा ऋणी बन्धमवाप्नुयात् ॥' इति ॥ नन्वाधिः प्रणश्येदित्यनुपपन्नम्। अधमर्णस्य स्वत्वनिवृत्तिहेतोर्दानविक्रयादेः अभावात्। धनिनश्च स्वत्वहेतोः प्रतिग्रहक्रयादेरभावात् मनुवचनविरोधाच्च। - 'न चाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः' इति। कालेन संरोधः कालसंरोधश्चिरकालमवस्थानं तस्मात्काल-संरोधाच्चिरकालावस्थानादाधेर्न निसर्गोऽस्ति, नान्यत्राधीकरणमस्ति, न च विक्रयः। एवामाधीकरणविक्रय प्रतिषेधात् धनिनः स्वत्वाभावोऽवगम्यत इति। उच्यते- आधीकरणमेव लोके सोपाधिकस्वत्वनिवृत्तिहेतुः। आधिस्वीकारश्च सोपाधिकस्वत्वापत्ति-हेतुः प्रसिद्धः। तत्र धनद्वैगुण्ये निरूपितकालप्राप्तौ च द्रव्यदानस्यात्यन्तनिवृत्तेरनेन वचनेनाधमर्णस्यात्यन्तिकी स्वत्व-निवृत्तिः उत्तमर्णस्य चात्यन्तिकं स्वत्वं भवति। न च मनुवचनविरोधः। यतः मनुः - 'न त्वेवाधौ सोपकारे कौसीदीं वृद्धिमाप्नुयात्' इति। भोग्याधिं प्रस्तुत्येदमुच्यते- 'न चाधेः कालसंरोधाग्निसर्गोऽस्ति न विक्रयः' इति। भोग्यस्याधेश्चिर कालावस्थानेऽप्याधीकरण-विक्रयनिषेधेन धनिनः स्वत्वं नास्तीति । इहाप्युक्तं 'फलभोग्यो न नश्यती'ति। गोप्याधौ तु पृथगारब्धं मनुना - 'न भोक्तव्यो बलादाधिर्भुञ्जानो वृद्धिमुत्सृजेत्' इति।

**सारः -** प्रयुक्ते धने वृद्ध्या द्विगुणिते जाते सत्यपि यद्यधमर्णो द्रव्यदानेन न मोचयति तर्हि स आधिः नश्यति। कालकृतश्च आधिः निश्चिते समये नश्यति। फलभोग्यश्चाधिर्न नश्यतीति स्थितिः।

*इहापि वक्ष्यते– गोप्याधिभोगे नो वृद्धिरिति। 'आधिः प्रणश्येद् द्विगुणे इति तु गोप्याधिं प्रत्युच्यत इति सर्वमविरुद्धम् ॥*

**गोप्याधिभोगे नो वृद्धिः सोपकारेऽथ हापिते।**
**नष्टो देयो विनष्टश्च दैवराजकृताद्दते ॥59॥**

**अन्वयः** - गोप्याधिभोगे सोपकारे च हापिते नो वृद्धिः। दैवराजकृतात् ऋते नष्टो विनष्टश्च देयः।

**व्याख्या** - गोप्याधिभोगे - गोप्यबन्धकोपभोगे, सोपकारे च - उपकारकारिणि भोग्याधौ च, हापिते - व्यवहाराक्षमत्वे प्राप्ते, नो - नहि, वृद्धिः - कुसीदः, दैवराजकृतात् - दैवराजसम्पादितात्, ऋते - विना, नष्टः - विकृतिंगतः, विनष्टश्च - अत्यन्तो नष्टश्च, देयः - दातव्यः। गोप्याधेस्ताम्रकटाहादेरुपभोगे न वृद्धिर्भवति। अल्पेऽव्युपभोगे महत्यपि वृद्धिर्हातव्या समयातिक्रमात्। तथा सोपकारे उपकारकारिणि बलीवर्दताम्रकटाहादौ भोग्याधौ सवृद्धिके हापिते हानिं व्यवहाराक्षमत्वं गमिते नो वृद्धिः इति संबन्धः। नष्टो विकृतिं गतः ताम्रकटाहादिश्छिद्रभेदनादिना पूर्ववत्कृत्वा देयः। तत्र गोप्याधिर्नष्टश्चेत्पूर्ववरकृत्वा देयः। उपभुक्तोऽपि चेद् वृद्धिरपि हातव्या। भोग्याधिर्यदि 'नष्टस्तदा पूर्ववत्कृत्वा देयः। वृद्धिसद्भावे वृद्धिरपि हातव्या। विनष्ट आत्यन्तिकं नाशं प्राप्तः, सोऽपि देयो मूल्यादिद्वारेण। तद्दाने सवृद्धिकं मूल्यं लभते धनी। यदा न ददाति तदा मूलनाशः– 'विनष्टे मूलनाशः स्याद्दैवराजकृताद्दते' इति नारदवचनात्। दैवराजकृताद्दते दैवमग्न्युदकदेशोपप्लवादि। दैवकृताद्विनाशाद्विना, तथा स्वापराधरहिताद्राजकृतात्। दैवराजकृते तु विनाशे सवृद्धिके मूल्यं दातव्यमधमर्णेनाध्यन्तरं वा। यथाह- 'स्रोतसापहते क्षेत्रे राज्ञा चैवावहारिते। आधिरन्योऽथ कर्तव्यो देयं वा धनिने धनम् ॥' इति।

सोपकारे बलीवर्दादौ व्यावहाराक्षमत्वे च जाते वृद्धिः न भवति

**सारः** - गोप्याधेरुपभोगेन सोपकारे बलीवर्दादौ व्यावहाराक्षमत्वे च जाते वृद्धिः न भवति। दैवात् राजकृताद् वा व्यवहारात् नष्टे विनष्टे वा आधिः देयः।

तत्र 'स्रोतसापहृत' इति दैवकृतोपलक्षणम्॥

**आधेः स्वीकरणात्सिद्धी रक्ष्यमाणोऽप्यसारताम्।**
**यातश्चेदन्य आधेयो धनभाग्वा धनी भवेत्॥ ६०॥**

**अन्वयः -** आधेः स्वीकरणात् सिद्धिः। रक्ष्यमाणोऽपि असारतां यातः चेत् अन्यः आधेयः वा धनी धनभाग् भवेत्।

बन्धकोपभोगमात्रेणै - वाधिग्रहणस्य सिद्धिः भवति

**व्याख्या -** आधेः - बन्धकस्य स्वीकरणात् - उपभोगात्, सिद्धिः - आधिग्रहणसम्पन्नता (भवति)। रक्ष्यमाणोऽपि - संरक्ष्यमाणोऽपि असारतां - कालवशान्निः, यातः - गतः, चेत् - यदि, अन्यः - अपरः, आधेयः - आधित्वेन, रक्षणीयः, वा - अथवा, धनी - उत्तमर्णः, धनभाग् - धनग्रहणधिकारि, भवेत् - स्यादिति।

अपि च, आधेर्भोग्यस्य गोप्यस्य च स्वीकरणादुपभोगा-दाधिग्रहण- सिद्धिर्भवति, न साक्षिलेख्यमात्रेण नाप्युद्देशमात्रेण। यथाह नारदः - 'आधिस्तु द्विविधः प्रोक्तो जङ्गमः स्थावरस्तथा। सिद्धिरस्योभयस्यापि भोगो यद्यस्ति नान्यथा ॥' इति। अस्य च फलम्–'आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा' इति। या स्वीकारान्ता क्रिया सा पूर्वा बलवती, स्वीकाररहिता तु पूर्वापि न बलवतीति। स चाधिः प्रयत्नेन रक्ष्यमाणोऽपि कालवशेन यद्यसारतामविकृत एव सवृद्धिकमूल्य- द्रव्यापर्याप्ततां गतस्तदाधिरन्यः कर्तव्यः, धनिने धनं वा देयम्। 'रक्ष्यमाणोऽप्यसारताम्' इति वदता आधिः प्रयत्नेन रक्षणीयो धनिनेति ज्ञापितम्।

**सारः -** बन्धकोपभोगमात्रेणैवाधिग्रहणस्य सिद्धिः भवति। सप्रयत्नः रक्ष्यमाणोऽपि यदि बन्धको निःसरतां गच्छति कालवशेन तर्हि आधेः योऽन्यः अथवा धनिने धनं देयमिति भावः।

*आधिः प्रणश्येद् द्विगुणे' इत्यस्यापवादमाह -*

**चरित्रबन्धककृतं स वृद्ध्या दापयेद्धनम्।**

**सत्यङ्कारकृतं द्रव्यं द्विगुणं प्रतिदापयेत् ॥ 61 ॥**

**अन्वयः -** चरित्रबन्धककृतं सः वृद्ध्या धनं दापयेत् सत्यंकारकृतं द्रव्यं (व्यवस्थाभङ्गे) द्विगुणं प्रतिदापयेत्।

सत्यकारकृतश्च धनं पूर्वव्यवस्थाभङ्गे सति द्विगुणितं प्रतिदापयेत्

**व्याख्या -** चरित्रबन्धककृतं - चरित्रेण बन्धकं कृतं धनं, सः - राजा, वृद्ध्या - वर्द्धितधनेन सह, धनं - मूलद्रव्यं, प्रदापयेत् - धनिने दापयेत्। सत्यंकारकृतं - सत्यंकारेण कृतं, द्रव्यं धनं, (व्यवस्थाभङ्गे) द्विगुणं - द्विगुणितं, प्रतिदापयेत् - प्रतिपादयेत्।

चरित्रं शोभनाचरितं चरित्रेण बन्धकं चरित्रवन्धकं तेन यद् द्रव्यमात्मसात्कृतं पराधीनं वा कृतम्। एतदुक्तं भवति - धनिनः स्वच्छाशयत्वेन बहुमूल्यमपि द्रव्यमाधीकृत्याधमर्णेनाल्पमेव द्रव्यमात्मसात्कृतम्, यदि वाधमर्णस्य स्वच्छाशयत्वेनाल्पं मूल्यमाधिं गृहीत्वा बहुद्रव्यमेव धनिनाऽधमर्णाधीनं कृतमिति। तद्धनं स नृपो वृद्ध्या सह दापयेत्। अयमाशयः - एवं च बन्धकं द्विगुणीभूतेऽपि द्रव्ये न नश्यति, किन्तु द्रव्यमेव द्विगुणं दातव्यमिति। तथा सत्यङ्कारकृतम्। करणं कारः। सत्यस्य कारः सत्यकारः - सत्यङ्कारेण कृतं सत्यङ्कारकृतम्। अयमभिसन्धिः- यदा बन्धकार्पणसमय एवेत्थं परिभाषितं द्विगुणीभूतेऽपि द्रव्ये मया द्विगुणं द्रव्यमेव दातव्यं नाधिनाशः इति, तदा तद् द्विगुणं दापयेदिति। अन्योऽर्थः। चरित्रमेव बन्धकं चरित्रबन्धकं। चरित्रशब्देन गङ्गास्नानाग्निहोत्रादिजनितमपूर्वमुच्यते। यत्र तदेवाधीकृत्य यद्रव्यमात्मसात्कृतं तत्र तदेव द्विगुणीभूतं दातव्यम्, नाधिनाश इति। आधिप्रसङ्गादन्यदुच्यते सत्यङ्कारकृतमिति। क्रयविक्रयादिव्यवस्थानिर्वाहाय यदङ्गुलीयकादि परहस्ते कृतं तद्व्यवस्थातिक्रमे द्विगुणं दातव्यम्। तत्रापि येनाङ्गुलीयकाद्यर्पितं स एव चेद् व्यवस्थातिवर्ती तेन

तदेव दातव्यम्। "इतरश्चेद् व्यवस्थातिवर्ती तदा तदेवाङ्गुलीयकादि द्विगुणं प्रतिदानवेदिति॥

**सारः** - चरित्रबन्धकृतं धनं सवृद्धिकं धनिने प्रतिपादयेत् नृपः । सत्यकारकृतश्च धनं पूर्वव्यवस्थाभङ्गे सति द्विगुणितं प्रतिदापयेत् इत्यर्थः।

**उपस्थितस्य मोक्तव्य आधिः स्तेनोऽन्यथा भवेत्।**
**प्रयोजकेऽसति धनं कुलेऽन्यस्याधिमाप्नुयात्॥ 62 ॥**

**अन्वयः -** उपस्थितस्य आधिः मोक्तव्यः अन्यथा स्तेनः भवेत्। असति प्रयोजके कुले धनं न्यस्य आधिम् आप्नुयात्।

धनं दत्वाधिमोक्षणाय उपस्थितस्याधमर्णस्य आधिः मोक्तव्यः

**व्याख्या -** उपस्थितस्य - धनदानेनाधिमोक्षणाय समागतस्याधमर्णस्य आधिः - बन्धकः, मोक्तव्यः - मोक्षणीयः, अन्यथा - मोक्षणाभावे, उत्तमर्णः स्तेनः - चौरः, भवेत् - स्यात्। असति - अविद्यमाने, प्रयोजके - धनप्रोक्तरि, कुले - धनिकस्य वंशे, धनं - द्रव्यं, न्यस्य - रक्षित्वा, आधिम् - बन्धकं, आप्नुयात् - प्राप्नुयात् इति।

किंच, धनदानेनाधिमोक्षणायोपस्थितस्याधिर्मोक्तव्यो धनिना, न वृद्धिलोभेन स्थापयितव्यः, अन्यथा अमोक्षणे स्तेनश्चौरवद्दण्ड्यः भवेत्। असंनिहिते पुनः प्रयोक्तरि कुले तदाप्यहस्ते सवृद्धिकं धनं विधायाधमर्णकः स्वीयं बन्धकं गृह्णीयात्॥

**सारः** - धनं दत्वाधिमोक्षणायोपस्थितस्याधमर्णस्याधिः मोक्तव्यो धनिना अन्यथोत्तमर्णश्चौरो भविष्यति । धनप्रोक्तर्यविद्यमाने सति तत्कुलेऽप्त पुरुषहस्ते धनं दत्वाधिमाप्नुयादिति।

*अथ प्रयोक्ताऽप्यसंनिहितस्तदाप्ताश्च धनस्य ग्रहीतारो न सन्ति, यदि वा असंनिहिते प्रयोक्तर्याधिविक्रयेण धनादित्साधमर्णस्य तत्र किं कर्तव्यमित्यपेक्षित आह-*

**तत्कालकृतमूल्यो वा तत्र तिष्ठेदवृद्धिकः।**

**अन्वयः -** वा तत्कालकृतमूल्यः (आधिः) तत्र अवृद्धिकः तिष्ठेत्।

**व्याख्या -** वा - अथवा, तत्कालकृतमूल्यः - तस्मिन् काले आधेः मूल्यं परिकल्प्य, तत्र - धनिनि, अवृद्धिकः - वृद्धिरहितः, तिष्ठेत् - स्थापयेत्। तस्मिन्काले यत्तस्याधेर्मूल्यं तत्परिकल्प्य तत्रैव धनिनि तमाधिं वृद्धिरहितं स्थापयेन्न तत ऊर्ध्वं विवर्धते। यावद्धनी धनं गृहीत्वा तमाधिं मुञ्चति, यावद्वा तन्मूल्यद्रव्यमृणे प्रवेशयति॥

तस्मिन् काले आधेः मूल्यं परिकल्प्य तस्मिन्नेव धनिनि वृद्धिरहितं संस्थापयेत्

**सारः -** तस्मिन् काले आधेः मूल्यं परिकल्प्य तस्मिन्नेव धनिनि वृद्धिरहितं संस्थापयेत् इत्यर्थः।

यदा तु द्विगुणीभूतेऽपि धने द्विगुणं धनमेव ग्रहीतव्यं, न त्वाधिनाश इति विचारितमृणग्रहणकाल एव तदा द्विगुणीभूते द्रव्ये असंनिहिते चाऽधमर्णे धनिना किं कर्तव्यमित्यत आह-

**विना धारणकाद्वापि विक्रीणीत ससाक्षिकम्॥63॥**

**अन्वयः -** धारणकात् विनापि ससाक्षिकं विक्रीणीत।

**व्याख्या -** धारणकात् - अधमर्णात्, विनापि - ऋते अपि, ससाक्षिकं - साक्षिसमक्षं, विक्रीणीत - विक्रयं कुर्यात्।

साक्षिभिस्तदाप्तपुरुषैश्च सहाधिं विक्रियाधमर्णो धनं गृह्णीयात्

धारणकादधर्मणाद्विना अधमर्णेऽसंनिहिते साक्षिभिस्तदाप्तैश्च सह तमाधिं विक्रीय तद्धनं गृह्णीयाद्धनी। 'वा' शब्दो व्यवस्थितविकल्पार्थः। यदृणग्रहणकाले द्विगुणीभूतेऽपि धने धनमेव ग्रहीतव्यं, न त्वाधिनाश इति न विचारितं, तदा 'आधिः प्रणश्येद् द्विगुणे' इत्याधिनाशः। विचारिते त्वयं पक्ष इति॥

**सारः -** अधमर्णेऽसन्निहितेऽपि साक्षिभिस्तदाप्तपुरुषैश्च सहाधिं विक्रियाधमर्णो धनं गृह्णीयात्।

# Summarised Overview

याज्ञवल्क्यसमृतौ व्यवहाराध्याये ऋणं, प्रतिभूः, आधिः, तथा तद्विषये विधिविधानानि च प्रतिपादयति। यः दायं स्वीकुर्यात्, स एव तस्माद्बन्धुना कृतं ऋणं दातव्यम्। यः पत्नीं गृह्णाति, तस्यापि ऋणं दातव्यम्। मातुः पितुश्च द्रव्ये पुत्रः ऋणं दद्यात्, किन्तु पुत्रहीनस्य ऋणं तद्धनहरः दद्यात्। द्रव्यविभागात्पूर्वं सहोदराणां, पितापुत्रयोः वा, परस्परं प्रातिभाव्यमृणं न साक्षित्वं भवति। प्रतिभूः समर्थः एव स्यात् दर्शने, प्रत्यये, दाने च। मिथ्यादर्शने वा प्रत्यये जाते, प्रतिभूरेव धनं दद्यात्। प्रतिभूः दानाय स्थितः म्रियते चेत्, तस्य पुत्राः ऋणं दद्युः , पौत्रा न। अनेके प्रतिभवः सन्ति चेत्, तदृणं विभज्य दद्युः। उत्तमर्णेन पीडितः प्रतिभूः यदि राज्ञा धनं दत्तः, तर्हि अधमर्णैः द्विगुणं दातव्यम्। स्त्रीपशोः संतानवृद्धिः एव लाभः। धान्यं त्रैगुण्यं, वस्त्रं चतुर्गुणं, रसायः अष्टगुणं यावत् वर्धते। वृद्ध्या द्विगुणेऽपि धने अधमर्णो द्रव्यदानेन न मोचयति तर्हि, आधिः नश्यति। कालसीमातीते कालकृतोऽपि आधिः लुप्यते। किन्तु फलभोग्याधिः न लुप्यते। गोप्याधिः बलवतः उपभोगाय स्यात्, वृद्धिर्न भवति। दैवेन वा राजाज्ञया नष्टे आधिः देयः। बन्धकोपभोगमात्रेण आधिग्रहणं सिद्धम्। चरित्रबन्धकं धनं सवृद्धिकं धनिने प्रतिपादयेत् नृपः। सत्यकारकृतं धनं, व्यवस्थाभङ्गे द्विगुणितं दापयेत्। अधमर्णः धनं दत्वा आधिमोक्षणं याचते अन्यथा उत्तमर्णः चौरः स्यात्। धनप्रोक्ता यः अभावे कुलगताप्तपुरुषं प्रति अधिं स्थापयेत्। तत्काले तस्य मूल्यं निर्धृत्य वृद्धिरहितं स्थापनम्। साक्षिभिः सह विक्रयेऽपि उत्तमर्णं धनं गृह्णीयात्।

# Assignments

I. **वाक्येन वाक्यद्वयेन वा उत्तरयत -**

1. पुत्रहीनस्य पुरुषस्य कृतमृणं कः दाप्यः?
2. प्रतिभूः कः?
3. कः प्रतिभूः भवितुमर्हति?
4. दानाय स्थितः प्रतिभूः दिवं याति तर्हि के ऋणं दद्युः?

5. धनिनः यत् धनं तु प्रतिभूः प्रकाशं दापितः ऋणिकैः कियती धनं प्रतिदातव्यं भवेत् ?
6. याज्ञवल्क्येन आधयः कतिधा उक्ता?
7. सत्यकारकृतं धनं कियती प्रतिदापयेत्?

II. **उत्तरयत -**

1. भ्रातृणामथ दम्पत्योः पितुः पुत्रस्य चैव हि।
   प्रातिभाव्यमृणं साक्ष्यमविभक्ते न तु स्मृतम्॥ - व्याख्यात।
2. प्रातिभाव्ये ऋणदानविधिं विशदयत।
3. रिक्थग्राह ऋणं दाप्यो योषिद् ग्राहस्तथैव च।
   पुत्रोऽनन्याश्रितधनः पुत्रहीनस्य रिक्थिनः॥ - व्याख्यात।
4. आधिः प्रणश्येद् द्विगुणे धने यदि न मोक्ष्यते।
   काले कालकृतो नश्येत्फलभोग्यो न नश्यति॥ व्याख्यात।
5. प्रयोक्ता अपि असंनिहितः तदाप्ताश्च धनस्य ग्रहीतारो न सन्ति, यदि वा असंनिहिते प्रयोक्तव्यः आधिविक्रयेण धनदिसाऽधमर्णस्य तत्र किं कर्तव्यम्? विशदयत।
6. ऋणापाकरणे ऋणी तत्पुत्रः पौत्रः इति त्रयः कर्तारो दर्शिताः तेषां च समवायक्रमं प्रदर्शयत।
7. याज्ञवल्क्यस्मृत्यनुसारं प्रातिभाव्यं निरूपयत।
8. याज्ञवल्क्यस्मृत्यनुसारं आधिं स्पष्टयत।

## Suggested Readings


1. Hinduism and Law: An Introduction, Timothy Lubin et. al, Cambridge University
2. Studies in Hindu Law and Dharmaśāstra, Ludo rocher, anthem Press, 2014.


## References

1. श्रीमद् योगीश्वरमहर्षियाज्ञवल्क्यप्रणीता, याज्ञवल्क्यस्मृतिः, व्वाहाराधायायः, वायारव्याकारः -डां.कमलनयनशर्मा, राष्ट्रिय-संस्कृतसंस्थानम्-जयपुरम्, 2021
2. Yanjavalkyasmrti or Yogishwara Yanjavalkya with the Mitakshara commentary or Vijnaneswar, Choukhamba sanskrit series office, Varanasi, 1967

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

# अर्थशास्त्रे विनयाधिकारिका भागः 1

## BLOCK 3

SGOU

UNIT 1

# अर्थशास्त्रस्य सामान्यपरिचयः

## Learning Outcomes

- कौटिल्यस्य अर्थशास्त्रपठनेन भारतीयराजनैतिकपरम्परायाः ज्ञानं प्राप्नोति ।
- पौराणिकभारतस्य राजनैतिकं ज्ञानं लभते ।
- अर्थशास्त्रस्य ज्ञानं लभते ।
- अर्थशास्त्रे विनयाधिकारिकापठनेन सविशेषज्ञानं लभते ।

## Background

मनुष्याणां वृत्तिरर्थः, मनुष्यवतो भूमिरित्यर्थः तस्य शास्त्रं अर्थशास्त्रम्। अथर्ववेदस्योपवेदत्वेन सम्मतोऽर्थवेदोऽपि लुप्तप्राय एव। विश्वस्यते अर्थवेदे राजनीतितन्त्र- अर्थतन्त्र-कृषि तन्त्र-वाणिज्यतन्त्र-पशुपालनतन्त्र-समाजतन्त्र प्रभृतिविषया आसन्। अस्यापि आर्षरूपेषु

बृहस्पतिप्रणीतत्वेन यथार्थशास्त्र लभ्यते तदनु कौटिल्यस्य अर्थशास्त्रमेव। अस्मिन् एकके कौटिल्यस्य अर्थशास्त्रस्य परिचयं कुर्मः।

## Keywords

अर्थशास्त्रं, विष्णुगुप्तः, विश्वकोशः, नीतिशास्त्रं, तन्त्रशास्त्रं, कृषिविज्ञानं, अधिकरणं, प्रकरणं, चन्द्रगुप्तः, प्रधानमन्त्री, उपवेदः,बार्हस्पत्यनीतिसूत्राणि, शुक्रनीतिसारः, कामन्दकीनीतिसारः

## Discussion

### अर्थशास्त्रम्

मनुष्याणां वृत्तिरर्थः, तस्याः पृथिव्याः लाभपालनोपायः शास्त्रं अर्थशास्त्रम् इति कथ्यते। तदा -

**श्रुतिस्मृत्यनुसारेण राजवृत्तानुशासनम्।**

**सुयुक्त्याऽर्थार्जनं यत्र ह्यर्थशास्त्रं तदुच्यते।।**

अथर्ववेदस्य उपवेदः

अर्थशास्त्रस्य द्वौ पक्षौ राजवृत्तनिरूपणं अर्थार्जनोपाय निर्देशश्च। अर्थशास्त्रविषये अनेकग्रन्थाः सन्ति। बृहस्पतेः बार्हस्पत्यनीतिसूत्राणि,शुक्राचार्यस्य शुक्रनीतिसारः, कामान्दस्य

चाणक्यः - चन्द्रगुप्तस्य प्रधानमन्त्री

कामन्दकीनीतिसारः कौटिल्यस्य अर्थशास्त्रं तेषु प्रमुखाः सन्ति। तेषु अर्थशास्त्रं प्राचीनभारतस्य राजनीतिविषयकः एकः महत्वपूर्णग्रन्थः अस्ति। असाधारणवैदुष्यपण्डितस्य कौटिल्यस्य गौरवगाथा पुराणेषु इतिहासेषु च सुप्रसिद्धा अस्ति। अस्य(कौटिल्यस्य)अपरं नाम विष्णुगुप्तः, द्रमिलः, चाणक्यश्चापि समुपलभ्यन्ते। महाराजाय चन्द्रगुप्ताय अनेन विष्णुगुप्तेन या राजनैतिकसंहिता निर्मिता सैव अर्थशास्त्रम् इति नाम्ना अभिधीयते।

अर्थशास्त्रे पञ्चदश अधिकरणानि सन्ति

कौटिल्यप्रणीतम् अर्थशास्त्रमिदं राजनीतिविज्ञानस्य विश्वकोशमित्युच्यते विद्वद्भिः। ग्रन्थेऽस्मिन्धर्मशास्त्रं, नीतिशास्त्रं, शिक्षाशास्त्रं, समाजशास्त्रं, चिकित्साशास्त्रं, तन्त्रशास्त्रं, कृषिविज्ञानम् इत्यादिकं सर्वं वर्णितमस्ति। अर्थशास्त्रमिदं १५ अधिकरणेषु, १५० अध्यायेषु, १८० प्रकरणेषु च विभक्तमस्ति। एतानि पञ्चदशाधिकरणानि तन्त्रम्, आतापः, शेष इति त्रिषु भागेषु विभक्तानि। तन्त्रे विनयाधिकारिकम्,अध्यक्षप्रचारः,धर्मस्थीयम्,कण्टकशोधनम्, योगवृत्तम् च अधिकरणानि सन्ति। द्वितीयभागे आवापाधिकारे मण्डलयोनिः, षाड्गुण्यम्, व्यसनाधिकारिकम्, अभियास्यत्कर्म, साङ्ग्रमिकं, सङ्गवृत्तम्, आबलीयसम्, दुर्गलम्भोपायः च अधिकरणानि सन्ति। तृतीयभागे शेषे औपनिषदिकम्, तन्त्रयुक्तिः च द्वे अधिकरणे स्तः। प्रथमे विनयाधिकारिके विद्यासमुद्देशप्रभृत्यष्टादशप्रकरणानि, द्वितीये जनपदविनिवेशाद्यष्टत्रिंशत्प्रकरणानि, तृतीये व्यवहारस्था पनाद्य कोनविंशतिप्रकरणानि चतुर्थे कण्टकशोधने कण्टकरक्षणादि त्रयोदशप्रकरणानि पञ्चमे दाण्डकर्मिकादिसप्तप्रकरणानि,षष्ठे प्रकृतिसम्पदादिद्विप्रकरणे, सप्तमे षाड्गुण्यसमुद्देशाद्येकोन त्रिंशत्प्रकरणानि, अष्टमे प्रकृतिव्यसनवर्गाद्यष्टो प्रकरणानि, नवमे

शक्तिदेशकालबलाबलज्ञानादिनवमप्रकरणानि, दशमे स्कन्धवार निवेशादित्रयोदशप्रकरणानि, एकादशे भेदोपादानानि उपांशु दण्डश्चेति द्वे प्रकरणे, द्वादश दूतकर्मादिनवप्रकरणानि, त्रयोदशे उपजापादि षडधिकरणानि, चतुर्दशे परघातप्रयोगादि त्रिप्रकरणानि, पञ्चदशे तन्त्रयुक्तिरिति ग्रन्थेऽस्मिन् विभागाः।

ग्रन्थेऽस्मिन् बहवः टीकाः सन्ति यासु गणपतिशास्त्रिणः श्रीमूलाख्या टीका प्रशस्ता मन्यते। ग्रन्थस्यास्य प्रणयनकालः विक्रमपूर्वचतुर्थशतकमित्यनुमीयते यतः कोटिल्यो हि विष्णगुप्त-श्चाणक्य प्रथममौर्यसम्राजश्चन्द्रगुप्तस्य प्रधानमन्त्री आसीत्। आचार्य चाणक्यो मगधेषु कुसुमपुरे स्वपरिभवामर्षी तदीश्वरान् नन्दानुन्मूल्य तदीये सिंहासने चन्द्रगुप्तमभिषिषेचेति प्रतीतमैतिह्यम्। तस्य च राज्यकालो विक्रमपूर्व-३८२-३३० वत्सरमितः सम्मतः। तेनार्थशास्त्रस्य प्रणयनमपि विक्रमपूर्व ३५७ मितवत्सरमभितः सम्पन्नमासीदिति विश्वस्यते।

## Summarised Overview

अस्मिन् एकके चाणक्यस्य अर्थशास्त्रस्य परिचयः संक्षिप्यतया दत्तः अस्ति। अर्थशास्त्रं अथर्ववेदस्य उपवेदः अस्ति। इदं राजनीतिज्ञानस्य विश्वकोशमित्युच्यते। अर्थशास्त्रमिदं 15 अधिकरणेषु 150 प्रकरणेषु 180 अध्यायेषु विभक्ताः सन्ति। महाराजाय चन्द्रगुप्ताय अनेन विष्णुगुप्तेन या राजनैतिकसंहिता निर्मिता -सैव अर्थशास्त्रं इति नाम्ना अभिधीयते। अस्मिन् ग्रन्थे धर्मशास्त्रं, नीतिशास्त्रं, शिक्षाशास्त्रं, समाजशास्त्रं, चिकित्साशास्त्रं, तन्त्रशास्त्रं, कृषिविज्ञानं इत्यादिकं वर्णितमस्ति।

# Assignments

1. अर्थशास्त्रविषयग्रन्थानां लघुटिप्पणीं लिखत।
2. कौटिल्यमधिकृत्य विशदयत।
3. अर्थशास्त्रे कति अधिकरणानि सन्ति? तेषां नामानि लिखत।
4. अर्थशास्त्रे प्रतिपादितविषयान् वर्णयत।
5. अर्थशास्त्रस्य रचनाकालः कः?

# Suggested Readings

1. कौटिलीयं अर्थशास्त्रम् - Dr. R. Shama Sastry, Mysore Government Branch Press,1924
2. संस्कृतमञ्जुषा - डा. उदयशंकर झा, चौखंबा कृष्णदास् अकादमी, वाराणसी

# References

SGOU

1. Arthaśāstra Vinayādhikārika. of Kautilya
2. The Kauṭilīya Arthaśāstra, R. P. Kangle (All the three Volumes)
3. Current Readings in Arthasastra, Ed. C. Rajendran, University of Calicut, 2008
4. Science and Technology as Reflected in Arthaśāstra, P. V. Narayanan, University of Calicut, 2008

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 2

# विनयाधिकारिकायाः सामान्यपरिचयः

## Learning Outcomes

- कौटिल्यस्य अर्थशास्त्रपठनेन भारतीयराजनैतिकपरम्परायाः ज्ञानं प्राप्नोति।
- पौराणिकभारतस्य राजनैतिकं ज्ञानं लभते।
- अर्थशास्त्रस्य ज्ञानं लभते।
- अर्थशास्त्रे विनयाधिकारिकापठनेन सविशेषज्ञानं लभते।

## Background

पूर्वस्मिन् एकके चाणक्यस्य अर्थशास्त्रस्य परिचयः प्राप्तः। अर्थशास्त्रमिदं 15 अधिकरणेषु 150 प्रकरणेषु 180 अध्यायेषु विभक्ताः सन्ति। महाराजाय चान्द्रगुप्ताय अनेन विष्णुगुप्तेन या राजनैतिकसंहिता निर्मिता -सैव अर्थशास्त्रं इति नाम्ना अभिधीयते। अस्मिन् ग्रन्थे धर्मशास्त्रं, नीतिशास्त्रं, शिक्षाशास्त्रं, समाजशास्त्रं, चिकित्साशास्त्रं, तन्त्रशास्त्रं, कृषिविज्ञानं इत्यादिकं वर्णितमस्ति। अर्थशास्त्रस्य प्रथमं अधिकरणं भवति विनयाधिकारिकम्। अस्मिन् एकके विनयाधिकारिकस्य संक्षिप्तं परिचयं कुर्मः।

## Keywords

विद्यासमुद्देशः, आन्वीक्षिकी, वार्ता, दण्डनीतिः, वृद्धसंयोगः, इन्द्रियजयः, अमात्योत्पत्तिः, मन्त्रिपुरोहितोत्पत्तिः, गूढपुरुषोत्पत्तिः, गूढपुरुषप्रणिधिः, संघवृत्तम्, दूतप्रणिधिः, राजपुत्ररक्षणं, अवरुद्धवृत्तं, अवरुद्धे वृत्तिः, राजप्रणिधिः, निशान्तप्रणिधिः, आत्मरक्षितम्।

## Discussion

प्रथमे विनयाधिकारिके विद्यासमुद्देशप्रभृत्याष्टादशप्रकरणानि सन्ति।

### 1. विद्यासमुद्देशः

(क) विद्या-विद्यते अनया इति विद्या। कौटिल्यमते चतस्रः विद्याः भवन्ति । यथा- 1.आन्वीक्षिकी विद्या, 2.त्रयीविद्या, 3.वार्ता, 4.दण्डनीतिः।

आन्वीक्षिकी नाम तर्कविद्या

**क.आन्वीक्षिकी विद्या**

आन्वीक्षिकी नाम तर्कविद्या, अर्थशास्त्रकारः चाणक्यः लिखति-बलाबले चैतासां हेतुभिः अन्वीक्षमाणा आन्वीक्षिकी लोकस्य

उपकरोति। व्यसने अभ्युदये च बुद्धिम् अवस्थापयति, प्रज्ञावाक्यक्रियावैशारद्यं च करोति।

### ख. त्रयीविद्या

त्रयीविद्या-साम-यजुः ऋग्वेदाः

साम-यजुः ऋग्वेदाः त्रयः सम्मिलितरूपेण 'त्रयी' इत्युच्यते।अथर्ववेद-इतिहासवेदौ, शिक्षा-कल्प-व्याकरण- निरुक्त-छन्द-ज्योतिषम् इति वेदाङ्गानि। एष त्रयीधर्मः चतुर्णां (ब्राह्मण-क्षत्रिय-वैश्य-शूद्र) वर्णानाम् (1. ब्रह्मचर्याश्रमः, 2. गृहस्था श्रमः, 3. वानप्रस्थाश्रमः, 4. संन्यासाश्रमश्चेति) आश्रमाणां च स्वधर्मस्थापनाद् औपकारिकः। यथा ब्राह्मणस्य स्वधर्मः- अध्ययनं अध्यापनं यजनं दानं प्रतिग्रहश्चेति। क्षत्रियस्य स्वधर्मः-अध्ययनं यजनं दानं शस्त्राजीवो भूतरक्षणं च। वैश्यस्य स्वधर्मः-यजनं दानं कृषिपशुपाल्ये वणिज्या च। शूद्रस्य स्वधर्म :- द्विजातिशुश्रूषा वार्ता कारुकुशीलवकर्म च। 1. ब्रह्मचर्याश्रमे ब्रह्मचारिणः स्वाध्यायोऽग्नि-कार्याभिषेकौ भैक्षव्रतत्वमाचार्ये प्राणान्तिकी वृत्तिस्तदभावे गुरुपुत्रे सब्रह्मचारिणि वा। 2. गृहस्थाश्रमे-स्वधर्मः, स्वकर्माजीवः तुल्यैः असमानर्षिभिर्वैवाह्यं ऋतुगामित्वं च देव-पित्रातिथिभृत्येषु त्यागः शेषभोजनं च। 3. वानप्रस्थाश्रमे ब्रह्मचर्यं भूमौ शय्या जटाऽजिन-धारणम् अग्निहोत्राभिषेकौ देवतापित्रतिथिपूजा वन्यश्चाहारः। 4. संन्यासाश्रमे संयतेन्द्रियत्वमनारम्भो निष्किञ्चनत्वं भैक्षमनेकत्रारण्य वासो बाह्याभ्यन्तरं च शौचम्।

### ग. वार्तादण्डनीतिस्थापने

कृषिपशुपाल्ये वणिज्या च वार्ता।धान्यपशुहिरण्यकुप्य -विष्टप्रदानादौपकारिकी।

आन्वीक्षिकी-त्रयी-वार्तानां योगक्षेमसाधनो दण्डः, तस्य नीतिर्दण्डनीतिः।' अलब्धलाभार्था, लब्धपरिरक्षणी, रक्षितविवर्धनी, बृहत् तीर्थेषु प्रतिपादिनी च। न ह्येवंविधं वंशोपनयनम् अस्ति भूतानां यथा दण्डः इति आचार्याः वदन्ति। परन्तु चाणक्यस्य मतमस्ति यत् तीक्ष्णदण्डो हि भूतानाम् उद्वेजनीयः, मृदुदण्डः परिभूयते च। अतः यथार्हदण्डः भवेत्। सुविज्ञातप्रणीतः हि दण्डः जनाः धर्मार्थकामैः योजयन्ति। कथ्यते यथा-

आन्वीक्षिकी-त्रयी-वार्तानां योगक्षेमसाधनो दण्डः

**चतुर्वर्णाश्रमो लोको राज्ञा दण्डेन पालितः।**

**स्वधर्मकर्माभिरतो वर्तते स्वेषु वेश्मसु॥**

**2. वृद्धसंयोगः**

आन्वीक्षिकी इत्यादिना ज्ञानवृद्धाः विद्यां सम्यक् जानन्ति, तैः सह राज्ञः आचार्यछात्ररूपेण सम्बन्धः भवेत्। प्रथमप्रकरणे किं विद्या इति ज्ञात्वा अस्मिन् प्राकरणे कथं तस्य प्राप्तिः इति आचार्यः कथयति।

अन्येषां त्रयाणां विद्यानां आधारः दण्डः अस्ति। यदि सः दण्डः विनयात् स्यात्, तस्मात् कल्याणं भविष्यति। विनयः द्विविधः- शास्त्रसंस्कृतौ जायमानं विनयं कृतकम्। स्वतः जायमानं विनयं स्वाभाविकम्। क्रिया हि द्रव्यं विनयति न अद्रव्यम्। तथा च स्वभावतः विनयशीलाः एव विनयगुणं उपदेष्टुं शक्यन्ते। शुश्रूषा, श्रवणं, ग्रहणं, धारणा, विज्ञानं, , अपोहम् (अयुक्तस्य निराकरणं), तत्त्वैः विद्या सुपात्रशिष्यान् उपदिश्यति। एतेषु बुद्ध्या युक्तः एव ज्ञानेन मार्गदर्शनं विनयः च भवितुम् अर्हति। केवलं सः एव ज्ञानाधिकारी भवति। विद्यानां विनयः नियमः च आचार्येण निर्धारिताः भवन्ति। चौलकर्मानन्तरं लिपिं संख्यानं च शिक्षेत्, उपनयनानन्तरं च त्रयीं,

आन्विक्षिकी च शिक्षेत् शिक्षाविद्भिः। विभागाध्येक्षेभ्यः वार्तां, वक्तृप्रयोक्तृभ्यः दण्डनीतिं च ज्ञातव्यम् ।षोडशवर्षपर्यन्तं ब्रह्मचर्यं कर्तव्यम्। ततः समावर्तनं कृत्वा विवाहं कुरुत। विनयवृद्ध्यर्थं विद्वान् वृद्धैः सह संवादं कुर्यात्। दिने समयक्रमानुसारं शस्त्र-पौराणिक-अर्थ शास्त्र-आदिविषयाणाम् अध्ययनार्थं रतः भवेत्। श्रुतात् हि प्रज्ञोप जायते। प्रज्ञया योगः, योगात् आत्मवत्त्वं, तस्मात् सामर्थ्यं च जायते। एवं-

**विद्याविनीतो राजा हि प्रजानां विनये रतः।**

**अनन्यां पृथिवीं भुङ्क्ते सर्वभूतहिते रतः।।**

ज्ञानेन विनयशीलः प्रजानां विनयशीलः सर्वेषां हितं च कामुकः राजा जगतः परिपालनं करोति।।

### 3. इन्द्रियजयः

इन्द्रियजयः अरिषड्वर्गत्यागः

इन्द्रियजयः अरिषड्वर्गत्यागः-कौटिल्य-अर्थशास्त्रे इन्द्रियजयस्य चर्चा वर्तते। इन्द्रियजयेन को लाभ-हानिः इति विषये विवेचनं वर्तते। विद्याविनयहेतुः इन्द्रियजयः, कामक्रोध-लोभ-मान-मद- हर्षत्यागा-त्कार्यः। कर्णत्वमक्षिजिह्वाघ्राणेन्द्रियाणां शब्द-स्पर्श-रूप-रस-गन्धेष्व-विप्रतिपत्तिः इन्द्रियजयः। शास्त्रानुष्ठानं इन्द्रियजयः वा। कृत्स्नं हि शास्त्रमिदमिन्द्रियजयः। तद्विरुद्धवृत्तिः अवश्येन्द्रियः चातुरन्तोऽपि राजा सद्यो विनश्यति। यथा दाण्डक्यो नाम भोजः कामाद् ब्राह्मणकन्यासभिमन्यमानः सबन्धुराष्ट्रो विननाश। करालश्च वैदेहः। कोपाज्जनमेजयो ब्राह्मणेषु विक्रान्त-स्तालजङ्घश्च भृगुसु। लोभादैलश्चातुर्वर्ण्यमत्याहार्यमाणः सौवीरश्चाजबिन्दुः। मानात् रावणः परदारान् अप्रयच्छत्। दुर्योधनो राज्यादंशं च। मदाद् डम्भोद्भवो

भूतावमानी हैहयश्चार्जुनः। हर्षात् वातापिरगस्त्यमत्यासादयान्वृष्णि-संघांश्च द्वैपासनमिति। कथितं च-

**एते चान्ये च बहवः शत्रुषड्वर्गमाश्रिताः।**

**सबन्धुराष्ट्रा राजानो विनेशुरजितेन्द्रियः॥**

शत्रुषड्वर्गमुत्सृज्य जामदग्न्यो जितेन्द्रियः। अम्बरीषश्च नाभागो बुभुजाते चिरं महीम्॥ अतः अरिषड्वर्गत्यागेन अवश्यमेव इन्द्रियजयं कुर्यात्। राजर्षिवृत्तम्-राजर्षिणारिषड्वर्गपरित्यागेन इन्द्रियजयपूर्वकं वृद्धसंयोगेन प्रज्ञां, चारेण चक्षुः, उत्थानेन योगक्षेमसाधनम्, कार्यानुशासनेन स्वधर्मस्थापनं, विद्योपदेशेन विनयम्, अर्थसंयोगेन लोकप्रियत्वम्, हितेन वृत्तिं च सततं कुर्वीत। एवं वश्येन्द्रियः राजर्षिः परस्त्री-द्रव्य-हिंसाश्च वर्जयेत्। स्वप्नं लौल्यम् अनृतम् उद्धतवेशत्वम् अनर्थसंयोगं, अधर्मसंयुक्तं मानार्थसंयुक्तं व्यवहारं च वर्जयेत्। धर्मार्थाविरोधेन कामं सेवेत। न निःसुखः स्यात्। समं वा त्रिवर्गम् अयोन्यानुबन्धम्। एको ह्यत्यासेवितो धर्मार्थकामानाम् आत्मानम् इतरौ च पीडयति। अर्थ एव प्रधान इति कौटिल्यः अर्थमूलो हि धर्मकामाविति। सततं मर्यादां स्थापयेत् आचार्यान् अमात्यान् वा। य एनम् अपायस्थानेभ्यो वारयेयुः। छायानालिकाप्रतोदेन वा रहसि प्रमाद्यन्तम् अभितुदेयुः। यतो हि-

वश्येन्द्रियः राजर्षिः परस्त्री-द्रव्य-हिंसाश्च वर्जयेत्

**सहायसाध्यं राजत्वं चक्रमेकं न वर्तते।**

**कुर्वीत सचिवांस्तस्मात्तेषां च शृणुयान्मतम्॥**

## 4. अमात्योत्पत्तिः

अमात्यनियुक्तिः- मन्त्री-पुरोहितसखः राजा सामान्येषु अधिकरणेषु स्थापयित्वा अमात्यान् उपधाभिः शोधयेत्, किन्तु तत्र आत्मानं देवीं वा माध्यमं न कुर्यात्। भयोपधाम् अधिकृत्य प्रवहणनिमित्तम् एकोऽमात्यः सर्वान् अमात्यान् आवाहयेत्। तेनोद्वेगेन राजा तान् अवरुन्ध्यात्। अत एवोक्तम्-

अमात्यान् उपधाभिः शोधयेत्

**तस्मात् बाह्यनधिष्ठानं कृत्वा कार्ये चतुर्विधे।**

**शौचाशौचममात्यानां राजा मार्गेत सत्रिभिः॥**

अमात्यनियुक्तिविषये मतैक्यं न दृश्यते। यथा विशालाक्षस्य मतम्- "समानशीलव्यसनत्वात् गुह्यधर्माणः अमात्यान् कुर्वीत।" भारद्वाजस्य मतम्-"दृष्टशौच-सामर्थ्यत्वात् सहाध्यायिनो अमात्यान् कुर्वीत, यतो हि ते राज्ञः विश्वासपात्राः भवन्ति।" पराशरस्य मते- "ये राजानम् आपत्सु प्राणबाधयुक्तासु अनुगृह्णीयुः तान् अमात्यान् कुर्वीत, दृष्टयनुरागत्वात्। आचार्यपिशुनस्य मते-"संख्यातार्थेषु कर्मसु नियुक्ता ये यथादिष्टमर्थं सविशेषं वा कुर्युः तान् अमात्यान् कुर्वीत, दृष्टगुणत्वादिति। बाहुदन्तीपुत्रेण कथ्यते- "अभिजन-प्रजा-शौच-शौर्यरागयुक्तान् अमात्यान् कुर्वीत, गुणप्राधान्यात्। कौटिल्य अर्थशास्त्रे 'सर्वमेवोत्पन्नम्, यतो हि कार्यसामर्थ्याद् पुरुषसामर्थ्यं कल्प्यते।' कथ्यते यथा-

**विभज्यामात्यविभवं देशकालौ च कर्म च।**

**अमात्याः सर्व एवैते कार्याः स्युः न तु मन्त्रिणः॥**

**त्रिवर्गभयशुद्धान् अमात्यान् स्वेषु कर्मसु।**

**अधिकुर्याद् यथाशौचम् इत्याचार्यां व्यवस्थिताः॥**

## 5. मन्त्रिपुरोहितोत्पत्तिः

पुरोहितनियुक्तिः

मन्त्रीणां नियुक्तिः - कौटिल्यस्य अर्थशास्त्रे मन्त्रीणां चयनं गुणवैशिष्ट्यं च प्रदर्श्यन्ते-जानपदोऽभिजातः स्ववग्रहः कृतशिल्पः चक्षुष्मान् प्राज्ञो धारविष्णुः दक्षो वाग्मी प्रगल्भः प्रतिपत्तिमान् उत्साहप्रवाहयुक्तः क्लेशसहः शुचिमैत्रो दृढभक्तिः शीलबलारोग्य सत्त्वसंयुक्तः स्तम्भचापल्यवर्जितः संप्रियो वैराणामकर्तेत्यमात्यसंपत्।' इत्थं उपर्युक्तगुणोपेतान् मन्त्रिणः कुर्वीत।

पुरोहितनियुक्तिः - पुरोहितमुदितोदितकुलशीलं षडङ्गे वेदे दैवे निमित्ते दण्डनीत्यां चाभिविनी तमापदां दैवमानुषीणाम् अथर्वभिरुपायैश्च प्रतिकर्तारं कुर्वीत। तमाचार्य शिष्यः, पितरं पुत्रो, भृत्यः स्वामिनमिव चानुवर्तेत।

## 6. उपधाशौचाशौचज्ञानममात्यानाम्

मन्त्रिपुरोहितसखः सामान्येष्वधिकरणेषु स्थापयित्वाऽमात्यानुपधाभिः शोधयेत्।पुरोहितमयाज्ययाजनाध्यापने नियुक्तममृष्यमाणं राजावक्षिपेत्। सत्रिभिः शपथपूर्वकमेकैकममात्यमुपजापयेत्, अधार्मिकोऽयं राजा, साधु धार्मिकमन्यमस्य तत्कुलीनमवरुद्धं कुल्यमेकप्रग्रंतं सामन्त- माटविकमौपपादिकं वा प्रतिपादयामः। सर्वेषामेतद्रोचते, कथं वा तवेति ? प्रत्याख्याने शुचिरिति धर्मोपधा।

## 7. गूढपुरुषोत्पत्तिः

कौटिल्यस्य अर्थनीतौ गुप्तचरस्य स्थानं महत्त्वपूर्णं वर्तते। नृपः गुप्तचराणां माध्यमेन प्रजायाः कष्टमवगन्तुं शक्यते। समाजस्य अन्तरिकस्थितेः ज्ञानाय गुप्तचरस्य द्वौ विभागौ स्तः। प्रथमः

स्थायीगुप्तचरः, द्वितीयः भ्रमणशीलगुप्तचरः। स्थायीगुप्तचराणां नव-विभागा क्रियते स्म, संस्था नाम्ना अभिहिते भवन्ति। यथा- 1. कापटिकः, 2. उदास्थिकः, 3. गृहपतिकः, 4. वैदेहकः, 5. तापसः, 6. सत्री, 7. तीक्ष्णः, 8. रसदः, 9. भिक्षुकीश्च गूढपुरुषाः उच्यन्ते।

परममर्मज्ञः प्रगल्भः छात्रः कापटिकः

(क) कापटिकः- परममर्मज्ञः प्रगल्भः छात्रः कापटिकः। तमर्थमानाभ्याम् उत्साह्य मन्त्री ब्रूयात् यत् राजानं मां च प्रमाणं कृत्वा 'यस्य यदकुशलं पश्यति तत्तदानीमेव प्रत्यादिशेति। (ख) उदास्थिकः- प्रव्रज्याप्रत्यवसितः प्रज्ञाशौचयुक्तः उदास्थिकः। स वार्ताकर्मप्रदिष्ययां भूमौ प्रभूतहिरण्यान्तेवासी कर्म कारयेत्। कर्मफलाच्च सर्वप्रव्रजितानां ग्रासाच्छादनात्वासान्प्रतिविद्ध्यात्। वृत्तिकामांश्च उपजपेत्, एतेनैव वेषेण राजार्थश्चरितव्यो भक्तवेतनकाले च उपस्थातव्यम्। सर्वप्रव्रजिताश्च स्वं स्वं वर्गम् उपजपेयुः। (ग) गृहपतिकः-कर्षको वृत्तिक्षीणः प्रज्ञाशौचयुक्तो गृहपति-कव्यंजनः। सः कृषिकर्मप्रदिष्टायां भूमौ इति समानं पूर्वेण।(घ) वैदेहकः- वणिजको वृत्तिक्षीणः प्रज्ञाशौचयुक्तो वैदेहकव्यंजनः। स वणिक्कर्मप्रदिष्टायां भूमाविति समानं पूर्वेण। (ङ) तापसः- मुण्डो जटिलो वा वृत्तिकामः तापसव्यंजनः। सानगराभ्यासे प्रभूतमुण्डजटिलान्तेवासी शाकं यवमुष्टिं वा मास-द्विमासान्तरं प्रकाशमश्नीयात्, गूढम् इष्टमाहारम्। वैदेहकान्तेवासिनश्च एनं समिद्धयोगैरर्चयेयुः।

समेधाशास्तिभिश्च अभिगतानाम् अङ्गविद्यया शिष्यसंज्ञाभिश्च अल्पलाभम् अग्निदाहं चोरभयं दूष्यवधं तुष्टिदानं विदेश-वृत्तिज्ञानम् इदमद्य श्वो वा भविष्यति इदं वा राजा करिष्यति इति तदस्य गूढ़ाः सत्रिणश्च संवादयेयुः। मन्त्री चैषां वृत्तिकर्माभ्यां वियतेत-

**पूजिनाश्चार्थमानाभ्यां राज्ञा राजोपजीविनाम्।**

**जानीयुः शौचमित्येताः पंचसंस्थाः प्रकीर्तिताः॥**

## 8. गूढपुरुषप्रणिधिः

रसदः- स्व-भ्रात्रादिस्नेहविहीना क्रूराः रसद-गुप्तचराः

द्वितीयप्रकारकाः भ्रमणशीला (संचार-नामका) गुप्तचराः भवन्ति-(च) सत्रीये सामुद्रिक-विद्या-ज्योतिष-व्याकरणादि अङ्गानां शुभाशुभफलक विद्यायाः ज्ञाता वशीकरण-इन्द्रजाल-धर्मशास्त्र-शकुनशास्त्र-पक्षि शास्त्र-कामशास्त्रेषु तथा तत्सम्बन्धिनृत्येषु संगीतेषु निष्णातगुप्तचरान् सत्री इति कथ्यते। (छ) तीक्ष्णः स्वदेशे निवसन्तः द्रव्याय स्व-प्राणं त्यज्यमानाः गज-व्याघ्रः सर्पादैः युद्धरताः तीक्ष्णा गुप्तचरा भवन्ति। (ज) रसदः- स्व-भ्रात्रादिस्नेहविहीना क्रूराः रसद-गुप्तचराः भवन्ति। (झ) भिक्षुकीः- परिव्राजिका-मुंडितबौद्ध-भिक्षुणी-वृषली-नारी-गुप्त चरिणः भवन्ति।

## 9. स्वविषये कृत्याकृत्यपक्षरक्षणम्

स्वविषये कृत्याकृत्यपक्षरक्षणम्

पूर्वाध्याये उक्तानाम् प्रमुखजनानां अतिरिक्तं राज्ञा देशस्य नागरिकाणां समीपे अपि चारान् प्रेषयित्वा तेषां अपि अपसर्पणं कुर्यात्। द्वे महिले जनावलीनां मध्ये गत्वा नाट्यरूपेण विवादं कुर्यात्। राजा दुष्टः यः कररूपेण दण्डरूपेण महतीं धनं सङ्गृह्य जनान् पीडयति इति कश्चित् वदेत्,तत् श्रुत्वा जनसमूहात् केचित् अग्रे आगत्य तत् सत्यमिति कथयेत्। तदा द्वितीया आगत्य वदेत् यत् करः, दण्डः च गृह्यते तत् जनेभ्यः ऐव इति समर्थयेत्। अतः राजानं प्रति द्वेषः न उचितः इति। एवं रीत्या जनानां मिथ्याधारणाम् अपसारयितुं शक्यते। जनानां मध्ये ये असत्यानि प्रचलन्ति ते अपि अस्माभिः अवश्यमेव अवगन्तव्याः।

## 10. परविषये कृत्याकृत्यपक्षोपग्रहः

पूर्वप्रकरणे स्वदेशस्थं कृत्याकृत्यपक्षाणां रक्षणं वर्णितम् आसीत्, अस्मिन् अध्याये शत्रुदेशस्थान् कृत्याकृत्यपक्षान् स्वपक्षे क्रियमाणान् मार्गान् वर्णितं भवति। प्रलोभने वशीभूताः जनाः कृत्याः इति रूपेण ज्ञायन्ते। तेषु विपरीताः अकृत्याः। कृत्याः चतुर्विधः। क्रुद्धवर्गः, भीतवर्गः, लुब्धवर्गः, मानिवर्गः च।

## 11. मन्त्राधिकारः

मन्त्रानन्तरं एव किमपि कार्यं आरभ्यतुं शक्यते

स्वपक्षान् परपक्षान् च शान्तं कृत्वा राजा यत्किमपि कार्यारम्भं चिन्तयेत्। मन्त्रानन्तरं एव किमपि कार्यम् आरभ्यतुं शक्यते। राज्ञः संभाषणं बहिः न श्रोतव्यं, तथा पक्षिणामपि न दर्शनीयाः। निगूढस्थाने एव मन्त्राः करणीयाः इति कथ्यते। शारिक- शौनकादयः तिर्यञ्चः गुप्तरूपेण मन्त्रान् श्रुत्वा अन्यान् अवदन् इति तत्र कथयति। मन्त्रगृहस्य समीपे न कश्चित् अधिकारहीनः आगच्छेत्। यः अन्यः कश्चित् मन्त्रं ज्ञातवान् तस्य नाशः अवश्यं करणीयः। दूतामात्यस्वामिनां अबोधपूर्वचेष्टैः मन्त्रभेदः भवेत्। मन्त्रभेदे सम्भवितानां हेतूनां उपपादनेन मन्त्ररक्षणोपायः कथयति।मन्त्रस्य पञ्चांगाः सन्ति। कर्मणामारम्भोपायः, पुरुषद्रव्यसम्पत्, देशकाल विभागः, विनिपातप्रतिकारः, कार्यसिद्धिः च। अनन्तरं मन्त्रस्य रीतयः प्रतिपादयति।

## 12. दूतप्रणिधिः

मन्त्रविचारानन्तरं राज्ञः दूतस्य आवश्यकता भविष्यति। दूतप्रणिधिः नाम अस्मिन् प्रकरणे दूतप्रेषणविधिः, दूतानां आचारसंहिता च वर्णिता अस्ति।

## 13. राजपुत्ररक्षणम्

राजपुत्ररक्षणं नाम त्रयोदशप्रकरणे राजा स्वजनेभ्यः शत्रुभ्यः स्वीनं रक्षयति चेत् एव सः स्वराज्यं रक्षयितुं शक्नोति इति प्रतिपादयति। प्रथमं पत्नीपुत्रेभ्यः आत्मानं रक्षितव्यः। शत्रुभ्यः त्राणं शान्ततया उक्तम्। अस्मिन् अध्याये यत् राजा कथं स्वपुत्रान् तथा पुत्रेभ्यः आत्मानं च कथं रक्षितुं शक्नोति इति विशदयति।

## 14. अवरुद्धवृत्तम्

सुशिक्षितः राजपुत्रः पित्रा अयोग्यकार्ये नियोजयति चेत् तत्र स्वजीवहानिः, प्रजानां शत्रुता, महापातकं च न भवेत् तर्हि सः एषा आज्ञा पालयेत्। यदि पुण्यकर्मणि नियुक्तः चेत् पुरुषं अधिष्ठातारं याचेत। । उत्कर्षेण कार्यं कृत्वा तस्य फलं लाभसहितं राज्ञे दद्यात्। तथापि राजा अवरोधयति चेत् तत्रतः गत्वा विविधप्रकारेण सैन्यान् सम्पादयित्वा राजानं आक्रमेत्।

## 15. अवरुद्धे च वृत्तिः

राज्ञः अप्रीतेः पात्रः भवति अवरुद्धः

अस्मिन् प्रकरणे अवरुद्धम् इत्यस्य विषये प्रतिपादनं अस्ति। राज्ञः अप्रीतेः पात्रः भवति अवरुद्धः। अवरुद्धं तु मुख्यपुत्रमपसर्पाः प्रतिपाद्यानयेयुः, माता वा प्रतिग्रहीता त्यक्तं गूढपुरुषाः शस्त्ररसाभ्यां हन्युः। अत्यक्तं तुल्यशीलाभिस्त्रिभिः पानेन मृगयया वा प्रसज्य रात्रावुपगृह्यानयेयुः।

## 16. राजप्रणिधिः

अस्मिन् प्रकरणे राज्ञः स्वकर्मार्थे उत्थानस्यावश्यकतां बोधयति। यदि राजा सक्रियः स्यात् तर्हि प्रजाः अपि सक्रियाः भविष्यन्ति। यदि राजा

दोषं करोति तर्हि तस्य भृत्याः अपि तथैव करिष्यन्ति। राज्यग्रहणं शत्रूणां सुकरं भविष्यति, अतः राजा सर्वदा ऊर्जावान् भवितुमर्हति।

### 17. निशान्तप्रणिधिः

वास्तुविद्यानिपुणैःअनेककक्षापरिगतं अन्तःपुरं कारयेत्

वास्तुविद्यानिपुणैः उत्तमत्वेन निर्दिष्टे देशे सप्राकारपरिखाद्वारं अनेककक्षापरिगतं अन्तःपुरं कारयेत्। कोशगृहविधानेन वा मध्ये वासगृहं , गूढभित्तिसञ्चारं मोहनगृहं तन्मध्ये वा वासगृहं, भूमिगृहं वा आसन्नकाष्ठचैत्यदेवताविधानद्वारमनेकसुरुङ्गसञ्चारं, प्रसादं वा गूढ भित्तिसोपानं, सुषिरस्तम्भप्रवेशापसारं वा वासगृहं यन्त्रबद्धतलावपातं कारयेत्, आपत्प्रतीकारार्थम्। आपदि वा कारयेत्। एवं अन्तःपुरशय्या गृहादि निर्माणविधानम्, तत्राग्निमयपरिहारोपायः, विषभयप्रतिकारो पायः च प्रतिपादयति।

### 18. आत्मरक्षितकम्

अष्टादशप्रकरणे राज्ञः आत्मरक्षणं कार्यं प्रतिपादयति। शयनात् उत्थितः राजा स्त्रीगणैः धनुर्बाणैः परिगृह्येत। द्वितीयस्यां कक्षायां नपुंसकैः राजगृहकार्यचिन्तकैः तृतीयस्यां कक्षायां कुब्जवामनकिरातैः चतुर्थ्यां मन्त्रिभिसम्बन्धिर्दैवारिककैश्च प्रासपाणिभिः राजानं परिवृत्य शरीरं रक्षेयुः।

## Summarised Overview

अर्थशास्त्रस्य विनयाधिकारकं नाम प्रथमाधिकरणस्य सामान्यपरिचयः अस्मात् एककात् प्राप्तः। विद्यासमुद्देशः,वृद्धसंयोगः, इन्द्रियजयः, अमात्योत्पत्तिः, मन्त्रिपुरोहितोत्पत्तिः, गूढपुरुषोत्पत्तिः, गूढपुरुषप्रणिधिः, संघवृत्तम्, दूतप्रणिधिः, राजपुत्ररक्षणं, अवरुद्धवृत्तं, अवरुद्धे वृत्तिः, राजप्रणिधिः, निशान्तप्रणिधिः, आत्मरक्षितम् इत्यादि अष्टादशप्रकरणेषु प्रतिपादितान् विषयान् अधिकृत्य सामान्यज्ञानं युष्मभ्यं लब्धवन्तः।

## Assignments

1. आन्वीक्षिकी नाम विद्या का ?
2. त्रयीविद्यामधिकृत्य विशदयत।
3. वृद्धसंयोगे प्रकरणे प्रतिपादितविषयः कः ?
4. राज्ञः इन्द्रियजयस्य आवश्यकता का ?
5. राजर्षिवृत्तान्तं किम् ?
6. राज्ञा कथं अमात्यनियुक्तिः करणीया इति विशदयत।
7. कापाटिकोदास्थिकौ कौ ?
8. मन्त्राधिकारप्रकरणे प्रतिपादितं विषयं संक्षिप्य लिखत।
9. राज्ञा स्वविषये कृत्याकृत्यपक्षरक्षणं कथं कुर्यात् इति विशदयत।
10. निशान्तप्रणिधिप्रकरणं निरूपयत।

## Suggested Readings

1. कौटिलीयं अर्थशास्त्रम् - Dr. R. Shama Sastry, Mysore Government Branch Press,1924.
2. संस्कृतमञ्जूषा - डा. उदयशंकर झा, चौखंबा कृष्णदास् अकादमी, वाराणसी

## References


1. Arthaśāstra Vinayādhikārika. of Kautilya
2. The Kauṭilīya Arthaśāstra, R. P. Kangle (All the three Volumes)
3. Current Readings in Arthasastra, Ed. C. Rajendran, University of Calicut, 2008
4. Science and Technology as Reflected in Arthaśāstra, P. V. Narayanan, University of Calicut, 2008


### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 3

# विनयाधिकारिकायाः सविशेषाध्ययनम् (अध्यायः 1 - 3)

## Learning Outcomes

- कौटिल्यस्य अर्थशास्त्रपठनेन भारतीयराजनैतिकपरम्परायाः ज्ञानं प्राप्नोति।
- पौराणिकभारतस्य राजनैतिकं ज्ञानं लभते।
- अर्थशास्त्रस्य ज्ञानं लभते।
- अर्थशास्त्रे विनयाधिकारिकापठनेन सविशेषज्ञानं लभते।

## Background

पूर्वस्मिन् एकके अर्थशास्त्रस्य विनयाधिकारिका नाम प्रथमाधिकरणस्य सामान्यपरिचयः कृतः। अनन्तरं अस्मिन् एकके विनयाधिकारिकायाः प्रथमत्रयाध्यायानां पठनं कुर्मः। विनयाधिकारिकायाः राजवृत्तिर्नाम प्रथमाध्याये पञ्चादशाधिकरणानां विषयान् संग्रहरूपेण दत्तं भवति।द्वितीयाध्यायस्य नाम भवति वृद्धसंयोगः इति। तृतीयः अध्यायः भवति इन्द्रियजयः। त्रयाध्ययानां विस्तरेण परिचयं कुर्मः।

SGOU

## Keywords

विद्याविभागः, आन्वीक्षिकी, वर्णधर्माः, आश्रमधर्माः, वार्ता, दण्डनीतिः, वृद्धसंयोगः, विद्याधिकारिवृत्तं, विद्याश्रवणफलानि, इन्द्रियजयः, राज्ञा साधनीयाः अंशाः, राज्ञा वर्ज्या अंशाः, धर्मादिषु प्राधान्यनिर्णयः, आचार्यामात्यादिसचिवसम्पत्यावश्यकता।

## Discussion

**प्रथमाधिकरणम्**

**ॐ नमः शुक्रबृहस्पतिभ्याम्।**

**पृथिव्याः लाभे पालने चयावन्त्यर्थशास्त्राणि पूर्वाचार्यैः प्रस्थापितानि, प्रायशस्तानि सङ्गृह्य एकमिदमर्थशास्त्रं कृतम्।**

पूर्वाचार्यप्रणामलक्षणं मङ्गलमाचरति

**व्याख्या-**

**विघ्नेशं देवतां वाचं प्रणिपत्य गुरूनपि।**

**व्याख्यानमर्थशास्त्रस्य कौटिलीयस्य कुर्महे।।**

अथ निखिलविद्याविचक्षणः स्वबुद्धिसांमर्थ्यापहृत नन्दराज्यसिंहास-नारोपणानुगृहतिचन्द्रगुप्तः कौटिल्यचाण क्यादिपर्यायपदवाच्यस्तत्र भवान् विष्णुगुप्ताचार्यस्त्रिवर्ग सम्पत्तिहेतुभूतार्थार्जनोपायोपदेशप्रधान-मर्थशास्त्रमारिप्सुः पूर्वाचार्यप्रणामलक्षणं मङ्गलमाचरति।

ॐ नमः शुक्रबृहस्पतिभ्याम्।इति। ओमिति माङ्गलिकः शब्दः। नम इति प्रणामः। अस्त्वित्यध्याहारः। शुक्रबृहस्पतिभ्यां शुक्रोऽसुर-गुरुः बृहस्पतिर्देवगुरुः ताभ्याम्। नमस्स्वस्तीत्यादिना चतुर्थी विभक्तिः। तौ अर्थशास्त्रप्रवर्तकेष्वाचार्येषु कूटस्थाविति सप्रमाणामोऽत्यन्त-मुचितः। तत्र शुक्रप्रणीतमौशनसं नाम, यत्सङ्ग्रहात्मा शुक्रनीतिः। बृहस्पतिप्रणीतं तु बार्हस्पत्याख्यमिति द्रष्टव्यम् स्वग्रन्थस्य निर्मूलत्वादि शङ्कानिराकरणपूर्वं प्रकरणाधिकरणसमुद्देशं प्रतिज्ञातुं भूमिकां रचयति पृथिव्या इत्यादिना। पृथिव्या भूमेः, लाभे अप्राप्तायाः प्राप्तौ, पालनेलब्धा-याः परिरक्षणे च विषये। अर्थशास्त्राणि अर्थो नाम प्रस्थापितानि प्रायश-स्तानि संहृत्यैकमिदमर्थशास्त्रं कृतम्। तस्यायं प्रकरणाधिकरणसमुद्देशः।

शुक्रबृहस्पतिगुरुभ्यः नमः

**१. विद्यासमुद्देशः। २. वृद्धसंयोगः। ३. इन्द्रियजयः ।४.अमात्योत्पत्तिः। ५. मन्त्रिपुरोहितोत्पत्तिः। ६. उपधाभिश्शौचाशौचज्ञानममात्यानाम्। ७. गूढपुरुषोत्पत्तिः। ८. गूढपुरुषमनिषिः। ९. स्वविषये कृत्याकृत्य-पक्षरक्षणम्।**

**व्याख्या-** वृत्तिः वर्तनं स्थितिः, सैव हि मनुष्याणां मुख्योऽर्थः। तया च मनुष्यसम्बन्धिन्या तदाधारभूता भूमिरुपलक्ष्यते। एवञ्च मनुष्यवती भूमिरित्यर्थः। तस्याः लाभपालनोपायोपदेशकानि शास्त्राणि अर्थ-शास्त्राणि। यावन्ति, पूर्वाचार्यैः शुक्रबृहस्पतिविशालाक्षादिभिः, प्रस्थापितानि प्रवर्तितानि, तानि, प्रायश इति बाहुल्योक्त्या क्वचित् क्वचिदात्मीयदर्शनानां प्रतिपादनं दर्शयति। संहृत्य सङ्गृह्य, एकमिद-मर्थशास्त्रं कृतम् एकं नानाशास्त्रविप्रकीर्णसमस्त विषयैक निधानम्, इदं बुद्धिस्थम् अर्थशास्त्रं, कृतं मया प्रणीतम्। एतेन, मदीयस्यास्यैकस्य ग्रन्थस्य परिशीलनात् कृत्स्नपूर्वाचार्यदर्शनं विज्ञानं सुखलभ्यमिति सूचयन् स्वशास्त्रस्य समूलत्वं पूर्वाचार्यग्रन्थैरगतार्थत्वं च द्योतयति।

वृत्तिः वर्तनं स्थितिः

तदिदमर्थशास्त्रं साशीतिशतसङ्ख्यैः प्रकरणैः तत्परिच्छिन्नैश्च पञ्चदशसङ्ख्यैरधिकरणैर्विभज्य प्रस्थापितम्। तेषु यथास्थानं वितत्य विशेषतो व्युत्पादयिष्यमाणेषु प्रथमं विषयतः समाख्यातः क्रमत इयत्तया च किमपि सामान्यज्ञानं विशेषजिज्ञासानिमित्तं शिष्याणां जनयितुं तत्समुद्देशं प्रतिजानीते तस्यायमिति। तस्य अर्थशास्त्रस्य, अयम् आरब्धाध्यायगोचरः प्रदर्श्यमानप्रकारः, प्रकरणाधिकरणसमुद्देशः प्रकरणानामधिकरणानां च सर्वेषां समुद्देशः संक्षेपेण निर्देशः संक्षिप्तस्वरूपक्रमेयत्ताख्यानमित्यर्थः, क्रियत इति शेषः। प्रक्रियन्ते प्रकर्षेण व्युत्पद्यन्ते एष्वर्था इति प्रकरणानि। अधिक्रियन्ते विषयी-क्रियन्ते एषु प्रकरणानीत्यधिकरणानि।

विद्यासम्मुद्देशः - प्रथमं प्रकरणम्

तत्र विनयाधिकारिकस्य प्रथमाधिकरणस्य प्रथमं प्रकरणं समुद्दिशति विद्यासमुद्देश इति। विद्यानाम् आन्वीक्षिकी त्रयी वार्ता दण्डनीतिरित्येतासां चतसृणां समुद्देशः विद्यासमुद्देशः। तदाख्यं प्रकरणमित्यार्थम्। विद्यासमुद्देश इत्येतच्च सूत्रमिति व्याहर्तव्यं, विस्ताराहं बहुलार्थगर्भत्वात्। सूत्रमेव चेदं तत्प्रकरणे 'आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्चेति विद्याः' इत्युपक्रम्य 'स्वधर्मकर्माभिरतो वर्तते स्वेषु वेश्मसु' इत्यन्तै स्त्रिभिरध्यायैर्महता प्रयत्नेन प्रपञ्चत इति सूत्रस्य तथाविधं व्याख्यानं भाष्यं भवितुमर्हति।

एवं 'प्रकरणाधिकरणसमुद्देश इत्युक्तचरमुत्तराण्यपि 'वृद्धसंयोग' इत्यादीनि सूत्राणि भवन्ति, तत्तत्प्रकरणगतानि प्रपञ्चन- वाक्यानि च भाष्याणि। एवमधिकरणेषु सर्वेषु। एवञ्च 'स्वयमेव विष्णुगुप्तश्चकार सूत्रं च भाष्यं च' इति ग्रन्थोक्तिरुपपन्ना भवतीति वेदितव्यम्।

तत्र विनयविहीनो लोकशास्त्रव्यवहारेष्वशिक्षितो राजा राज्यरक्षणानर्हत्वाद् वैनयिकीषु विद्यास्ववश्यं विनेतव्य इत्यतो विद्यासमुद्देश इत्येतत् प्रकरणमादौ सूत्रितम्। विद्याश्च वृद्धसंयोगाभावे लब्धुं न शक्या इति वृद्धसंयोग इति सूत्रम्। वृद्धसंयोगश्च इन्द्रियजयमन्तरेण न लभ्य इति इन्द्रियजय इति सूत्रम्। वृद्धैर्विद्यासुशिक्षितो जितेन्द्रियोऽपि सहायाभावे कार्यं साधयितुं न क्षम इति तदनन्तरम् अमात्योत्पत्तिरिति सूत्रम्। अमात्याश्च केचिद् बुद्धिसाचिव्याय नित्यनैमित्तिककर्म-साचिव्याय चापेक्षिताः, शान्तिकपौष्टिककर्मानुष्ठानाय चान्ये। तदर्थं मन्त्रिपुरोहिताः कर्तव्या इति मन्त्रिपुरोहितोत्पत्तिरिति सूत्रम्। तैश्च सर्वप्रकारविशुद्धैर्भाव्यमिति उपधाभिः शौचाशौचज्ञानममात्यानाम् इति सूत्रम्।

उपधाशुद्धिर्गूढपुरुषानन्तरेण ज्ञातुमशक्येति ततो गूढपुरुषोत्पत्तिः इति सूत्रम्।

तेषां च स्वामिनियोगमन्तरेणाव्यापाराद् गूढपुरुषप्रणिधिः इत्ति सूत्रम्। गूढपुरुषाणां प्रणिधिः प्रणिधानं तत्तत्कार्येषु स्वामिना नियोजनमिति तदर्थः। तैश्च नियुक्तैः स्वराज्यगतान् क्रुद्धलुब्धादीन् विज्ञाय तद्दोषप्रतिविधानं परराष्ट्रगतान् विज्ञाय तेषां भेदेन स्वपक्षे प्रवेशनम् चावश्यकमिति।

गूढपुरुषाणां प्रणिधिः

**१०.परविषये कृत्याकृत्यपक्षोपग्रहः। ११.मन्त्राधिकारः। १२. दूतप्रणिधिः। १३. राजपुत्ररक्षणम्। १४. अवरुद्धवृत्तम्। १५. अवरुद्धे च वृत्तिः। १६.राजप्रणिधिः। १७.निशान्तप्रणिधिः। १८.आत्म-रक्षितकम्। इति विनयाधिकारिकं प्रथमाधिकरणम्॥**

**व्याख्या-** स्वविषये कृत्याकृत्यपक्षरक्षणम् इति परविषये कृत्याकृत्यपक्षोपग्रहः इति च सूत्रे। स्वदेशे कृत्याः शत्रुभेद्याः क्रुद्धादयः अकृत्याः अभेद्याः सुहृदः, कृत्याकृत्यानां पक्षाणां संघानां शत्रूपजापात् रक्षणमिति प्रथमसूत्रस्यार्थः। परराष्ट्रे ये कृत्याकृत्याः तेषामुपजापादिना स्वपक्षे संग्रहणमिति द्वितीयसूत्रस्यार्थः। स्वराष्ट्ररक्षणं परराष्ट्रहरण-मित्येतावद् राज्ञः कर्मसर्वस्वम्। तस्यमन्त्रायतत्वाद् मन्त्राधिकारः इति सूत्रम्। कर्मणामारम्भोपायादिसम्प्रधारणं मन्त्रः, तस्याधिकारी मन्त्राधिकार इति। परराष्ट्रकरणीयानां स्वकर्मणां स्वयं कर्तुमशक्यतया दूतसापेक्षत्वाद्दूतप्रणिधिःइतिसूत्रम्। यथा राजपुत्राः स्वपितरि न द्रोहमाचरेयुः, तथा ते प्रयत्नेन परोपजापादिभ्यो रक्षणीया इति राजपुत्ररक्षणम् इति सूत्रम्।

कर्मणामारम्भोपायादि सम्प्रधारणं मन्त्रः

पित्रा क्वचिदवरुध्य तथा रक्ष्यमाणः कुमारः पितरि कथं व्यवहरेत्, पिता च तस्मिन् कथमित्येतद् वक्तुं सूत्रे अवरुद्धवृत्तम् इति अवरुद्धे च वृत्तिः इति च।

इत्थमात्मानं रक्षतो राज्ञो नियतकालां व्यापारपरिपाटीं वक्तुं सूत्रं राजप्रणिधिः इति । राज्ञः व्यापारपरिचिन्तनमित्यर्थः। निशान्तप्रणिधिः इति सूत्रम् । निशान्तं राजभवनं, तस्य देशसन्निवेशादिचिन्तनम् इति विनयाधिकारिकमित्यादि। विनयः विद्यादिशिक्षणं तस्याधिकारः प्रस्तावो विनायाधिकारः। सोऽस्मिन्नस्तीतिविनायाधिकारिकं नाम प्रथमाधिकरणम् समुद्दिष्टम् इत्यर्थः।

**द्वितीयाधिकरणम्**

**१.जनपदविनिवेशः । २. भूमिच्छिद्रविधानम् । ३. दुर्गविधानम् । ४. दुर्गविनिवेशः । ५. सन्निधातृनिचयकर्म ।६.समाहर्तृसमुदयप्रस्थापनम् ।**

**व्याख्या-** इत्थं समासादितविनयसम्पत्को राजा तन्त्रावापयोरधिकारी भवति । तन्त्रं नाम स्वराज्यक्षेमसाधनानुकूलः पञ्चस्याद्येष्वधिकरणेषु पञ्चनवत्या सूत्रैः प्रतिपाद्यमानोऽर्थः। आवापः शत्रुराष्ट्रहरणानुकूलः षष्ठादिषु त्रयोदशान्तेषु अष्टस्वधिकरणेषु सूत्राणामेकाशीत्याप्रतिपाद्य मानोऽर्थः, अर्थ ह्येनं विज्ञाय प्रवर्तमानो विजिगीषुः परराष्ट्रं स्ववशे करोतीति। तत्रयेऽर्थाःद्वितीयेऽधिकरणे अध्यक्षप्रचाराख्ये अष्टात्रिंशत् सूत्रैः प्रतिपाद्यन्ते, ये तृतीये धर्मस्थीये एकोनविंशत्या सूत्रैः, ये चतुर्थे दुर्गराष्ट्रमम्बन्धिकण्टकशोधनाख्ये त्रयोदशभिः सूत्रैः, ये च पञ्चमे राजराज्यकण्टकशोधनपरे योगवृत्तनाम्नि सप्तभिः सूत्रैः, तेष्वेव सर्वेप्वधीनं राज्यकुटुम्बभरणकर्मेति तमेतं चतुरधिकरण्यर्थं तन्त्रमाहुः, तत्रिधातोः कुटुम्बधारणार्थत्वात्। द्विसूत्रं प्रकरणद्वयात्मकं मण्डलयोनि संज्ञमधिकरणं षष्ठम्, एकोनत्रिंशत्सूत्रयुक्तं षाड्गुण्यंसप्तमम्, द्विसूत्रं सङ्घवृत्तमेकादर्श, नवसूत्रमाबलीयसं द्वादर्श, षट्सूत्रं दुर्गलम्भोपायाख्यं त्रयो-दशमित्येकाशीतिसूत्रामष्टाधिकरणीं शत्रु राज्यहरणोपायोपदेशिनी मावापं व्यवहरन्ति। त्रिसूत्रमौपनिषदं नाम चतुर्दशमधिकरणं तन्त्रावापयोरत्यन्तमनुगुणम्।

एकसूत्रात्मकं तन्त्रयुक्तिसंज्ञं पञ्चदशमधिकरणं कौटिल्य-शास्त्राद्दतास्तन्त्रयुक्तीः द्वात्रिंशत् व्युत्पाद्यतीति स्थितिः । तत्र स्वराज्यं रक्षतो राज धान्याद्यपेक्षणादध्यक्षप्रचाराधिकरणे जनपददिनिवेश इति प्रथमं प्रकरणं सूत्रितम्।

स्वराज्यगतानां कृषिनिवासानर्हाणां गिरिवनश्वभ्रमायाणां भूभागानामुपयोगप्रकारोपदेशार्थ सूत्रं भूमिच्छिद्रविधानम् इति। भूमिच्छिद्राणां कृष्याद्यानर्हभूभागानां विधानम् उपयोगप्रकार इत्यर्थः।

'भूमिच्छिद्र कृष्ययोग्येति यादवः। देशस्य शत्रुनाक्रमणीयत्वसम्पत्तये दुर्गापेक्षणाद्, दुर्गविधानम् इति सूत्रम् दुर्गविनिवेश इति च।

**७.अक्षपटले गाणनिक्याधिकारः। ८.समुदयस्य युक्तापहृतस्य प्रत्यानयनम्। ९.उपयुक्तपरीक्षा १०. शासनाधिकारः। ११. कोशप्रवेश्यरत्नपरीक्षा। १२. आकरकर्मान्तप्रवर्तनम्। १३. अक्षशालायां सुवर्णाध्यक्षः। १४.विशिखायां सौवर्णिकप्रचारः।**

धनादिकं सञ्चित्य निधाता।

**व्याख्या-** सन्निधातृनिचयकर्म इति सूत्रम्। सन्निधाता नाम धनादिकं सञ्चित्य निधाता। तस्य निचयकर्म धनादिरक्षणव्यापार उच्यत इति सूत्रार्थः। समाहर्तृसमुदयप्रस्थापनम् इति सूत्रम्। सर्वायस्थानेभ्यो राजार्थानां सम्यक् समन्ताद्वा आहर्ता समाहर्ता विषयबल्यध्यक्षः। समुदयो धनोत्थानं तस्य प्रस्थापनं मार्गपरिकल्पनं समुदयप्रस्थापनं समाहर्तुः समुदयप्रस्थापनं समाहर्तृसमुदयप्रस्थापनम्। समाहर्ता कया विधया समुदयं प्रस्थापयेदित्येतदस्मिन् प्रकरणे उपदिश्यत इत्यर्थः। अक्षपटले गाणनिक्याधिकारः इति सूत्रम्। अक्षा गणनयोग्यानि रूप्यकादीनि तेषां पटलं स्थानम् अक्षपटलं तस्मिन्, गणनायां नियुक्तो गाणनिकः तस्य कर्म गाणनिक्यं तस्य प्रस्तावो गाण- निक्याधिकारः। समुदयस्य युक्तापहृतस्य प्रत्यानयनम् इति सूत्रम्। उत्पन्नस्यार्थस्य नियुक्तैः पुरुषैरपहृतस्य पुनःप्रापणमित्यर्थः।

उपयुक्तपरीक्षा इति सूत्रम्। युक्तानाम् उपरि नियुक्ताः प्रत्ययितपुरुषा उपयुक्ताः तेषां परीक्षा दोषगवेषणेति सूत्रार्थः।

शासनाधिकारः इति सूत्रम्। तालपत्रादिषु लिख्यमानोऽर्थः शासनं तस्याधिकारो विधिरुच्यत इत्यर्थः। कोशप्रवेश्यरत्नपरीक्षा इति सूत्रम्। कोशो भाण्डागारं तस्मिन् प्रवेशयितुं योग्यानां मणिमुक्तादीनां

परीक्षणमत्रापदिश्यत इत्यर्थः। आकारकर्मान्तप्रवर्तनम् इति सूत्रम्। सुवर्णरजतरत्नायुत्पत्तिस्थानमाकरः, तस्य कर्मान्तः तत्क्रियानिश्चयः, तस्य प्रवर्तनं व्यापारणमित्यर्थः। अक्षशालायां सुवर्णाध्यक्षः इति सूत्रम्। अक्षशाला अक्षः गण्यः धनं सुवर्णरूप्यादि तस्य शाला तद्घटनशाला तस्यां सुवर्णाध्यक्षः सुवर्णादिघटनगणनाद्याधिकृतः लक्षणया तद्व्यापर इत्यर्थः। विशिखायां सौवर्णिकप्रचारः इति सूत्रम्। विशिखायाम् आपणवीथ्यां, सौवर्णिकप्रचारः सुवर्णनियुक्तस्य व्यापारः॥

**१५. कोष्ठागाराध्यक्षः । १६. पण्याध्यक्षः । १७. कुप्याध्यक्षः । १८. आयुधागाराध्यक्षः । १९ तुलामानपौतवम् । २०. देशकालमानम् । २१. शुल्काध्यक्षः । २२. सूत्राध्यक्षः । २३. सीताध्यक्षः । २४.सुराध्यक्षः ।**

**व्याख्या-** कोष्ठागाराध्यक्षः इति सूत्रम्। कोष्ठमुदरे लक्षणया तत्पोषणार्थ व्रीहिगोधूमादिकमाहारद्रव्यं तस्य आगारं सङ्ग्रहस्थानं तस्याध्यक्षः, अर्थात् तद्व्यापारः। पण्याध्यक्षः इति सूत्रम्। विक्रेयद्रव्याध्यक्षः इत्यर्थः॥16॥ कुप्याध्यक्षः इति सूत्रम्। कुप्यं सारदारुवेणुवल्लिबल्कादि तस्मिन् नियुक्तः कुप्याध्यक्षः॥17॥ आयुधागाराध्यक्षः इति सूत्रम्। स्पष्टार्थम्॥18॥ तुलामानपौतवम् इति सूत्रम्। तुला उन्मानसाधने मानं कुडुंबादि ताभ्यां पौतवं परिच्छेदन तुलामानपौतवम्, लक्षणया तत्सशोधनमित्यर्थः। तच्च वाणिजकाः कूटतुला मानव्यवहारिणो मानूर्यनित्येतदर्थम्॥19॥ देशकालमानम् इति सूत्रम्। देशायोजनग-व्यूतिकीशादिः कालखटिलयादिः तयोर्मानं परिच्छेद इति सूत्रार्थः॥ 20॥

पण्याध्यक्षः - विक्रेयद्रव्याध्यक्षः

शुल्काध्यक्षः इति सूत्रम्। शुल्क पञ्चदशभागादिकं शुल्कव्यवहारे वक्ष्यमाणं राज्ञो देयं तस्याध्यक्षः, व्यापार इत्यर्थः॥21॥ सूत्राध्यक्षः इति

सूत्रम्। अत्र कार्यासादिस्तन्तुः तस्य अध्यक्षा सद्धानादिकारयिता ॥22॥ सीताध्यक्षः इति सूत्रम्। सीता कृषिः तस्याध्यक्षः कृतिदुर्वेदी विज्ञाय प्रवर्तकः ॥ 23 ॥ सुराध्यक्षः इति सूत्रम्। सुरा मधुमेयादितस्यावसन्धान विक्रीयाद्याधिकृत:सुराध्यक्ष: ॥ 24 ॥

**२५. सूनाध्यक्षः। २६. गणिकाध्यक्षः। २७. नावध्यक्षः। २८. गोऽध्यक्षः। २९. अश्वाध्यक्षः। ३०. हस्त्यध्यक्षः। ३१. रथाध्यक्षः। ३२. पत्यध्यक्षः। ३३. सेनापतिप्रचारः। ३४. मुद्राध्यक्षः। ३५. विवीताध्यक्षः। ३६. समाहर्तृप्रचारः।**

अश्वानां लक्षणकुलादिकं विज तद्रक्षणादिकर्मानुष्ठाता अश्वाध्यक्षः

**व्याख्या -** सूनाध्यक्षः इति सूत्रम्। सूना भक्ष्यप्राणिवधस्थानं तस्या अध्यक्षः वध्यावध्यनियमनाद्यधिकृतः ॥25॥ गणिकाध्यक्षः इति सूत्रम्। धनमेव गणयन्तीति गणिका वेश्याः तासामध्यक्षः गणिकाध्यक्षः ॥26॥ नावध्यक्षः इति सूत्रम्। नावां यानपात्राणाम् अध्यक्षः आदेयराज भागग्रहणाधिकर्ता ॥27 ॥ गोऽध्यक्षः इति सूत्रम्। गवाम् उपलक्षणेन गोमहिषाजादीनां तदाजीनां गोपालादीनां च अध्यक्षः नियामक इत्यर्थः ॥28 ॥अश्वाध्यक्षः इति सूत्रम्। अश्वानां लक्षणकुलादिकं विज्ञाय तद्रक्षणादिकर्मानुष्ठाता अश्वाध्यक्षः ॥29॥हस्त्यध्यक्षः इति सूत्रम्। अश्वाध्यक्षवद् हस्त्यध्यक्षो व्याख्येयः॥30॥ रथाध्यक्षः इति सूत्रम्। रथानां देवरथादीनां घटनाथधिकर्ता रथाध्यक्षः ॥31॥ पत्त्यध्यक्षः इति सूत्रम्। पत्तमः पदातयः ये पादचारेण बुध्यन्ते, तेष्वधिकृतः पत्त्यध्यक्षः॥32 ॥सेनापतिप्रचारः इति सूत्रम्। सेनापतिः चतुरङ्गबलनेता तस्य प्रचारः सेनाविषयो व्यापारः प्रतिपाद्यत इत्यर्थः॥33॥ मुद्राध्यक्षः इति सूत्रम्। मुद्रा नाम राजचिह्न राजनामभ्रेयप्रतिमादि लक्षणं यच्छा सनपत्रादौ दीयते, तस्या अध्यक्षः प्रवर्तयिता ॥ 34 ॥विवीताध्यक्षः इति सूत्रम्। विवीतं तृणजलवान् अकृष्यः अंदेशः पश्वर्थः तस्याध्यक्षः

तथ्यापार इत्यर्थः ॥ 34॥ समाहर्तृप्रचारः इति सूत्रम्। समहर्ता आयस्थनेभ्यो राजार्थं जनपदाध्यक्षः तस्य प्रचारो व्यापारः जनपदचिन्तनमित्यर्थः ॥35॥ गृहपतिकवैदेहकतापसव्यञ्जनाः प्रणिधयः ॥ 36॥ नागरिकप्रणिधिः। इत्यध्यक्षप्रचारो द्वितीयमधिकरणम् ॥

**व्याख्या-** गृहपतिकवैदेहकतापसव्यञ्जनाः प्रणिधयः इति सूत्रम्। गृहस्थ- वणिक्-तपस्विवेषाः प्रणिधयः गूढपुरुषाः। अर्थात् तेषां जनपदेषु नियोजनम्। तच्च समाहर्तृकार्ययोर्पयोगिते जनपद वृत्तान्तज्ञानाय ॥ 37॥

नागरिकप्रणिधिः

नागरिकप्रणिधिः इति सूत्रम्। नगरे नियुक्तो नागरिकः, तस्य प्रणिधिः प्रणिधानं व्यापारचिन्तनमित्यर्थः ॥38॥

हन्तीत्यादि। अध्यक्षप्रचारोऽध्यक्षाणां व्यापारः॥

**तृतीयमधिकरणम्**

अथ धर्मस्थीयं तृतीयमधिकरणम्। धर्मस्था नाम धर्मशास्त्रज्ञाः धर्मशास्त्रानुसारेण व्यवहारनिर्णयकर्मण्याधिकृताः। तेषामिदं धर्मस्थीयं तन्निर्णयव्यवहारपदप्रतिपादकमित्यर्थः।

**१. व्यवहारस्थापना। २. विवादपदनिबन्धः। ३. विवाहसंयुक्तम्। ४. दायविभागः। ५ वास्तुकम् ।६. समयस्यानपाकर्म।**

व्यवहारस्थापना

तत्र प्रथमं सूत्रं व्यवहारस्थापना इति। कीदृशो व्यवहारः सिध्यति कीदृशो न सिध्यतीति व्यवस्थापनमिति सूत्रार्थः॥1॥ विवादपदनिबन्धः इति सूत्रम्। विवादपदस्य निबन्धः पूर्वोत्तरपक्षात्मना पत्र आरोपणं, तत्पूर्वकं चिन्तनमित्यर्थः॥2॥ विवाहसंयुक्तम् इति सूत्रम्। विवाहाः

अष्टविधाः ब्राह्मादयः, तत्सम्बद्धो व्यवहार इत्यर्थः। एतत् प्रकरणं त्रिभिरध्यायैर्वितन्यते ॥3॥

दायविभागः इति सूत्रम्। दायः पितृपितृव्यादिधनं तस्य विभागः। अयमपि त्रिभिरध्यायैर्वितन्यते ॥4॥वास्तुकम् इति सूत्रम्। वस्तु गृहारामादि तत्सम्बद्धंवास्तुकम्। इदमध्यायत्रयेण वितन्यते। तत्र तृतीयाध्याये उत्तरमपि प्रकरणं प्रवेशितम् ॥5॥ समयस्यानपाकर्य इति सूत्रम्। इदमहं करिष्यामीत्यभ्युपागमात्मा संकेत:। इदमनेन कर्तव्यमिति बहुभिः सम्भूय कृतो वा संकेत: समय:।

**७. ऋणादानम्। ८.औपनिधिकम्। ९.दासकर्मकरकल्पः। १०. सम्भूयसमुत्थानम्। ११. विक्रीतक्रीतानुशयः। १२. दत्तस्यानपाकर्म। ११. अस्वामिविक्रयः। १४. स्वस्वामिसम्बन्धः। १५. साहसम्। १६. वाक्पारुष्यम्। १७. दण्डपारुष्यम्। १८. द्यूतसमाह्वयम्।**

**व्याख्या-** तस्य अनपाकर्म त्यागाभावः इति सूत्रार्थः। इदं प्रकरणं वास्तुकप्रकरणीयविवीतक्षेत्रपथहिंसाव्युत्पादनाध्याये व्युत्पादितम् ।। 6।। ऋणादानम् इति सूत्रम्। ऋणग्रहणनिर्यातनसम्बद्धो व्यवहार इत्यर्थः ॥7॥ औपनिधिकम् इति सूत्रम्। उपनिधिर्निक्षेपः, तत्सम्बद्धमनुष्ठानमौपनिधिकम् ॥8॥ दासकर्मकरकल्पः इति सूत्रम्। अत्यन्तपारार्थमासाद्य शुश्रूषका दासाः, भृत्यर्थ शुश्रूषकाः कर्मकराः तेषां कल्पः तत्सम्बन्धी विधिः॥9॥

सम्भूयसमुत्थानम् इति सूत्रम्। वाणिजकैरन्यैर्वा समुदेत्यारभ्यमाणं कार्यं सम्भूयसमुत्थानम्।10॥

विक्रीतक्रीतानुशयः इति सूत्रम्। विक्रीतं मूल्यमादाय दत्तं पण्यं क्रीतं मूल्यं दत्त्वा गृहीतं, तयोर्विषये अनुशयः विक्रयविषयः क्रयविषयश्च पश्चात्ताप इत्यर्थः ॥ 11 ॥

सहसा कृतं कर्म
साहसं प्रसभकर्म

दत्तस्यानपाकर्म इति सूत्रम्। दत्तस्य धर्माद्यर्थे वाचा दत्तस्य अनपाकर्म अप्रदानम्। एतच्च विषयविशेषे पुनर्हरणस्याप्युपलक्षणम् ॥12॥ अस्वामिविक्रयः इति सूत्रम्। अस्वामी परद्रव्यव्यवहर्ता तेन कृतो विक्रयः अस्वामिविक्रयः ॥13॥ स्वस्वामिसम्बन्धः इति सूत्रम्। स्पष्टार्थम् ॥14॥ साहसम् इति सूत्रम्। सहसा कृतं कर्म साहसं प्रसभकर्म ॥15॥ वाक्पारुष्यम् इति सूत्रम्। वाचा कुत्सनभर्त्सनादिकमित्यर्थः ॥16॥ दण्डपारुष्यमिति सूत्रम्। दण्डेन करणेन पारुष्यं परुषकर्म द्रोहोदण्डपृष्यम् ॥ 17॥

द्यूतसमाह्वयम् इति सूत्रम्। द्यूतम् अक्षक्रीडा समाह्वयः अजकुकुटादिप्राणिदेवनं तयोः समाहारः द्यूतसमाह्वयं, तत्सम्बद्धो व्यवहारः प्रकरणेऽस्मिन्नभिधीयत इत्यर्थः ॥ 18 ॥

**१९. प्रकीर्णकानि। इति धर्मस्थीयं तृतीयमधिकरणम्॥**

धर्मस्थीयमधिकरणम्

**व्याख्या-** प्रकीर्णकानि इति सूत्रम्। उक्तविवादपदानन्तर्गत। नियाचित- काद्यदानादिनिमित्तानि विवादपदानि प्रकीर्णकानि, तान्यत्राभ धीयन्ते इत्यर्थः ॥ 19 ॥

इति धर्मस्थीयमित्यादि। एवमेकोनविंशतिप्रकरणं धर्मस्थीयमधिकरणं तृतीयं संमुद्दिष्टमित्यर्थः ॥

## चतुर्थमधिकरणम्

**१. कारुकरक्षणम् ।२. वैदेहकरक्षणम् । ३.उपनिपातप्रतीकारः । ४.गूढाजीविनां रक्षा । ५.सिद्धव्यञ्जनैर्माणवप्रकाशनम् । ६.शङ्कारूपकर्माभिग्रहः । ७. आशुमृतकपरीक्षा । ८. वाक्यकर्मानुयोगः ।**

**व्याख्या-**अथ कण्टकशोधनाख्यं चतुर्थमधिकरणम्। तत्रेदं प्रथमं सूत्रकारुकरक्षणम् इति। कारुकाः तक्षायस्कारस्वर्णकारादयः तेभ्यः कूटकर्मकारिभ्यो देशस्य रक्षणमिहाभिधीयत इत्यर्थः ॥ 1 ॥

वैदेहकरक्षणम् इति सूत्रम्। वाणिजकेभ्यः पौतवापचारिभ्यो रक्षणमित्यर्थः ॥॥ 2 ॥

उपनिपाताः दैविकानि महाभयानि तेषां प्रतीकारः

उपनिपातप्रतीकारः इति सूत्रम्। उपनिपाताः दैविकानि महाभयानि तेषां प्रतीकारः ॥ 3 ॥

गूढाजीविनां रक्षा इति सूत्रम्। ये गूढं लक्षग्रहणेन स्वामिनं प्रजाश्च वञ्चयन्त आजीवन्ति ते गूढाजीविनः तेषां रक्षा तेभ्यो देशस्य रक्षणमित्यर्थः ॥ 4 ॥

सिद्धव्यञ्जनैर्माणवप्रकाशनम् इति सूत्रम्। सिद्धव्यञ्जनाः मुण्डजटिलतापसवेषा धूर्ताः तैः करणैः माणवप्रकाशनं माणवस्य प्रलोभनविद्यायाः प्रकाशनम्। तच्च चोरादिग्रहणार्थम् ॥5॥आशुमृतकपरीक्षा इति सूत्रम् । आशु मृतकस्य परीक्षा किमयं स्त्वयं मृतः उत परेण मारित इति परीक्षणम् ॥7॥

वाक्यकर्मानुयोगः इति सूत्रम्। वाक्यानुयोगः कर्मानुयोगश्चेति सूत्रार्थः। तत्र वाक्यानुयोगः उपपत्तियुक्तैः सामवादैश्चोरपृच्छा, कर्मानुयोगः कशाप्रहारादिना चोरविचारणा ॥॥ ८ ॥

शङ्का रुपकर्माभिग्रहः इति सूत्रम्। आत्मनः परान् प्रति परेषामात्मानं प्रति शङ्का द्विरूपा। रूपं सलोप्त्रदर्शनं, कर्म सन्धिच्छेदादि, एतैः अभिग्रहः, चोराणां ग्रहणमिति सूत्रार्थः।

**९.सर्वाधिकरणरक्षणम्। १०.एकाङ्गवधनिष्क्रयः। ११. शुद्धश्चित्रश्च दण्डकल्पः। १२.कन्याप्रकर्म। १३. अतिचारदण्डः। इति कण्टकशोधनं चतुर्थमधिकरणम्॥**

सर्वाधिकरणरक्षणम्

**व्याख्या-** सर्वाधिकरणरक्षणम् इति सूत्रम्। अधिकरणशब्देन लक्षणया अध्यक्षप्रचाराधिकरणोक्ता अध्यक्षास्तन्नियम्याः पुरुषाश्च गृह्यन्ते। तेभ्यः सर्वेभ्यः प्रजानां धनस्य च रक्षणमिति सूत्रार्थः ॥9॥

एकाङ्गवधनिष्क्रयः इति सूत्रम्। एकाङ्गं हस्तः पादः कर्ण इत्येव जातीयं तस्य वधश्छेदनम् एकाङ्गवधः तद्युक्तो निष्क्रयः वधस्थानीयो धनदण्डश्चष्पादपञ्चाशत्पणादिः ॥10॥

शुद्धचित्रश्च दण्डकल्पः इति सूत्रम् । शुद्धः चित्र इति द्विविधो दण्डविधिः। तत्र शुद्धः अक्लेशमारणं, चित्रः क्लेशमारणम्॥ 11॥

कन्याप्रकर्म इति सूत्रम्। कन्याया-अपुष्पितायाः स्त्रियाः प्रकर्म-दूषणम्। तत्सम्बद्धो दण्डविधिरत्रोच्यत इत्यर्थः ॥12॥

अतिचारदण्डः इति सूत्रम्। अतिचारः अभक्ष्यभक्षणम् अगम्यागमनम् इत्येवमादिः तन्निमित्तो दण्ड उच्यत इत्यर्थः॥ 13 ॥

इति कण्टकशोधनमित्यादि। एवं त्रयोदशप्रकरणं दुर्गराष्ट्रङ्कण्टकशो-धनप्रतिपादकं चतुर्थमधिकरणम् समुद्दिष्टमित्यर्थः।

## पञ्चमाधिकरणम्

**१. दाण्डकर्मिकम् । २. कोशाभिसंहरणम् । ३. भृत्यभरणीयम् । ४. अनुजीविवृत्तम् । ५. सामयाचारिकम् । ६. राज्यप्रतिसन्धानम् । ७. एकैश्वर्यम् । इति योगवृत्तं पञ्चममधिकरणम् ॥**

योगवृत्तं नाम पञ्चममधिकरणम्

**व्याख्या-** अथ योगवृत्तं नाम पञ्चममाधिकरणम् । योगो विस्रब्धघाती तद्वृत्तं तंञ्चोपांशुदण्डादिकम् । राजराज्यकण्टकविषय उपांशुदण्डादि प्रयोगोऽस्मिन्नधिकरणेऽभिधास्यते । तत्रेदं प्रथमं सूत्रंदाण्डकर्मिकम् इति । दण्ड उपांशुवधः तस्य कर्म प्रयोगः दण्डकर्म तत्सम्बद्धमिहोच्यत इत्यर्थः ॥1॥

कोशाभिसंहरणम् इति सूत्रम् । कोशस्य सुवर्णादेः अभिसंहरणं पूर्वत आधिक्येन सङ्ग्रहणमर्थकृच्छ्रप्राप्तावित्यर्थः ॥2॥

भृत्यभरणीयम् इति सूत्रम् । भृत्याः बुद्धौ शास्त्रे कर्मणि चसाहाय्यादायिनः तेषां भरणपोषणं तत्सम्बद्धं भृत्यभरणीयम् ।।3॥

अनुजीविवृत्तम् इति सूत्रम् । अनुजीविनो मन्त्रिप्रभृतयः तैः स्वामिनि कथं वर्तितव्यमित्येतदत्रोपदिश्यत इत्यर्थः ॥ 4 ॥

सामयाचारिकम् इति सूत्रम्। समयो व्यवस्था आचारः अनुष्ठानं समयाचारमधिकृत्य प्रवृत्तं सामयाचारिकम् ॥ 5॥

राज्यप्रतिसन्धानम् इति सूत्रम् । राज्यस्य प्रतिसन्धानं राजव्यसने सति तत्पुत्रानभिषिच्य यत् परिचिन्तनममात्यैः क्रियते तदिहोच्यत इत्यर्थः । इदमुचरं च प्रकरणमेकास्मिनध्याये समावेशितम् ॥ 6 ॥

एकैश्वर्यम् इति सूत्रम्। एकस्यैव राजपुत्रस्यैकातपत्रमैश्वर्यं कर्तव्यम् इत्येतदुच्यत इत्यर्थः। एकग्रहणं बहूनामैश्वर्यकरणे अराजकत्वप्रसङ्ग इति द्योतनार्थम्॥ 7॥

इति योगवृत्तमित्यादि। एवं सप्तप्रकरणं योगवृत्ताख्यं पञ्चममधिकरणं समुद्दिष्टमित्यर्थः॥

**षष्ठमधिकरणम्**

**१.प्रकृतिसम्पदः। २.शमव्यायामिकन्। इति मण्डलयोनिः षष्ठमधिकरणम्।**

मण्डलयोनिः षष्ठमधिकरणम्।

**व्याख्या-** अथावापो यावत् त्रयोदशमधिकरणम्। तत्र षष्ठंमण्डलयोनिर्नाम। विजिर्गीष्वरिमध्यमोदासी नाख्यचतुरवयवं मण्डलं, योनिः उत्तराधिकरणार्थस्य षाड्गुण्यस्य विषयः। मण्डलं च तद् योनिश्च मण्डलयोनिः मण्डलात्मा षाड्गुण्यप्रकृतिरित्यर्थः। तत्र प्रथमं सूत्रप्रकृतिसम्पद इति। प्रकृतयः स्वाम्यामात्यसुहृत्कोशराष्ट्रदुर्गबलानि तासां सम्पदः अपेक्षितगुणपुष्कलता इहोच्यन्त इत्यर्थः॥ 1॥

शमव्यायामिकम् इति सूत्रम्। कर्मफलोपभोगाना क्षेमसाधनं शमः व्यायामस्तु कर्मारम्भोपकरणानां कर्मयोगघटकः, तदुभयमस्मिन् प्रकरणे प्रतिपाद्यत इत्यर्थः॥ 2॥

इति मण्डलयोनिरित्यादि। एवं द्विप्रकरणं मण्डलयोन्यधिकरणं षष्ठं समुद्दिष्टमित्यर्थः॥

## सप्तममधिकरणम्

**१. षाड्गुण्यसमुद्देशः । २.क्षयस्थानवृद्धिनिश्चयः । ३.संश्रयवृत्तिः । ४. समहीनज्यायसां गुणाभिनिवेशः। ५. हीनसन्धयः।**

सप्तमः - षाड्गुण्याधिकरणम्

अथ । षाड्गुण्याधिकरणे प्रथमे सूत्रं षाड्गुयसमुद्देश इति । सन्ध्यादीनां षड्गुणानां संक्षिप्य प्रतिपादनमिति सूत्रार्थः ॥ 1॥

तत् किमर्थमित्यपेक्षायां क्षयस्थानवृद्धिनिश्चय इति सूत्रम्। क्षयो ह्रासः, स्थानं तादवस्थ्याम् वृद्धिः उपचयः तेषा निश्चयः स्वरूपावधारणम्। तदिहोच्यत इत्यर्थः। प्रकरणमिदं पूर्वं चैकस्मिन्नध्याये समावेशितम् ॥2॥

क्षीणकार्यं वक्तुं सूत्रं संश्रयवृत्तिः इति। प्रबलमाश्रित्य वर्तनमिति सूत्रार्थः ॥ 3 ॥

समहीनज्यायसाम् गुणाभिनिवेशः इति सूत्रम्। समः शत्रुणा सदृशशक्तिः हीनः निकृष्टः ज्यायान् उत्कृष्टः। आसां तिसृस्ववस्थासु गुणस्थापनात्रोच्यत इत्यर्थः ॥ 4॥

हीनसन्धयः इति सूत्रम्। हीनेन कोशदण्डभूमीः प्रादाय करणीयाः संधयः इह वर्ण्यन्ते इत्यर्थः।

**६.विगृह्यासनम्। ७.सन्धायासनम्। ८०.विगृह्य यानम्। ९. सन्धाय यानम्। १०.सम्भूय प्रयाणम्। ११. यातव्यामित्रयोरभिग्रहचिन्ता। १२.क्षयलोभविरागहेतवः प्रकृतीनाम्। १३. सामवायिकविपरिमर्शः। १४.संहितप्रयाणिकम्।**

विगृह्यासनम्

**व्याख्या-**विगृह्यासनम् इति सूत्रम्। शत्रुणा सह विगृह्यशत्रो र्धान्यादिप्राप्तिप्रतिघातं कृत्वा स्वविषये स्थितिरिति सूत्रार्थः ॥6॥

सन्धायासनम् इति सूत्रम्। अभियानाशक्तौ परेण सन्धि कृत्वावस्थानमित्यर्थः ॥ 7 ॥

विगृह्य यानम् इति सूत्रम्। पार्ष्णिग्राहादिभिः सह विग्रहं कृत्वा परं प्रति अभियानमित्यर्थः ॥ 8॥

सन्धाय यानम् इति सूत्रम्। पार्ष्णिग्रहादिभिः सह सन्धिं कृत्वा शत्रुमुद्दिश्य यानमित्यर्थः ॥ 9 ॥

सम्भूय प्रयाणम् इति सूत्रम् । समहीनज्यायसां शत्रुं प्रति समुदेत्य प्रयाणमित्यर्थः ॥ 10 ॥

यातव्यामित्रयोरभिग्रहचिन्ता इति सूत्रम् । अरिसम्पद्युक्तो व्यसनी च यातव्यः, अमित्रो नित्यापकारी शत्रुः, अभिग्रहो यानम्। यातव्यामित्रयोः कतरं प्रति यानमनुष्ठेयामिति सम्प्रधारणमिहोच्यत इत्यर्थः ॥11 ॥

क्षयलोभविरागहेतवः प्रकृतीनाम् इति सूत्रम्। क्षयः गजवाजिपुरुषधनादीनामपचयः, लोभः अतितृष्णा, विरागः प्रद्वेषः, तदुत्पत्तिहेतवोऽमात्यादीनामिहाभिधीयन्त इत्यर्थः ॥ 12 ॥

सामवायिकविपरिमर्शः इति सूत्रम् । समवायेन चरन्ति सामवायिकाः विजिगीष्वनुयायिनो राजानः तेषां विपरिमर्शः गुरुलघुभाव चिन्तनमित्यर्थः ॥ 13 ॥

संहितप्रयाणिकम् इति सूत्रम्। संहितयोः अन्योन्यकृतसन्धिकयोः शत्रुविजिगीष्वोः प्रयाणं भिन्नदिक्कं यानं, तदिह प्रतिपाद्यत इत्यर्थः ॥14॥

**१५.परिपणितापरिपणितापसृताश्च सन्धयः। १६.द्वैधीभाविकाः सन्धिविक्रमाः । १७ यातव्यवृत्तिः । १८.अनुग्राह्यमित्रविशेषाः । १९ .**

**मित्रहिरण्यभूमिकर्मसन्धयः। २०.पार्ष्णिग्राहचिन्ता। २१.हीनशक्ति-पूरणम्। २२.बलवता विगृह्योपरोधहेतवः। २३.दण्डोपनतवृत्तम्।**

**व्याख्या-** परिपणितापरि पणितापसृताञ्च सन्धयः इति सूत्रम्। देशकालकार्यव्यवस्थया कृतः मन्त्रिपरिपणितसन्धिः, तद्विपरीतोऽपरि पणितसन्धिः, कुतोऽपि निमित्तान् स्वपक्षादपसृतेन पुनः सन्धिः अपसृतसन्धिः, त इमे सन्धय इह व्युत्पाद्यन्त इत्यर्थः॥ 15॥

द्वैधीभाविकाः सन्धिविक्रमाः इति सूत्रम्। सन्धिविग्रहोपादानं द्वैधीभावः तत्सम्बद्धाः सन्धिविक्रमाः कथ्यन्त इत्यर्थः॥ 16॥

यातव्यवृत्तिः इति सूत्रम्। यातव्यो विजिगीषुः तस्य सामवायिकेषु वृत्तिः यातव्ये सामवायिकानां वृत्तिश्चोच्यत इत्यर्थः॥ 17॥

अनुग्राह्यमित्रविशेषाः इति सूत्रम्। भूम्येकान्तरा राजानो मित्राणि। तत्र कानि मित्राणि साहाय्यदानेनानुग्राह्याणि कानि नेति विचारोऽत्र क्रियत इत्यर्थः॥ 18॥

मित्रहिरण्यभूमिकर्मसन्धयः इति सूत्रम्। मित्रेण हिरण्येन भूम्या कर्मणा च ये सन्धयः पणबन्धाः त इहाभिधीयन्त इत्यर्थः। इदं प्रकरणं चतुरध्यायीरूपम्॥ 19॥

पार्ष्णिग्राहचिन्ता इति सूत्रम्। पार्ष्णिग्राहावस्थापन्नस्य विजिगीषोः चिन्ता अनुष्ठानविचार इत्यर्थः॥ 20॥

हीनशक्तिपूरणम् इति सूत्रम्। अपचितानां प्रभुमन्त्रोत्साहशक्तीनां वर्धनमिहोच्यत इत्यर्थः॥ 21॥

बलवता विगृह्योपरोधहेतव इति सूत्रम्। प्रबलेन शत्रुणा सह विगृह्य दुर्गप्रवेशस्य कारणान्यभिधीयन्त इत्यर्थः ॥ 22 ॥

दण्डोपनतवृत्तम्

दण्डोपनतवृत्तम् इति सूत्रम्। दण्डेन बलेन उपनतः अधःकृतः तदवस्थापन्नस्य विजिगीषोर्बलवन्तं प्राप्यंगम् उच्यते इत्यर्थः।

**२४. दण्डोपनायिवृत्तम्। २५. सन्धिकर्म। २६ सन्धिमोक्षः। २७. मध्यमचरितम्। २८. उदासीनचरितम्। २९. मण्डलचरित्तम्। इति षाड्गुण्यं सप्तममधिकरणम्॥**

**व्याख्या-** दण्डोपनायिवृत्तम् इति सूत्रम्। दण्डेन बलेन शत्रुमात्मनः समीपमुपनयति उपनमयतीति दण्डोपनायी तदवस्थस्य विजिगीषणे वृत्तमुच्यत इत्यर्थः॥ 24 ॥

सन्धिकर्म इति सूत्रम्। सन्धेः शपथादिना दृढीकरणमुच्यत इत्यर्थः॥25॥

सन्धिमोक्षः इति सूत्रम्। सन्धिनिमित्तं ग्रहीकृतः सन्धिरित्युपचर्यते तस्य मोक्षो मोचनमुच्यत इत्यर्थः॥ 26 ॥

मध्यमचरितम् इति सूत्रम्। मध्यमेषु विजिगीषोर्वृत्तिरुच्यत इत्यर्थः। एतदादिप्रकरणत्रयमेकस्मिन्नध्याये सन्निवेशितम्॥ 27 ॥

उदासीनचरितम् इति सूत्रम्। उदासीनं प्रति विजिगीषोरनुष्ठान-मभिधीयते इति सूत्रार्थः॥ 28 ॥ मण्डलचरितम् इति सूत्रम्। मण्डलम् अरिमित्रलक्षणम्। तत् प्रति विजिगीषोरनुष्ठानमुच्यत इति सूत्रार्थः॥29 ॥इति षाड्गुण्यं सप्तममधिकरणमिति। एवमेकोनत्रिंशत्प्रकरणं षाड्गुण्या धिकरणं सप्तमं समुद्दिष्टमित्यर्थः॥

**अष्टममधिकरणम्**

**१. प्रकृतिव्यसनवर्गः। २. राजराज्ययोर्व्यसनचिन्ता।**

अष्टमाधिकरणम्-व्यसनाधिकारिकम्

**व्याख्या-** अथ व्यसनाधिकारिकेऽधिकरणे प्रथमं सूत्रं प्रकृतिव्यसनत्रर्गः इति। प्रकृतयः स्वाम्यमात्यादयः, व्यसनानि गुणप्रातिलोम्यादीनि, तेषां वर्गः समूहोऽभिधीयत इत्यर्थः ॥ 1 ॥

राजराज्ययोर्व्यसनचिन्ता इति सूत्रम्। राजा स्वामी, राज्यम् अमात्यादिप्रकृतिपञ्चके द्रव्यप्रकृतिपञ्चकं च, तयोर्व्यसनचिन्ता व्यसनगुरुलघुभावसम्प्रधारणमुच्यत इत्यर्थः ॥ 2 ॥

**३. पुरुषव्यसनवर्गः। ४.पीडनवर्गः। ५. स्तम्भनवर्गः। ६. कोशसङ्गवर्गः। ७.बलव्यसनवर्गः। ८.मित्रव्यसनवर्गः। इति व्यसनाधिकारिकमष्टम-मधिकरणम्॥**

**व्याख्या-** पुरुषव्यसनवर्गः इति सूत्रम्। पुरुषस्य व्यसनानि व्यसनप्रभवा दोषाः तेषां वर्गोऽमेघासत इत्यर्थः ॥3 ॥

पीडनवर्गः इति सूत्रम्। अग्न्युदकादिनिमित्ताः शक्त्यपचयाः पीडनानि, तेषां वर्गः: संख्यास्वरूपगौरवलाघवतोऽभिधीयत इत्यर्थः। एतदादि प्रकरणत्रयमेकस्मिन्नध्याये समावेशितम्॥ 4 ॥

स्तम्भनवर्गः इति सूत्रम्। स्तम्भनं प्रत्यूहोक्त्या राजकार्योपरोधः तद्धेतूनां वर्ग उच्यत इति सूत्रार्थः ॥ 5 ॥

कोशसङ्गवर्गः इति सूत्रम्। कोशस्य राजार्थस्य सङ्गः अप्रदानं कोशसङ्गः तद्धेतुवर्गः उच्यत इत्यर्थः॥ 6 ॥

चलव्यसनवर्गः इति सूत्रम् । बलं चतुरङ्गं सैन्यं मौलभृतकादिभेदेन षड्विधं तस्य व्यसनवर्गः अमानितविमानितादित्रयस्त्रिंशत्प्रकारोऽभिधीयत। इत्यर्थः ॥ 7 ॥

मित्रव्यसनवर्गः इति सूत्रम्। स्पष्टार्थम्। प्रकरणद्वयमिदमेकाध्यायगतम् ॥ 8 ॥ इति व्यसनाधिकारिकमित्यादि। एवमष्टप्रकरणं व्यसनाधिकारेण प्रवृत्तमष्टममधिकरणं समुद्दिष्टमित्यर्थः ॥

## नवमधिकरणम्

अभियास्यत्कमाख्यं नवमधिकरणम्

**१.शक्तिदेशकालबलाबलज्ञानम्। २.यात्राकालाः।**

अथ अभियास्यत्कमाख्यं नवमधिकरणम्। अभियास्यतो विजिगीषोः अभियानात् प्राक् चिन्तनीयमर्थजातमस्मिन्नधिकरणे उपदेक्ष्यते। तत्र प्रथमं सूत्रं - शक्तिदेशकालबलाबलज्ञानम् इति। शक्तेर्देशस्य कालस्य च बलाबलज्ञानमुपदिश्यत इत्यर्थः। इदं प्रकरणमुत्तरं चैकाव्यायगते ॥ 1 ॥ यात्राकालाः इति सूत्रम्। शत्रुं प्रति अभियाने यात्रा तद्योग्याःकालाः ऋतवः उच्यन्ते इत्यर्थः ॥ 2 ॥

**३.बलोपादानकालाः। ४.सन्नाहगुणाः। ५.प्रतिबलकर्म। ६.पश्चात्कोपचिन्ता। ७.बाह्याभ्यन्तरप्रकृतिकोपप्रतीकारः। ८. क्षयव्ययलाभविपरिमर्शः। ९.बाह्याभ्यन्तरश्चापदः। १०.दूष्यशत्रुसंयुक्ताः। ११.अर्थानर्थसंशययुक्ताः। १२. तासामुपायविकल्पजाः सिद्धयः । इत्यभियास्यत्कर्म नवममधिकरणम्।।**

**व्याख्या-** बलोपादानकालाः इति सूत्रम्। बलानि मौलभृतकादीनि षट् तेषाम् उपादानकालाः उद्योजनसमयाः। अमुकबलममुकसमये समुद्योजयितव्यमित्ययमर्थ इह चिन्त्यत इत्यर्थः ॥ 3 ॥

सन्नाहगुणाः इति सूत्रम्। सन्नाहः शस्त्रावरगग्रहणं तस्य गुणाः श्रेष्ठत्व प्रकाराः कथ्यन्त इत्यर्थः ॥ 4 ॥

प्रतिबलकर्म इति सूत्रम्। परबलाभिभवसमर्थं बलं प्रतिबलं, तस्य करणप्रकार उच्यत इत्यर्थः ॥ 5 ॥

पश्चात्कोपचिन्ता इति सूत्रम्। पश्चात्कोपः पार्ष्णिग्राहादिकृतः कोपो दाहविलोपादि। स इह चिन्त्यत इत्यर्थः। इदमुत्तरं च प्रकरणमेकाध्यायगते ॥ 6 ॥

बाह्याभ्यन्तरप्रकृतिकोपप्रतीकारः इति सूत्रम्। बाह्यप्रकृतयो राहुमुख्यान्तपालादयः, आभ्यन्तरप्रकृतयो मन्त्रिपुरोहितादयः, तासां कोपो व्यलीकजनिताश्चित्तविकारः, तस्य प्रतिविधानमुच्यत इति सूत्रार्थः ॥7॥

क्षयव्ययलाभविपरिमर्शः इति सूत्रम्। क्षयो युग्यपुरुषापचयः, व्ययो हिरण्यधान्यापचयः, लाभो यानफलं भूम्यादिप्राप्तिः, तेषां विपरिमर्शः गौरवलाघवसम्प्रधारणमभिधीयत इत्यर्थः ॥ 8 ॥

बाह्याभ्यन्तराश्चापदः इति सूत्रम्। बाह्यापदः बाह्यराष्ट्रमुख्यान्तपाद्युत्पादिता विपदः, आभ्यन्तरापदः मन्त्रिपुरोहिताद्युत्थापिताः, तासां स्वरूपं प्रतिविधानं चोपदिश्यत इत्यर्थः ॥ 9 ॥

दूष्यशत्रुसंयुक्ताः

दूष्यशत्रुसंयुक्ताः इति सूत्रम्। दूष्याः कृत्याः पौरजानपदास्तन्मुख्याश्च सहजकृत्रिमादयः, तत्संयुक्तास्तदुत्पादिताः आपद इति विशेष्यम् अनुवर्तते। ता इहोच्यन्ते स्वरूपतः प्रतिविधनातश्चेत्यर्थः। 10 ॥

अर्थानर्थसंशययुक्ताः इति सूत्रम्। अर्थो मित्रहिरण्यभूम्यादिः अनर्थ स्तन्नाशः शरीरनाशश्च, संशयः अर्थप्राणयोः सन्देहः, तैर्युक्ता आपद उच्यन्त इत्यर्थः। इदमुत्तरं च प्रकरणमेकाध्यायगतम्॥ 11 ॥

तासामुपायविकल्पजाः सिद्धयः इति सूत्रम्। तासां पूर्वोक्तानामापदाम् उपायविकल्पजाः उपायाः प्रशमार्थाः सामादयः तेषां विकल्पः प्रयोगभेदः तज्जनिताः सिद्धयः प्रतीकारा उच्यन्त इत्यर्थः॥ 12॥

इत्यभियास्यत्कर्मेत्यादि। एवं द्वादशप्रकरणमभियस्यत्कर्माख्यं नवममधिकरणं समुद्दिष्टमित्यर्थः ॥

**दशममधिकरणम्**

**१.स्कन्धावारनिवेशः। २.स्कन्धावारप्रयाणम्। ३. बलव्यसनावस्कन्द-कालरक्षणम् । ४. कूटयुद्धविकल्पाः। ५.स्वसैन्यप्रोत्साहनम् । ६. स्वबलान्यबलव्यायोगः। ७. युद्धभूमयः।**

साङ्ग्रामिकं दशममधिकरणम्

**व्याख्या**- अथ दशमे साङ्ग्रामिकेऽधिकरणे प्रथमं सूत्रं स्कन्धावारनिवेशः इति। सैन्यावासस्थानं स्कन्धावारः तस्य निवेशो निर्माणविधिरुच्यत इत्यर्थः॥ 1॥

स्कन्धावारप्रयाणम् इति सूत्रम्। स्कन्धावारस्य कटकस्य देश कालाद्यनु गुणसन्नाहपुरस्सरमभिषेणनमुच्यत इत्यर्थः। इदमुत्तरं च प्रकरणमेका ध्यायगतम्॥ 2॥

बलव्यसनावस्कन्दकालरक्षणम् इति सूत्रम्। अमानितविमानितादीनि बलव्यसनानि अवस्कन्दकालादीर्घकान्तारानुदकाद्यध्वगमनकालाः तेभ्यः सैन्यसंरक्षणमुच्यत इत्यर्थः॥ 3 ॥

कूटयुद्धत्रिकल्पाः इति सूत्रम् । कूटयुद्धं नाम कपटयुद्धं बलव्यसनावस्कन्दकालादिच्छिद्रमुपलभ्य शत्रुहिंसनं, तस्य विकल्पाः भेदाः कथ्यन्त इत्यर्थः। एतदादिप्रकरणत्रयमेकाध्यायगतम्॥ 4॥

स्वसैन्यप्रोत्साहनम् इति सूत्रम् । आत्मयोधानां संग्रामगुणसंकीर्तनादिना युद्धोत्सहजननम् उच्यन्ते इत्यर्थः॥ 5॥ स्वबलान्यबसव्यायोग इति सूत्रम्। स्वसैन्यस्य परसैन्यापेक्षया व्यायोगः विशिष्टमायोजनं व्यवस्थापनं दिक्सूर्यवाताद्यनुगुणं यथा स्यात् तथा व्यूहरचनमिति यावत्। तदिहोच्यते॥ 6॥

युद्धभूमयः इति सूत्रम्। युद्धानुगुणाः समस्थिराभिकाशादिलक्षणाः भूमयः कथ्यन्ते इत्यर्थः॥7॥

**८.पत्त्यश्वरथहस्तिकर्माणि। ९. पक्षकक्षोरस्यानां बलाग्रतो व्यूहविभागः। १०. सारफल्गुबलविभागः। ११. पत्त्यश्वरथहस्तियुद्धानि। १२. दण्डभोगमण्डलासंहतव्यूहव्यूहनम्। १३. तस्य प्रतिव्यूहसंस्थापनम्। इति साग्रामिकं दशममधिकरणम्॥**

पत्त्यश्वरथहस्तिकर्माणि इति सूत्रम्। पत्तिः पदातिः तदादीनां व्यापारा उच्यन्त इत्यर्थः॥ 8॥

पक्षकक्षोरस्यानां बलाग्रतो व्यूहविभागः इति सूत्रम्। पक्षौपञ्चव्यूहात्मना स्थाप्यमानस्य बलस्य बहिः पुरस्तात्कोट्यौ, कक्षौ पश्चादन्तःपार्श्वे, उरस्यम् मध्यम्, एषां पञ्चानां व्यूहविशेषाणां बलपरिमाणानुगुण्येन व्यूहविभागोऽभिधीयत इत्यर्थः। एतदादिप्रकरणत्रयमेकाध्यायगतम् ॥9॥ सारफल्गुबलविभागः इति सूत्रम्। सारबलं पितृपैतामहत्वादि दण्डसम्पत्युक्तं, तद्विपरीतं भीरुकं वा फल्गुबलं, तयोर्विभागो विभज्यावस्थापनं चिन्त्यत इति सूत्रार्थः॥ 10 ॥पत्त्यश्वरथहस्तियुद्धानि

इति सूत्रम्। स्पष्टार्थम्॥ 11 ॥ दण्डभोगमण्डलासंहतव्यूहव्यूहनम् इति सूत्रम्। दण्डव्यूहो भोगव्यूहो मण्डलव्यूहः असंहतव्यूहः इत्येतेषां प्रकृतिव्यूहांनां तद्विकृतिव्यूहानां च रचनमभिधीयत इत्यर्थः। इदमुत्तरं च प्रकरणमेकाध्यायगतम्॥ 12 ॥

तस्य प्रतिव्यूहसंस्थापनम् इति सूत्रम्। तस्य दण्डादिव्यूहनस्य अर्थाद् दण्डादिव्यूहानां प्रतिव्यूहस्थापनमुच्यत इत्यर्थः ॥ 13 ॥

इति साङ्गामिकं दशममधिकरणमिति। संग्राममधिकृत्य प्रवृत्तं सांग्रा-मिकं तदाख्यं दशमाधिकधिकरणम्। इत्थं त्रयोदशप्रकरणं समुद्दिष्ट मित्यर्थः।

## एकादशमधिकरणम्

**१. भेदोपादानानि। २. उपांशुदण्डः। इति सङ्घवृत्तं एकादशमधि करणम्।।**

सङ्घवृत्तेऽधिकरणम्

अथैकादशे सङ्घवृत्तेऽधिकरणे प्रथमं सूत्रं भेदोपादानानि इति। भेदः सङ्घविश्लेषोपायः तस्य उपादानानि प्रयोगा उच्यन्त इत्यर्थः॥ 1 ॥
उपांशुदण्डः इति सूत्रम्। तूष्णीदण्डः निगृढवध उच्यत इत्यर्थः॥ 2 ॥

इति सङ्घवृत्तमेकादशमधिकरणमिति। सङ्घः शस्त्रोपजीविनां सङ्घीभावै बलानां राजाविधेयानां समूहः, तस्मिन् वृत्तं तद्विधेयीकरणानुकूले राज्ञो व्यापारः तत्प्रतिपादकम् एवं द्विप्रकरणम् एका दशमधिकरणं समुद्दिष्टमित्यर्थः। एतच्चैकाध्ययनम्।

## द्वादशमधिकरणम्

**१. दूतकर्म। २. मन्त्रयुद्धम्। ३. सेनामुख्यवधः। ४. मण्डलप्रोत्साहनम्। ५. शाखाग्निरसप्रणिधयः। ६. विवधासारप्रसारवधः।**

आबलीयसं द्वादशमधिकरणम्

**व्याख्या**-अथ आबलीयसं नाम द्वादशमधिकरणम्। अबलीयान् दुर्बलतरः तस्येदमाबलीयसं प्रबले सन्धिमनिच्छति सति दुर्बलतरस्य कृत्यम्। तदिह प्रतिपाद्यते। तत्र प्रथमं सूत्रं दूतकर्म इति। दूतो नाम निसृष्टार्थाः परिमितार्थाः शासनहरा इति त्रिविधाः तेषां व्यापारोऽभिधीयत इत्यर्थः॥ 1॥

मन्त्रयुद्धम् इत्ति सूत्रम्। मन्त्रः प्रचारकः प्रज्ञात्कोत्कर्षः, तेन युद्धं मन्त्रयुद्धम्। तच्च शत्रुषड्वर्गवरागानेकभूमिपतिनाशोदाहरणादिना शत्रोर्मतिमुपजनय्य वञ्चनम्। तदिहोच्यत इति सूत्रार्थः॥ 2॥

सेनामुख्यवधः इाते सूत्रम्। सेना चतुरङ्गबले तत्र मुख्याः सेनापत्यादयः तेषां वधोपाय उच्यत इत्यर्थः। इदमुत्तरं चैकाध्यायगतम्॥ 3॥

मण्डलप्रोत्साहनम् इति सूत्रम्। मण्डले मित्रादिमण्डले तस्य प्रोत्साहनम् आत्मरक्षार्थमुद्योजनं विजिगीषुणा कर्तव्यमुच्यत इत्यर्थः॥ 4॥

शस्त्राग्निरसमणीयः इति सूत्रम्। शस्त्राग्निरसानां गूढप्रयोगा उच्यन्त इत्यर्थः। इदमुत्तरं चैकाध्यायगतम्॥ 5॥

विवधासारप्रसारवधः इति सूत्रम् । विवधः पर्याहारः उपचारात् पर्याहारवाही स्वप्रजासकाशलभ्यायभारानेता, आसारः सुहृद्बलं, प्रसारो वनाद् यवसेन्धनाहर्ता, तेषां वध उच्यत इत्यर्थः॥ 6॥

**७. योगातिसन्धानम्। ८. दण्डातिसन्धानम्। ९. एकविजयः। इत्याबलीयसं द्वादशमधिकरणम्॥**

**व्याख्या-**

योगातिसन्धानम् इति सूत्रम्। योगः कपटोपायः देवतागृहप्रवेशाद्यवसरे शत्रोरुपरि शिलायन्त्रमोक्षणभित्तिपातनादेः तेनातिसन्धानमुच्यत इत्यर्थः। एतदादिप्रकरणत्रयमेकध्यायान्तर्गतम्॥ 7॥

दण्डातिसन्धानम् इति सूत्रम्। दण्डो वधपरिक्लेशार्थाहरणादिः, तेनशत्रो रभिभवनमुच्यत इत्यर्थः॥ 8॥

एकविजयः इति सूत्रम्। एकेन सहायनिरपेक्षेणैव विजिगीषुणा विजयः शत्रोरभिभव उच्यत इत्यर्थः॥ 9॥

इत्याबलीयसमित्यादि। एवं नवप्रकरणमाबलीयसं द्वादशमधिकरणं समुद्दिष्टमित्यर्थः॥

## त्रयोदशमधिकरणम्

**१. उपजापः। २. योगवामनम्। ३. अपसर्पप्रणिधिः। ४. पर्युपासनकर्म। ५.अवमर्दः। ६.लब्धप्रशमनम्। इति दुर्गालम्भोपायः त्रयोदशमधिकरणम्।।**

त्रयोदशं दुर्गलम्भोपायाख्यमधिकरणम्

अथ त्रयोदशं दुर्गलम्भोपायाख्यमधिकरणमारभ्यते। दुर्गिरयः परकीयस्य प्राप्युपायोऽस्मिन्नधिकरण उपदिश्यते। तत्र प्रथमं सूत्रम् - उपजाप इति। उपजापो भेदः उच्यत इत्यर्थः॥ 1॥

योगवामनम् इति सूत्रम्। योगो मुण्डजटिलादिवेषान्यत्वग्रहणं तेनोपायेन वामनं शत्रोर्दुर्गानिष्क्रामणमभिधीयत इत्यर्थः॥ 2॥

अपसर्पप्रणिधिः इति सूत्रम्। अपसर्पा गूढपुरुषाः तेषां प्रणिधानं शत्रु विषये निवासनमुच्यत इत्यर्थः॥ 3॥

पर्युपासनकर्म इति सूत्रम्। परदुर्गं परित उपासनकर्म सैन्यानिवासन व्यापार उच्यत इत्यर्थः। इदमुत्तरं चैकाध्यायगतम्॥ 4॥

अवमर्दः इति सूत्रम्। अवमर्दः परदुर्ग्रहणम् तत् कदा केन प्रकारेण कर्तव्यमित्ययमर्थो अभिधीयते इत्यर्थ॥ 5॥

लब्धप्रशमनम् इति सूत्रम्। विजिगीषुणा लब्धस्य शत्रुदुर्गादेः प्रशमनं लब्धप्रशमनम्। तच्च दुर्गादिवासिनाम् अपूर्वभूपतिविषयशङ्काद्यपोहनेन विजिगीषौ विस्त्रम्भजननम्। तदभिधीयत इति सूत्रार्थः॥ 6॥

इति दुर्गलम्भोपाय इत्यादि। एवं षट्प्रकरणं दुर्गलम्भोपायारूयं त्रयोदश मधिकरणं समुद्दिष्टामत्यर्थः॥

## चतुर्दशमधिकरणम्

**१.परघातप्रयोगः। २.प्रलम्भनम्। ३.स्वबलोपघातप्रतीकारः। इत्यौपनिषदं चतुर्दशमधिकरणम्॥**

औपनिषदं चतुर्दशमधिकरणम्

**व्याख्या-** अथौपनिषदं चतुर्दशमधिकरणम्। उपनिषत् शत्रुजयोपाय रहस्यं तदधिकृत्य प्रवृत्तमौपनिषदम्। तत्र प्रथमं सूत्रं परघातप्रयोग इति। शत्रुवधार्थ औषधप्रयोग उच्यत इत्यर्थः॥ 1॥

प्रलम्भनम् इति सूत्रम्। औषधमन्त्रप्रयोगद्वारेण क्षुत्प्रतीकारवि रूपकरणादिना शत्रुवञ्चनमुच्यत इत्यर्थः। अद्भुतोत्पादनं भैषज्यमन्त्र प्रयोग इति द्विधा विभज्य प्रकरणमिदमध्यायद्वयेने वितन्यते। तत्र मार्जारोष्ट्रादिचअस्साबितचूर्णादिकं भैषज्यं दृश्यादृश्यकरणादिसाधनं, 'बलिं वैरोचनमि'त्यादिर्मन्त्रः॥ 2 ॥स्वबलोपघातप्रतीकारः इति सूत्रम्।

स्वबलस्य स्वसैन्यस्यपरप्रयुक्त विषाम्बुदूषणादिनिमित्तो य उपघातः तस्य प्रतीकारोऽभिधीयत इत्यर्थः ॥ 3 ॥

इत्यौपनिषदमित्यादि। एवं त्रिप्रकरणम् औपनिषदं चतुर्दशमधिकरणं समुद्दिष्टमित्यर्थः। औपनिषदिकमित्यपि पाठः।

## पञ्चदशमधिकरणम्

**१. तन्त्रयुक्तयः। इति तन्त्रयुक्तिः पञ्चदशमधिकरणम्॥**

तन्त्रयुक्तिर्नाम पञ्चदशमधिकरणम्

अथान्तिमं तन्त्रयुक्तिर्नाम पञ्चदशमधिकरणम्। तन्त्रंतन्त्रावापात्म कमिदमर्थशास्त्रं तस्य युक्तिः व्याख्यानोपायभूतेः न्यायः स इह प्रतिपाद्यते। तत्रेदं सूत्रं तन्त्रयुक्तय इति। तन्त्रोपयुक्ता युक्तयः अधिकरणविधानादयो द्वात्रिंशदस्मिन् प्रकरणेऽभिधीयन्त इति सूत्रार्थः ॥ 1॥

इति तन्त्रयुक्तिरित्यादि। एवमेकमकरणकमिदं तन्त्रयुक्त्याधिकरणं समुद्दिष्टमित्यर्थः।

**शास्त्रसमुद्देशः पञ्चदशाधिकरणानि सपञ्चाशदध्यायशतं साशीति प्रकरणशतं षद् श्लोकसहस्राणीति।**

**सुखग्रहणविज्ञेयं तत्त्वार्थपदनिश्चितम्।**

**कौटिल्येन कृतं शास्त्रं विमुक्तग्रन्थविस्तरम्॥**

**इति कौटिलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणेप्रथमोऽध्यायः राजवृत्तिः ॥**

अथ सर्वप्रकारेयत्ताख्यनेन कृत्स्नस्य शास्त्रस्य समुद्देशमाहशास्त्रसमुद्देश इत्यादयः। श्लोक इह द्वात्रिंशद् अक्षराणि, येषां समुदाय एको ग्रन्थ इति गण्यते। शेषं स्पष्टम्।

व्युत्पित्सुप्ररोचनार्थं स्वशास्त्रस्य तन्मृग्यगुणपुष्कलां श्लोकेनाह सुखेत्यादिना। सुखं क्लेशासहं ग्रहणं बुद्धिर्येषां ते सुखग्रहणाः सुकुमारमतयः तैरपि विज्ञेयं विज्ञातुं शक्यम्। तदन्यविज्ञेयत्वं तु कैमुत्यसिद्धम्। तत्त्वार्थपदनिश्चितं तत्त्वम् अर्थस्य याथात्म्यं, अर्थः शब्दाभिधेयः, पदं वाचकशब्दः, तत्त्वतोऽर्थतः पदतश्च निश्चितम्। किं यथाप्रतिपादितमेवार्थस्य याथात्म्यम् उतान्यदपि स्यादिति सन्देहानुत्थापकं तत्त्वनिश्चितम्, अर्थपदयोरन्यूनानतिरिक्ततया सन्देहाजनकम् अर्थपदनिश्चितमिति बोद्धव्यम्। तत्त्वार्थपदानि निश्चितानि यस्मिन्निति बहुव्रीहिर्वा। तदा तु निश्चितशब्दस्य परनिपात आहिताग्न्यादित्वात् साध्यः। इतीत्याद्यध्यायसमाप्तिवाक्यम्। तत्र प्रान्ते राजवृत्तिरिति प्रतिपाद्यसूचनम्, एतदध्यायसंक्षिप्तस्य कृतशास्त्रार्थस्य राजसम्बन्धि व्यापारात्मकत्वात्॥

## प्रकरणं विद्यासमुद्देशः

### द्वितीयोऽध्यायः-आन्वीक्षिकीस्थापना

आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिश्चेति विद्याः।।

**त्रयी वार्त्ता दण्डनीति श्चेति मानवाः, त्रयीविशेषो आन्वीक्षीति।**

आन्वीक्षिकी त्रयी वार्त्ता दण्डनीति च

**वार्त्ता दण्डनीतिश्चेति बार्हस्पत्याः, संवरणमात्रं हि त्रयी लोकयात्राविद इति।**

**व्याख्या**-अथ समुद्देशनिर्देशक्रमेण अधिकरणप्रकरणानि व्याख्येयानि। तत्र तावत् प्रथमाधिकरणस्यादिमं प्रकरणं द्वितीयादिभिस्त्रिभिरध्यायैः प्रपञ्चते। विद्यासमुद्देश इति हि प्रथमं सूत्रम्। कास्ता विद्या इत्याकाङ्क्षायामाह- आन्वीक्षिकीत्यादि। अर्थतत्त्वस्य हेतुभिः परीक्षण-मन्वीक्षा सा प्रयोजनमस्या इति आन्वीक्षिकी हेतुविद्या। ऋग्यजुःसामानि त्रयी तेषाम् अभिचारकर्म ज्ञानादिफलादथर्ववेदाद् भिन्नप्रस्थानतया पृथपङ्क्ति- निवेश्यानां सम्भूयैकक्रतुकार्यसाधकत्वात् तत्समुदायस्य त्रयीति संज्ञा। कृषिः पाशुपाल्यं वणिज्या च वार्त्ता। दण्डनीतिस्तु राजनीतिः। इति एवं प्रसिद्धा इति शेषः।

कृषिः पाशुपाल्यं वणिज्या च वार्ता

तत्र मनुशिष्याणां पक्षमाह त्रयीत्यादि। आन्वीक्षिकी त्रयीविशेषो हि त्रय्यनुगामितया त्रय्यर्थविचाररूपतया च त्रय्याः प्रकार एव न विद्यान्तरमित्यर्थः। तत्र त्रय्यनुगामिनी आन्वीक्षिकी साङ्ख्ययोगतर्कशास्त्राणि, अन्या तु पूर्वोत्तरमीमांसे। आह च कामन्दकः "अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः। धर्मशास्त्रं पुराणं च त्रयीदं सर्वमुच्यते ।"इति।

बृहस्पतिशिष्याणां मतमाह वार्त्ता दण्डेत्यादि। त्रयी विद्यान्तरत्वाभावे हेतुमाह- संवरणमात्रं हीति। त्रयी, लोकयात्राविदः वार्तादण्डनी-त्यनुष्ठानलक्षणलोकतन्त्रविदुषः, संवरणमात्रं हि। नास्तिकोऽयमिति लोकनिन्दाद्वारसंवृतिसाधनमेव केवलम्। लोकतन्त्रसम्यनिर्वणसमर्थ मपि त्रय्यपरिग्राहिणं सन्तं नास्तिक इति लोको निन्देदिति त्रयीपरिग्रहस्य यथोक्तनिन्दाद्वारगोपनमात्रफलत्वेन अल्पप्रवचनात्वान्न सा विद्यान्तरमित्यभिप्रायः। त्रयी निरासेनतदन्तर्गताया आन्वीक्षिक्या अपि निरासः सिद्धः।

**दण्डनीतिरेका विद्येत्यौश्वनसाः, तस्यां हि सर्वत्रिद्यारम्भाः प्रतिबद्धा इति। चतस्र एव विद्या इति कौटिल्यः। ताभिर्धर्मार्थौ यद् विद्यात्, तद् विद्यानां विद्यात्वम्। साख्यं योगो लोकायतं चेत्यान्वीक्षिकी। धर्माधमौ त्रय्याम्। अर्थानर्थौ वार्त्तायाम्। नयापनयौ दण्डनीत्याम्। बलाबले चैतासां हेतुभिः अन्वीक्षमाणान्वीक्षिकी लोकस्योपकरोति, व्यसनेऽभ्युदये च बुद्धिमवस्थापयति, प्रज्ञावाक्यक्रियावैशारद्यं च करोति।**

**प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।**

**आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता॥**

**इति कौटिलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे**

**द्वितीयोऽध्यायः विद्यासमुद्देशे आन्वीक्षिकीस्थापना॥**

**व्याख्या-** मतान्तरमाह - दण्डनीतिरेकेत्यादि। दण्डनीतिः, एका एकैव, विद्या प्राधान्येन विद्याव्यपदेशमर्हतीत्यर्थः। इति, औशनसाः शुक्र शिष्याः, कुतः, सर्वासां विद्यानामारम्भाः योगक्षेमाः, तस्यां हि प्रतिबद्धाः दण्डनीतावेव प्रतिष्ठिताः, इति कृत्वा। यद् वक्ष्यति 'आन्वीक्षि कीत्रयीवार्त्तानां योगक्षेमसाधनो दण्डः' (अध्या०४) इति।

स्वमतमाह - चतस्र एवेत्यादि । विद्याः चतस्र एव, एवकारेण त्रित्वादिपक्षव्यवच्छेदः। आसां विद्यात्वविद्यान्तरत्वयोर्विद्यात्वमादौ निर्वचनमन्या स्थापयति - ताभिरित्यादि। विद्यात्वं नामधर्मार्थ वेदनकरणत्वम्। तच्चान्वीक्षिक्यादिषु चतसृषु अविशिष्टमित्यर्थः। विद्यान्तरत्वं तु परस्परविसदृशस्वरूपफलनिरूपणेन यथाक्रमंस्था पयिष्यते।

तत्रान्वीक्षिक्याः स्वरूपमाह- साङ्ख्यमित्यादि। साङ्ख्यं प्रकृतिपुरुष विवेचकं शास्त्रं कपिलप्रोक्तं, योगः प्रत्याहारध्यानधारणादिप्रतिपादकं महेश्वरप्रोक्तं, लोकायतं न्यायशास्त्रं ब्रह्मगार्ग्योक्तम्। एतत् त्रितयात्मिकान्वीक्षिकी। धर्माधर्मौत्रय्यामित्यादिना त्रय्यादीनां फल सूचनम्, तच्चान्वीक्षिकी फलस्य तद्विसदृशत्वव्युत्पादनार्थम्। धर्माधर्मा विति, प्राधान्येन प्रतिपाद्याविति शेषः। तेन त्रय्यामर्थानर्थनयापन-यानामानुषङ्गिकतया क्वचित् क्वचित् प्रतिपादनेऽप्यविरोधः। एवं वार्तादण्डनीत्योरपि ज्ञेयम्। तत्र धर्मोऽध्ययनयजनादिः, अधर्मः श्वमां सभक्षणादिः। अर्थः कालबीजवापादिजन्यं फलम्, अनर्थोऽकालबीज बापादिजन्यम्। नयो ज्यायसा सन्ध्यादिः येन योगक्षेमो निष्पाद्यते; अपनयस्तु ज्यायसा विग्रहादिः येन योगक्षेमो विहन्यते। एतासां त्रय्यादीनाम्। हेतुभिरन्वीक्षमाणा न्यायैः संप्रधारयन्ति। व्यसन इत्यादिना उपकारस्वरूपोक्तिः।

**व्याख्या-** बुद्धिमवस्थापयति अविकृतां करोति, बुद्धिर्दुःखे यथा नोद्विजेत सुखे च न प्रहृष्येत् तथा तां नियच्छतीत्यर्थः। यदाहुः 'न प्रहृष्येत् सुखं प्राप्य नोद्विजेता सुखादपि' इति। प्रज्ञावाक्यक्रियावैशारद्यं विचार वचनकर्मसु पाटवम्।

आन्वीक्षिकी सर्वविद्यानां प्रदीपः परीक्षणसाधनत्वात्

प्रदीप इति। आन्वीक्षिकी सर्वविद्यानां प्रदीपः परीक्षणसाधनत्वात्। सर्वकर्मणाम् उपायः आरम्भादिफलाधिगमपर्यन्तानुष्ठानवैचित्र्य प्रति भोत्पादकत्वात्। सर्वधर्माणां शश्वद् आश्रयः वैदिकलौकिकानां सर्वेषां धर्माणामन्वीक्षावधार्यत्वात् सर्वदा आश्रयभूता। एवञ्च त्रय्यादिवि सदृशस्वरूपफलत्वादान्वीक्षिक्या विद्यान्तरत्वं सिद्धमित्यभि प्रायः॥

**इति कौटिलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे द्वितीयोऽध्यायः - विद्यासमुद्देशे आन्वीक्षिकीस्थापना॥**

**तृतीयोऽध्यायः-त्रयीस्थापना**

**सामर्ग्वेदयजुर्वेदास्त्रयः त्रयी अथर्ववेदेतिहासवेदौ च वेदाः। शिक्षा कल्पो व्याकरणं निरुक्तं छन्दोविचितिः ज्योतिषामिति चाङ्गानि। एषत्रयी धर्मश्चतुर्णां वर्णानामाश्रमाणां च स्वधर्मस्थापनादौपकारिकः।**

**स्वधर्मो ब्राह्मणस्याध्ययनमध्यापनं यजनं याजनं दानं प्रतिग्रहश्चेति। क्षत्रियस्याध्ययनं यजनं दानं शस्त्राजीत्रो भूतरक्षणं च। वैश्यस्याध्ययनं यजनं दानं कृषिपाशुपाल्ये वाणिज्या च। शूद्रस्य द्विजातिशुश्रूषा वार्त्ता कारुकुशीलवकर्म च।**

त्रयीस्थापना

**गृहस्थस्य स्वकर्माजीवस्तुल्यैरसमानार्षिभिर्वैवाह्यमृतुगामित्वं देवपित्र-तिथिभृत्येषु त्यागः शेषभोजनं च।**

**व्याख्या-** त्रयीस्थापनार्थं तत्स्वरूपमाह- सामेत्यादि। सामवेदः ऋग्वेदो यजुर्वेद इति त्रयस्त्रयीपदवाच्याः, अथर्ववेदः, इतिहासवेदो महाभारतादिश्च वेदपदार्थाः। शिक्षा वर्णोच्चारणोपदेशकं शास्त्रम्। कल्पः क्रत्वनुष्ठानोपदेशपरम् आश्वलायनादिप्रणीतं सूत्रम्। व्याकरणं शब्दानुशासनं पाणिनीयादि। निरुक्तं निर्वचनशास्त्रं यास्क प्रणीतम्। छन्दोविचितिः छन्दश्शास्त्रं पैङ्गलादि। ज्योतिषं सूर्यादि गत्यादिप्रतिपादकं शास्त्रम्।

त्रय्याः फलं वक्तुमाह - एष इति। एष त्रयीधर्मः त्रय्युपदिष्टो धर्मः, चतुर्णां ब्राह्मणादिवर्णानां ब्रह्मचर्याद्याश्रमाणां च औपकारिकः उपकारफलः। कस्मात्, स्वधर्मस्थापनात् स्वधर्मेषु स्थापनात् स्वधर्मानुपदिश्य तेषु नियन्त्रणाद्, अर्थाद् वर्णाश्रमाणाम्।

वर्णधर्मे विवृणोति - स्वधर्म इत्यादि। शस्त्रजीवः शस्त्रेण आजीवो वृत्तिः। भूतरक्षणं प्राणिपालनम्।कृषिपाशुपाल्ये कृषिः केदारे रचजि-वापपरिकर्मादिविधानम्, पाशुपाल्यं पशुपालनकर्म गवाश्वादीनां पोषणचिकित्सादि। वणिज्या क्रयविक्रयव्यवहारः।

द्विजातिशुश्रूषा द्विजातयो ब्रह्मक्षत्रियवैश्याः तेषां परिचरणम्। वार्त्ता कृषिपाशुपाल्यवणिज्याः। कारुकुशीलवकर्म शिल्प- कर्मचारणकर्म च।

आश्रमधर्ममाह- गृहस्थस्येत्यादि। गृहिणः स्वकर्माजीवः स्ववर्णोक्त-कर्मणा वृत्तिः। तुल्यैः कुलादिना समानैः। असमानऋषिभिः भिन्नऋषिगोत्रैः। विवाहः। ऋतुगामित्वं ऋतुः पुष्पस्नानदिनादूर्ध्वं द्वादशनिशाः तस्मिन् स्त्रीगमनशीलत्वम्। शेषभोजनं देवादिदत्ता-वशिष्टाशनम्।

**ब्रह्मचारिणः स्वाध्यायोऽग्निकार्याभिषेकौ भैक्षव्रतत्वमाचार्ये प्राणान्तिकी वृत्तिस्तदभावे गुरुपुत्रे सब्रह्मचारिणि वा।**

**वानप्रस्थस्य ब्रह्मचर्यं भूमौ शय्या जटाजिनधारणमग्निहोत्राभिषेकौ देवतापित्रतिथिपूजा वन्यश्चाहारः।**

**परिव्राजकस्य संयतेन्द्रियत्वमनारम्भो निष्किञ्चनत्वं सङ्गत्यागो भैक्षमनेकत्र अरण्यवासो बाह्याभ्यन्तरं च शौचम्।**

**सर्वेषामहिंसा सत्यं शौचमनसूयानृशंस्यं क्षमा च।**

स्वाध्यायः स्ववेदाध्ययनम्

**व्याख्या-** ब्रह्मेत्यादि। ब्रह्मशब्दो वेदवाची तद्ग्रहणार्थे दण्डाजिनधारणादिलक्षणे व्रते वर्तते, तच्चरितुं शीलमस्येति ब्रह्मचारी तस्य ब्रह्मचारिणः। स्वाध्यायः स्ववेदाध्ययनम्। अग्निकार्याभिषेकौ

अग्निशुश्रूषात्रिषवणस्नाने। भैक्षव्रतत्वं भैक्षं भिक्षावृत्तिः व्रतत्वं व्रतित्वं गोदानान्तं कर्म तदुभयम्। एवं तावदुपकुर्वाणस्य वेदब्रह्मचारिण आसमावर्तनादनुष्ठानम्। नैष्ठिकस्य विशेषमाह - आचार्ये प्राणान्तिकी वृत्तिरित्यादि। गुरुकुले आप्राणो त्क्रमणकालभाविनी स्थितिः। गुरुपुत्रे आचार्यपुत्रसमीपे। सब्रह्म चारिणि वा समानशास्त्राध्यायिनि वा वृद्धे। कार्येति शेषः।

वनप्रस्थ एव वानप्रस्थः

वानप्रस्थस्येत्यादि। वानप्रस्थस्य वने प्रकर्षेण तिष्ठतीति वनप्रस्थः, वनप्रस्थ एव वानप्रस्थः। ब्रह्मचर्यम् ऊर्ध्वरेतस्त्वम्। भूमौ शय्यास्थ ण्डिले शयनम्। अग्निहोत्रं सायप्रातरनुष्ठेयगग्निकार्यम्, अभयै होत्रं हविरायाति यस्मिस्तदिति व्युत्पत्तिः, तच्च अभिषेकस्त्रिकालस्नानं च अग्निहोत्राभिषेकौ। वन्य आहारः कन्दमूलफलादिः।

परिव्राजकस्येत्यादि। परिव्राजकस्य परित्यज्य सर्वं व्रजतीति परिव्राजकः संन्यासी तस्य। संयतेन्द्रियत्वं जितेन्द्रियता। अनारम्भः नैष्कर्म्यम्। निष्किञ्चनत्वं निस्स्वत्वम्। सङ्गत्यागः प्रव्रजितान्तरेणापि संसर्गपरिहारः। अनेकत्र भैक्षं प्राणयात्रापर्याप्तस्यान्नस्य बहुषु गृहेषु भिक्षित्वा ग्रहणम्। बाह्याभ्यन्तरशौचं कायवाङ्मानसनैर्मल्यम्।सवर्णाश्रम साधारणान् धर्मान् आह सर्वेषामिति। अनसूया गुणपक्ष-पातः। आनृशंस्यं अनिष्ठुरत्वम्।

**स्वधर्मः स्वर्गायानन्त्याय च। तस्यातिक्रमे लोकः सङ्करादुच्छिद्येत।**

**तस्मात् स्वधर्मं भूतानां राजा न व्यभिचारयेत्।**

**स्वधर्मं संदधानो हि प्रेत्य चेह च नन्दति॥**

**व्यवस्थितार्यमर्यादः कृतवर्णाश्रमस्थितिः।**

**त्रय्या हि रक्षितो लोकः प्रसीदति न सीदति ॥**

**इति कौटिलीयार्थशाचे विनयाधिकारिके प्रथमाधिकरणे तृतीयोऽध्यायः विश्वासमुद्देशे त्रयीस्थापना ॥**

व्याख्या- स्वधर्मः किमर्थमादर्तव्यस्तत्राह- स्वधर्म इति। स्वर्गायपरलोकसुखाय। आनन्त्याय च. इहाविनाशाय मोक्षाय वा। अतिक्रमे उल्लङ्घने। सङ्करादुच्छिद्येत अनुष्ठातृव्यवस्थाविरहेण कर्मसक्ङ्कराद् वर्णसङ्कराच्च उत्सादं प्राप्नुयात्। अयमाशयः- वर्णाश्रमधर्मा हि यथोक्ता अविवादसिद्धलोकयोगक्षेमहेतुभावाः तदुपासकबीजक्षेत्रसंक्रान्ततदनुष्ठानवासनासनाथैः तत्तद्वर्णाश्रमिभिरेव स्वकुलधर्मत्वबुद्धया भक्तिश्रद्धापुरस्सरमनुष्ठीयमानाः सन्तः सौष्ठवविशेषं प्रतिपत्तुं लोकोपकारे च कमपि कमप्यतिशयमाधातुं क्षमन्ते। ते चेदव्यवस्थमन्यैः कथञ्चिदनुष्ठीयेरन् ध्रुवं तर्हि सौष्ठवाद्धीयेरन्, लोकोपकारे च नातिशयमादधीरन्, अनुष्ठानबाध्यतां च क्रमेणासादयेयुरिति धर्मव्याकुलीभावाल्लोकविनाशः स्यादिति।

अतः किं कर्तव्यं तत्राह - तस्मादित्यादि। भूतानां मनुष्याणाम्। नव्यभिचारयेत् व्यभिचरन्तं नानुमन्येत। स्वधर्म सन्दधानः सम्यगनुष्ठापयन्। प्रेत्य परलोके।

वर्णाश्रमधर्मविधानद्वारेण त्रय्या महाफलत्वं वदन्नध्यायमुपसंहरति व्यवस्थितेत्यादि। व्यवस्थिता वर्णाश्रमप्रतिबद्धा आर्यमर्यादा सदाचार नियमो यस्य स व्यवस्थितार्यमर्यादः। प्रसीदति मोदते।नसीदति न नश्यति।

इति कौटिलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे तृतीयोऽध्यायः विद्यासमुदेशे त्रयीस्थापना ॥

## Summarised Overview

विनयाधिकारिकं नाम प्रथमाधिकरणस्य राजवृत्तिर्नाम प्रथमाध्याये अर्थशास्त्रप्रतिपादितानां पञ्चदशाधिकरणानां विषयः संग्रहरूपेण दत्तः भवति। एतत् अर्थशास्त्रग्रन्थस्य सविशेषता वर्तते। आन्वीक्षिकीस्थापना नाम द्वितीयाध्याये आन्वीक्षिकी विद्यायाः महत्त्वं प्रतिपादतिम् ।आन्वीक्षिकी नाम तर्कविद्या ।अर्थशास्त्रकारः चाणक्यः लिखति-बलाबले चैतासां हेतुभिः अन्वीक्षमाणा आन्वीक्षिकी लोकस्य उपकरोति । व्यसने अभ्युदये च बुद्धिम् अवस्थापयति, प्रज्ञावाक्यक्रियावैशारद्यं च करोति ।त्रयीस्थापना नाम तृतीयाध्याये त्रयीविद्यायाः,चतुर्वर्णानाम्, आश्रमधर्माणां च विचारः कृतमस्ति।

## Assignments

1. अर्थशास्त्रे प्रथमाधिकरणे प्रतिपादितं विषयं संग्रह्य लिखत।
2. अर्थशास्त्रे पञ्चदशाधिकरणे प्रतिपादितं विषयं संग्रह्य लिखत।
3. अधोदत्तानां सूत्राणां अर्थं विशदयत।
4. वृद्धसंयोगः, अमात्योत्पत्तिः, मन्त्राधिकारः, दुर्गविधानं, शासनाधिकारः
5. अधोदत्तानां सूत्राणां अर्थं विशदयत।
6. पण्याध्यक्षः, देशकालमानं, मुद्राध्यक्षः, वास्तुकम्, स्वस्वामिसम्बन्धः, गूढाजीवीनां रक्षा
7. कौटिल्यमते कति विद्याः भवन्ति ? तासां नामानि च लिखत।
8. आन्वीक्षिकी नाम विद्या का ?
9. त्रयीविद्यां विशदयत।
10. अधोदत्तानां सूत्राणां अर्थं विशदयत।
11. राज्यप्रतिसन्धानं, कोशाभिसंहरणं, प्रकृतिसम्पदः

12. चतुराश्रमधर्मान् निरूपयत।

13. चतुर्वर्णान् विचारयत।

## Suggested Readings


1. कौटिलीयं अर्थशास्त्रम् - Dr. R. Shama Sastry, Mysore Government Branch Press, 1924.
2. संस्कृतमञ्जूषा - डा. उदयशंकर झा, चौखंबा कृष्णदास् अकादमी, वाराणसी


## References


1. Arthaśāstra Vinayādhikārika. of Kautilya
2. The Kauṭilīya Arthaśāstra, R. P. Kangle (All the three Volumes)
3. Current Readings in Arthasastra, Ed. C. Rajendran, University of Calicut, 2008
4. Science and Technology as Reflected in Arthaśāstra, P. V. Narayanan, University of Calicut, 2008

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 4

# विनयाधिकारिकायाः सविशेषाध्ययनम् (अध्यायः 4 - 8)

## Learning Outcomes

- कौटिल्यस्य अर्थशास्त्रपठनेन भारतीयराजनैतिकपरम्परायाः ज्ञानं प्राप्नोति।
- पौराणिकभारतस्य राजनैतिकं ज्ञानं लभते।
- अर्थशास्त्रस्य ज्ञानं लभते।
- अर्थशास्त्रे विनयाधिकारिकापठनेन सविशेषज्ञानं लभते।

## Background

कौटिल्यप्रणीतम् अर्थशास्त्रमिदं राजनीतिविज्ञानस्य विश्वकोशमित्युच्यते विद्वद्भिः। ग्रन्थेऽस्मिन् धर्मशास्त्रं, नीतिशास्त्रं, शिक्षाशास्त्रं, समाजशास्त्रं, चिकित्साशास्त्रं, तन्त्रशास्त्रं, कृषिविज्ञानम् इत्यादिकं सर्वं वर्णितमस्ति ।विनयाधिकारिकं नाम प्रथमाधिकरणस्य राजवृत्तिर्नाम प्रथमाध्याये अर्थशास्त्रप्रतिपादितानां पञ्चदशाधिकरणानां विषयः संग्रहरूपेण दत्तः भवति ।आन्वीक्षिकीस्थापना नाम द्वितीयाध्याये आन्वीक्षिकीविद्यायाः महत्त्वं प्रतिपादितम् ।त्रयीस्थापना नाम तृतीयाध्याये

त्रयीविद्यायाः,चतुर्वर्णानां, आश्रमधर्माणां च विचारः कृतमस्ति। अस्मिन् एकके विनयाधि- कारिकायाः चतुर्थाध्यायात् आरम्भ्य अष्टाध्यायपर्यन्तं पाठभागे सन्ति। अस्य परिचयं कुर्मः।

## Keywords

वार्तास्वरूपं, वाणिज्यं, दण्डः, पालितः, वृद्धसंयोगः, कृतकः, शुश्रूषा, ब्रह्मचर्यं, विद्यायाः सौराज्य मूलकता, अरिषड्वर्गः, राजवृत्तिः, वश्येन्द्रियः, अमात्योत्पत्तिः, विशालाक्षः, पिशुनः, कौणपदान्तः, वातव्याधिः, बाहुदन्तीपुत्रः।

## Discussion

### चतुर्थोध्यायः - वार्तादण्डनीतिस्थापने

**कृषिपाशुपाल्ये वणिज्या च वार्त्ता धान्यपशुहिरण्यकुप्यविष्टप्रदानादौपकारिकी। तया स्वपक्षं परपक्षं च वशीकरोति कोशदण्डाभ्याम्।**

आन्वीक्षिकीत्रयी-वार्त्तानां योगक्षेमसाधनो दण्डः

**आन्वीक्षिकीत्रयीवार्त्तानां योगक्षेमसाधनो दण्डः, तस्य नीतिर्दण्डनीतिः अलब्धलाभार्था, लब्धपरिरक्षणी, रक्षितविवर्धनी, वृद्धस्य तीर्थेषु प्रतिपादनी च। तस्यामायन्ता लोकयात्रा। तस्माल्लोकयात्रार्थी**

**नित्यमुद्यतदण्डः स्यात्। नह्येवंविधं वशोपनयनमस्ति भूतानां यथा दण्ड इत्याचार्याः।**

**व्याख्या-** अथ वार्ताया विद्यात्वं स्थापयितुं स्वरूपादिकमाह - कृषिपाशुपाल्ये इत्यादि। कृषिः क्षेत्रबीजवापपरिकर्मादिप्रतिपादकं शास्त्रं पराशरप्रोक्तं पाशुपाल्यं गवाश्वादिपालनप्रकारोपदेशकं शास्त्रं गौतमशालिहोत्रादिप्रणीतम्। वणिज्या क्रयविक्रयव्यबहारतन्त्रं विदेहराजप्रणीतम्। धान्येत्यादि। तत्र हिरण्यम् अकुप्य सुवर्णादि। कुप्यं स्वर्णरजतातिरिक्तं ताम्रादि तैजसं सारदारुवेणुवल्लीवल्कादिक मतैजसं च। विष्टिः कर्मकरः। तया कोशदण्डाभ्यां वार्त्तया जनिताभ्यां कोशदण्डाभ्यां कोशो धननिचयः दण्डः सेना ताभ्यां स्वपक्षं परपक्षं च वशीकरोति स्वायत्तीकरोति, अर्थाद् राजा।

दण्डो दमः सामादिषु उपायविशेषः।

दण्डनीतेः स्वरूपादिकमाह- आन्वीक्षिकीत्यादि। योगक्षेमौ साधयतीति योगक्षेमसाधनः। दण्डो दमः सामादिषु प्रधानभूत उपायविशेषः। अथवा दण्डस्थत्वाद् राजा दण्डः। सति दण्डभये लोकमान्वीक्षिक्यादिषु सम्यक् प्रवर्तते, न त्वितरथेतिदण्डस्या न्वीक्षिक्यादियोगक्षेमसाधनत्वं विशेयम्। अत एवाहुः

"सर्वो दण्डजितो लोको दुर्लभो हि शुचिः क्वचित्। दण्डस्य हि भयात् कृत्स्नं जगद् भोगाय कल्पते ॥" इति। तस्य नीतिः नयनमनुष्ठानम् अर्थात् तदुपदेशशास्त्रम्। अलब्धलाभाचैत्यादि दण्डनीतः फलकथनम्। दण्डेन सलब्धं लभ्यते, लब्धं परिरक्ष्यते परिरक्षितं वर्ध्यते, वर्धितं च तीर्थेषु पुण्यक्षेत्राध्वरादिषु विनियुज्यते। तस्मादिति। तस्मात् लोकवृत्तेर्दण्डनीत्यधीनत्वात्। नित्यम् उद्यतदण्डः सर्वदा दण्डप्रणय

दण्डेन सलब्धं लभ्यते, लब्धं परिरक्ष्यते

नोक्तः स्याद् अर्थाद् राजा। नहीत्यादि। एवंविधं यथा दण्डस्तथाविधम्। वशोपनयनम् अनायत्तायत्तीकरणसाधनम्। नह्यस्ति नास्त्येव ।

**नेति कौटिल्यः। तीक्ष्णदण्डो हि भूतानामुद्वेजनीयः। मृदुदण्डः परिभूयते। यथार्हदण्डः पूज्यः। सुविज्ञातप्रणीतो हि दण्डः प्रजा धर्मार्थकामैर्योजयति। दुष्प्रणीतः कामक्रोधाभ्यामज्ञानाद् वानप्रस्थ-परिव्राजकानपि कोपयति, किमङ्ग पुनर्गृहस्थान्।**

**अप्रणीतो हि मात्स्यन्यायमुद्भावयति। बलीयानबलं हि ग्रसते दण्डधराभावे। तेन गुप्तः प्रभवतीति।**

**चतुर्वर्णाश्रमो लोको राज्ञा दण्डेन पालितः।**
**स्वधर्मकर्माभिरतो वर्तते स्वे वेश्मसु॥**

**इति कौटिलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे चतुर्थोऽध्यायः विद्यासमुद्देशे वार्तास्थापना दण्डनीतिस्थापना च। विद्यासमुद्देशः समाप्तः॥**

**व्याख्या-** नेति। तत्र तमिमं दण्डसामान्यश्लाघावादमाचार्याणां प्रतिषेधति कारणवचनं तीक्ष्णेत्यादिना। तीक्ष्णदण्डः उग्रदण्डः, भूतानाम् उद्वेजनीयः उद्वेगजनकः। यथार्हदण्डः युक्तदण्डः देशकाला-पराधानुगुण्यप्रयुज्यमानदण्डः, पूज्यः लोकबहुमान्यः। सा पूज्यता युक्तस्य दण्डस्य लोकाभ्युदयहेतुत्वादित्यभिप्रायवानाह सुविज्ञातेत्यादि। सुविज्ञातप्रणीतः सुष्ठु शास्त्रतोऽवगत्य प्रयुक्तः। अयथावत् प्रणीतस्याप्रणीतस्य वा दण्डस्य सर्वानर्थहेतुत्वमाह- दुष्प्रणीत इत्यादिना। कामक्रोधाभ्यामज्ञानाद् दुष्प्रणीतः कामात् क्रोधादज्ञाना च्चायथावत् प्रयुक्तः। किं पुनर्गृहस्थान्, संयतेन्द्रियानपि यः कोपयति सोऽसंयतेन्द्रियान् कोपयतीति किमु वक्तव्यम्।

अङ्गेत्युपदेश्यसम्बोधनम्। मात्स्यन्यायमिति महान् हि मत्स्यः क्षुद्रं मत्स्यं असत इति बलवता दुर्बलस्य यत् पीडनं स मात्स्यन्याय इत्युच्यते। बलीयानित्यादि। दण्डधराभावे दण्डप्रणेतुरभावे । तेन गुप्तः प्रभवति सुप्रणीतेन दण्डेन रक्षितः अर्थाद् दुर्बलः प्रभवति बलयुक्तो भवति।

धर्मकर्माभिरतः वर्णाश्रमधर्मकर्मानुष्ठानरः

अध्यायान्ते लोकमाह चतुर्वर्णेत्यादि। धर्मकर्माभिरतः वर्णाश्रमधर्म कर्मानुष्ठानपरः। स्वेषु वेश्मसु वर्तते स्वास्थ्येन वसतीत्यर्थः। दण्डपाल नाभावे हि स्वगृहेऽपि स्वास्थ्यवृत्तिदुर्लभेति॥

इति कौटिलीयार्थशास्त्रव्याख्याय विनयाधिकारिके प्रथमाधिकरणे चतुर्थोऽध्यायः विद्यासमुद्देशे वार्तास्थापना।

## २. प्रकरणम् - पञ्चमोऽध्यायः वृद्धसंयोगः

योगक्षेमावहः

**तस्माद् दण्डमूलास्तिस्रो विद्याः। विनयमूलो दण्डः प्राणभृतो योगक्षेमावहः। कृतकः स्वाभाविकश्च विनयः। क्रिया हि द्रव्यं विनयति नाद्रव्यम्। शुश्रूषाश्रवणग्रहणधारणविज्ञानोहापोहतत्त्वाभिनिविष्टबुद्धिं विद्या विनयति नेतरम्। विद्यानां तु यथास्वमाचार्यप्रामाण्याद् विनयो नियमश्च।**

**व्याख्या-** वृद्धसंयोग इति सूत्रम्। वृद्धा आन्वीक्षिक्यादिविद्याकोविदाः तैः संयोगः शिष्याचार्यभावलक्षणः सम्बन्धोऽभिधीयत इति सूत्रार्थः।

तस्मादित्यादि। तस्मात् चतुर्वर्णाश्रमस्य लोकस्य राज्ञा सुविज्ञातप्रयुक्त दण्डमुखेनपाल्यमानस्यैव स्वधर्मकर्मानुष्ठानप्रवणतो त्पादात्, तिस्रो विद्याः आन्वीक्षिकीत्रयीवार्त्तालक्षणाः, दण्डमूलाः दण्डाधीन स्थितिकाः। दण्डश्च विनयलक्षणेन शास्त्रविज्ञानेन दत्तहस्तः प्राणिनां योगक्षेमसम्पत्तिहेतुरित्याह- विनयेत्यादि।

कृतक इत्यादि। तत्र विनयः, क्रियया अभियोगलक्षणया निर्वृत्तः कृतक इत्येकः । विनापि क्रियां वासनावशात् सिद्धः स्वाभाविक इत्यपरः । यथा हि संस्करणाभियोगः शाणघर्षणादिः द्रव्यं खन्यादिप्रभवं पाषाणादिविशेषं संस्करोति न पुनरद्रव्यं यं कमपि शिलादिखण्डं, तथा विद्याभियोगः स्वतस्सिद्धशुश्रूषादिबुद्धिगुणसम्पन्नमेव जनं संस्करोति, न तु तद्रहितम्। बुद्धिगुणाश्च तेऽष्टौ भवन्ति शुश्रूषाश्रवणग्रहणधारण विज्ञानोहापोहतत्त्वाभिनिवेशाख्याः। तत्र शुश्रूषा श्रवणार्हेषु श्रोतु मिच्छा, तस्यां सत्यां श्रवणम् आसेवा, ग्रहणं श्रुतार्थज्ञानं, धारणं गृहीताविस्मरणं, विज्ञानं धारितेष्वर्थेषु साध्यसाधनादिस्वरूप विवेकज्ञानम्, ऊहः शब्दानुक्तस्य लिङ्गेनावगतिः, अपोहो युक्त्यपेतस्य हानं, तत्त्वाभिनिवेशो वस्तुयाथात्म्यज्ञानम्।

शुश्रूषा श्रवणार्हेषु श्रोतुमिच्छा

एवं विद्याधिकारिणं तदनधिकारिणं चोक्त्वा विद्याग्रहणकाले शिष्येणाचरणीयमाह - विद्यानां त्विति। विद्यानाम् आचार्यप्रामाण्याद् यस्याविद्याया यो य आचार्य उपदेष्टा तस्य प्रामाण्यात् तदध्ययनकाले तं तं शिष्यं धर्मानुशासनप्रभविष्णुत्वाद्, यथास्वं तत्तदाचार्यनुशासनानतिक्रमेण।

**वृत्तचौलकर्मा लिपिं सङ्ख्यानं चोपयुञ्जीत। वृत्तोपनयनस्त्रयीमान्वीक्षिकीं च शिष्टेभ्यः, वार्त्तामध्यक्षेभ्यः, दण्डनीतिः वक्तृप्रयोक्तृभ्यः। ब्रह्मचर्यं च आषोडशाद् वर्षात्। अतोगोदानं दारकर्म च।**

**अस्य नित्यश्च विद्यावृद्धसंयोगो विनयवृद्ध्यर्थं, तन्मूलत्वाद् विनयस्य। पूर्वमहर्भागं हस्त्यश्वरथप्रहरणविद्यासु विनयं गच्छेत्, पश्चिममितिहास श्रवणे। पुराणमितिवृत्तमाख्यायिकोदाहरणं धर्मशास्त्रमर्थशास्त्रं चेतीतिहासः। शेषमहोरात्रभागमपूर्वग्रहणं गृहीतपरिचयं च कुर्यात्, अगृहीतानामाभीक्ष्ण्यश्रवणं च।**

**श्रुताद्धि प्रज्ञोपजायते प्रज्ञाया योगो योगादात्मवत्तेति विद्यासामर्थ्यम् ।**

**विद्याविनीतो राजा हि प्रजानां विनये रतः ।**

**अनन्यां पृथिवीं भुङ्क्ते सर्वभूतहिते रतः ॥**

**इति कौटिलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे पञ्चमोऽध्यायः वृद्धसंयोगः ॥**

**व्याख्या-** विनयः शिक्षणम्, 'आहूतश्चाप्यधीयीत' इत्युक्तप्रकारं, समुदाचारो वा गुर्वागमनोपवेशादौ प्रत्युत्थानानुपवेशादिः, नियमश्च गुरुपरिचरणादिव्रतं च, अर्थाच्छिष्यस्य भवति।

वृत्तेति। वृत्तचौलकर्मा कृतचौलः त्रिवर्षः पञ्चवर्षो वेत्यर्थः, लिपिम् अक्षरम्, संख्यानं गणितं च, उपयुञ्जीत नियमपूर्वमधीयीत। त्रयीमित्यादिनाप्येतत् सम्बध्यते। वृत्तोपनयनः लब्धगायत्र्युपदेशः, त्रयीम् आन्वीक्षिकीं च, शिष्टेभ्यः सम्यगधिगततद्विद्येभ्यः, उपयुञ्जीत। वार्त्ताम्, अध्यक्षेभ्यः सीताध्यक्षादिभ्यः, उपयुञ्जीत। दण्डनीर्तिं, वक्तृप्रयोक्तृभ्यः प्रवचनप्रयोगकुशलेभ्यः, उपयुञ्जीत।

ब्रह्मचर्यमिति। आ षोडशाद् वर्षात् षोडशं वयोऽभिव्याप्य, ब्रह्मचर्यं, रक्ष्यमित्यार्थम्। अतः पश्चात्, गोदानकेशान्तकर्म, दारकर्म च विवाहश्च। अस्य कृतदारस्य, विद्यावृद्धसंयोगः विद्यावृद्धैः सह परिचयः, नित्यः दारकर्मोत्तरकालेऽप्यनुवर्त्यः। किमर्थं, विनयवृद्ध्यर्थ विनयस्य शास्त्रसंस्कारस्य वृद्धये। कस्मात्, विनयस्य तन्मूलत्वाद् विद्या वृद्धसंयोगप्रभवत्वात्।

भूयः कलाभ्यासं राज्ञ उपदेषुमाह- पूर्वमिति पूर्वम् अहर्भागम्, अत्यन्तसंयोगे द्वितीया। हस्त्यश्वरथप्रहरणविद्यासु हस्तिचर्याया

आख्यायिका दिव्यमानुषादिचरितम्

मश्वचर्यायां रथचर्यायाम् आयुधविद्यायां च, विनयं शिक्षां, गच्छेत्। पश्चिमं तृतीयमहर्भागम्, इतिहासश्रवणे, विनय गच्छेत्। इतिह। सपदार्थविवरणं इतिश्रीमहाभारतादि। आख्यायिका दिव्यमानुषादि चरितम्। उदाहरणम् न्यायोप न्याय शास्त्रम्,मीमांसा आदि।

धर्मशास्त्रं मानवादि। अर्थशास्त्रम् औशनसबार्हस्पत्यादि। शेष मध्यमम् अहर्भागम् अहोरात्रभागमिति मूलग्रन्थेषु पठ्यते। तदा शिष्टं मध्यममहर्भागं, रात्रौ कार्यान्तरनिद्रादिविनियुक्तावशिष्टतया लभ्यमानं रात्रिभागं चेति व्याख्येयम्। अपूर्वग्रहणं प्रतिनवप्रमेयश्रवणं, गृहतिपरिचयं गृहीतधारणार्थं चिन्तनंच कुर्यात्। अगृहीतानाम् आभीक्ष्ण्यश्रवणम् ईषद्गृहीतानां सम्यङ्गनः प्रवेशार्थं पुनः पुनःश्रवणं च।

श्रवणात्, प्रज्ञा त्रैकालिकी बुद्धिः, उपजायते

श्रुतादिति। श्रुतात् श्रवणात्, प्रज्ञा त्रैकालिकी बुद्धिः, उपजायते। प्रज्ञाया योगः शास्त्रोक्तानुष्ठानश्रद्धा, योगाद् आत्मवत्ता मनस्विता सत्त्वत्वत्ता उपजायते। इति विद्यासामर्थ्यम् इत्येतद् विद्याशक्तिजन्यं फलमित्यर्थः।

विद्याविनीत इत्यादि। विनये शिक्षणे। अनन्यां नाथान्तरशून्याम् एकनाथामित्यर्थः। शेषं स्फुटम्॥

### ३. प्रकरणम् इन्द्रियजयः

**षष्ठोऽध्यायःअरिषड्वर्गत्यागः।**

**विद्याविनयहेतुरिन्द्रियजयः कामक्रोधबलोभमानमदहर्षत्यागात् कार्यः। कर्णत्वगक्षिजिह्वाघ्राणेन्द्रियाणां शब्दस्पर्शरूपरसगन्धेष्वविप्रतिपत्तिरिन्द्रियजयः शास्त्रार्थानुष्ठानं वा। कृत्स्नं हि शास्त्रमिदमिन्द्रियजयः।**

**तद्विरुद्धवृत्तिरवश्येन्द्रियश्चातुरन्तोऽपि राजा सद्यो विनश्यति - यथा दाण्डक्यो नाम भोजः कामाद् ब्राह्मणकन्यामभिमन्यमानः सबन्धुराष्ट्रो विननाश करालश्च वैदेहः, कोपाज्जनमेजयो ब्राह्मणेषु।**

**व्याख्या-** इन्द्रियजय इति सूत्रम्। इन्द्रियाणि श्रोत्रादीनि तेषां जयः शब्दादिषु स्वस्वविषयेषु अविरुद्धा प्रवृत्तिः। सा शास्त्रसंस्कारमन्तरेण स्वत्त एव भवन्ति। स्वाभाविक इन्द्रियजयः, शास्त्रानुष्ठाननिष्ठावशाद् भवन्ति कृतकः। स इहोच्यत इति सूत्रार्थः। इदं च सूत्रमध्यायद्वयेन भाप्यते। वृद्धसंयोगानन्तरं तद्धेतुरिन्द्रियजयः प्रसक्त इति प्रकरण-सङ्गतिः।

परस्त्रीविषयोऽभिलाषः कामः

विद्येत्यादि। विद्याविनयहेतुः विद्यासंस्कारकारणम्। कामेति। परस्त्रीविषयोऽभिलाषः कामः, हिंसाप्रवर्तकश्चित्तविकारः क्रोधः, परद्रव्येच्छा लोभः, बालिश्यादात्मन्यनुपमत्वबुद्धिर्मानः धनविद्यादि-मभवो गर्वो मदः, इष्टार्थप्राप्त्युपभोगजन्या प्रीतिर्हर्षः, षडेते शत्रव इत्युच्यन्ते। एषां त्यागाद् वर्जनात्। अविप्रतिपत्तिः स्वत एवाविरुद्धा प्रवृत्तिः। शास्त्रार्थानुष्ठानं शास्त्रार्थेषु उपादेयत्वेन शास्त्रतोऽवगतेषु शब्दस्पर्शादिषु अनुष्ठानं प्रवृत्तिनियमः। कृत्स्नं हि शास्त्रमिदमिन्द्रियजय इति अनुष्ठेयतया शास्त्रेण प्रतिपाद्यमानः सर्वोऽर्थ इन्द्रियजयस्य कारणमित्यर्थः, कारणे कार्योपचारः।

तद्विरुद्धेत्यादि। तद्विरुद्धवृत्तिः शास्त्राविरुद्धानुष्ठानः। चातुरन्तोऽपि चतुरन्ता चनुस्समुद्रपर्यन्ता भूमिः तस्या ईश्वरोऽपि। तत्र कामादिषु एकैकेन विनष्टेषु द्वौ द्वौ निदर्शयति यथेत्यादिना। भोजवंश्यो दाण्डक्यः कामाद् ब्राह्मणकन्यामपहृत्य तत्पित्रा शप्तः बन्धुराष्ट्रसहितो नष्टः, तथा विदेहाधिपः करालो ब्राह्मणीमभिलषन् ब्राह्मणेन शप्तो नष्टः। कोपाद्

जनमेजयो नाम राजा अश्वमेधे वर्तमाने ब्राह्मणैः सह कलहायितः तच्छापान्नष्टः,तथा तालाजङ्घः।

**विक्रान्तः तालजङ्घश्च भृगुषु, लोभादैलश्चातुर्वर्ण्यमत्याहारयमाणः सौवीरश्चाजबिन्दुः, मानाद् रावणः परदारानप्रयच्छन् दुर्योधनो राज्यादंशं च, मदाद् डम्भोद्भवो भूतावमानी हैहयश्चार्जुनः, हर्षाद् वातापिरगस्त्य-मत्यासादयन् वृष्णिसङ्घश्च द्वैपायनमिति।**

षड्वर्गत्यागः

**एते चान्ये च बहवः शत्रुषड्वर्गमाश्रिताः।**

**सबन्धुराष्ट्रा राजानो विनेशुरजितेन्द्रियाः॥**

**शत्रुषड्वर्गमुत्सृज्य जामदग्न्यो जितेन्द्रियः।**

**अम्बरीषश्च नाभागो बुभुजाते चिरं महीम्॥**

**इति कौटिलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे षष्ठोऽध्यायः इन्द्रियजये अरिषड्वर्गत्यागः॥**

**व्याख्या-** भृगुषु विकम्य तच्छापान्नष्टः। लोभाद् ऐलः पुरूरवा नाम राजा चातुर्वर्ण्यमतिमात्रधनहरणेन पीडयंश्चातुर्वर्ण्यकोपान्नष्टः, तथा सौवीरपतिरजबिन्दुः। लोमादैलो नैमिशीयब्राह्मणयज्ञशालां प्रविश्य ततोऽपरिमितं धनं हर्तुमुद्युक्तो ब्राह्मणशापान्नष्ट इत्यैतिह्यं कैश्चिद् वर्ण्यते। मानाद् रावणः सीतां रामायाणयच्छन् नष्टः, तथा दुर्योधनो राज्यांशं पाण्डवेभ्योऽप्रयच्छन् नष्टः। मदाद् राजा डम्भोद्भवो नाम कृतसर्वप्रजावज्ञानो नरनारायणाभ्यां सह युद्धमासाद्य हतः, तथा हह्याधिपः कार्तवीर्यो मदात् परशुरामपितरि प्रयुक्तापराधः परशुरामेण युद्धे हतः । हर्षाद् वातापिरसुरोऽगस्त्यं महर्षिं वञ्चयन् यादवसहुश्थ व्यासमतिसन्धित्सुस्ताभ्यां शप्तौ विनेशतुः। इत्यैतिष्यानि। इत्यादि।

उक्ता राजान उपलक्षणम्, अन्येऽपि बहव आसन्नित्याह - एत अरिषड्वर्गस्यान्वयेऽनर्थं निदर्यव्यतिरेके निःश्रेयसप्राप्ति निदर्शयति - शत्रुषवर्गमित्यादि। जामदग्न्यः परशुरामः। नाभागो नभागसूनुः।।

इति कौटिलीयार्थशास्त्रव्याख्यायां विनयाधिकारिकेप्रयमाधिकरणेषष्ठोऽध्यायः।

**सप्तमोऽध्यायः - राजर्षिवृत्तम्**

**तस्मादरिषड्वर्गत्यागेनेन्द्रियजयं कुर्वीत, वृद्धसंयोगेन प्रज्ञां, चारेण चक्षुः, उत्थानेन योगक्षेमसाधनं, कार्यानुशासनेन स्वधर्मस्थापनं, विनयं विद्योपदेशेन, लोकप्रियत्वमर्थसंयोगेन, हितेन वृत्तिम्।**

**एवं वश्येन्द्रियः परस्त्रीद्रव्यहिंसाश्च वर्जयेत् स्वप्नलौल्यमनृतमुद्धतवेषत्वमनर्थसंयोगं च, अधर्मसंयुक्तमनर्थसंयुक्तं च व्यवहारम्।**

**धर्मार्थाविरोधेन कामं सेवेत न निस्सुखः स्यात्। समं वा त्रिवर्गमन्योन्यानुबन्धम्। एको ह्यत्यासेवितो धर्मार्थकामानामात्मानमितरौ च पीडयति। अर्थ एव प्रधान इति कौटिल्यः, अर्थमूलौ हि धर्मकामाविति।**

राजैव सन् य ऋषिः जितेन्द्रियः स राजर्षिः

**व्याख्या-** अस्मिन्नध्याये राजर्षिवृत्तमुच्यते। राजैव सन् य ऋषिः जितेन्द्रियः स राजर्षिः ।तस्मादित्यादि । तस्माद् अरिषड्वर्गत्यागस्य श्रेयस्साघनत्वात्। वृद्धसंयोगेन प्रज्ञां कुर्वीत उत्पादयेत् विकासयेच्च । चारेण चक्षुः कुर्वीत गूढपुरुषं चक्षुस्थाने कुर्यात्स्वपरराष्ट्रवृत्त प्रत्यक्षीकरणार्थम्। उत्थानेन उद्योगेन, उत्थानमुद्योगः अनुष्ठानमिति पर्यायाः, योगक्षेमसाधनं योगक्षेमसम्पादनम्। कार्यानुशासनेन स्वधर्मस्थापनम् इदमीदृशमित्थं कर्तव्यमित्याज्ञापनेन स्वधर्मे लोकस्य नियन्त्रणम्। अर्थसंयोगेन लोकापियत्वम् अर्थस्य धनस्य स्वीकरणेन

समुचितेषु पात्रेष्वर्पणेन च जनप्रियत्वम्। हितेन वृत्तिं तदात्वायत्योर्यत् पथ्यं तेन लोकयात्राम्। कुर्वीतेति सर्वत्रानुषङ्गः।

एवमित्यादि। परस्त्रीद्रव्यहिंसाः परस्त्रियं परद्रव्यं परहिंसां च। स्वप्नम् अयथोचितां निद्राम्। लौल्यं चापलम् अनृतं मिथ्यावादम्। उद्धतवेषत्वम् अविनीतदोषताम्। अनर्थसंयोगम् उक्तस्यार्थसंयोगस्यमत्यनीकम्।

राजर्षिवृत्तम्

धर्मत्यादि। धर्मार्थाविरोधेन धर्मार्थयोरबाधेन कामं तृतीयपुरुषार्थम्। वेति पक्षान्तरे, तच्च अन्योन्यानुबन्धं त्रिवर्गं समं सेवेतेति। परस्परसंसृष्टान् धर्मार्थकामांस्तुल्यमात्रया सेवेतेत्यर्थः। सममसेवने को दोषस्तत्राह- धर्मार्थकामानां मध्ये एकः अन्यतमः अत्यासेवितः अतिमात्रं व्यसनितया सेवितः सन् इतरौ अर्थकामौ धर्मार्थौ पीडयति हि। धर्मादीनां समप्राधन्यमरोचयमान् आह - अर्थ। एवेति। एवकारेण-

**मर्यादां स्थापयेदाचार्यानमात्यान् वा, य एनमपायस्थानेभ्यो वारयेयुः, छायानालिकाप्रतोदेन वा रहसि प्रमाद्यन्तमभितुदेयुः।**

**सहायसाध्यं राजत्वं चक्रमेकं न वर्तते।**

**कुर्वीत सचिवांस्तस्मात् तेषां च शृणुयान्मतम्।।**

**इति कौटिलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे सप्तमोऽध्यायः इन्द्रियजये राजर्षिवृत्तम्। इन्द्रियजयः समाप्तः ॥**

**व्याख्या-**धर्मकामयोरप्राधान्यमुक्तम्। तत्र हेतुरुच्यते- अर्थमूलौ इत्यिादिना। अर्थमूलौ अर्थसाध्यौ। मूर्धाभिषिक्तं राजर्षिवृत्तमाह - मर्यादामिति। आचार्यान् गुरून्, अमात्यान् मन्त्रिणो वा, मर्यादां

स्थापयेत्, सीमां परिकल्पयेत्, ताद्धर्य्यात् ताच्छब्दयम्, सीमामिवालङ्घनस्यानमात्मनो विदध्यादित्यर्थः। ते कीदृशाः, ये एनं राजानम्, अपायस्थानेभ्यो वारयेयुः अनर्थकारणानुष्ठानेभ्यो निवर्तयेयुः, रहास प्रमाद्यन्तम् अन्तःपुरादावतिप्रसजन्तमेनं, छायानालिकाम-तोदेन छाया त्रिपौरुष्यादिरूपं छायाप्रमाणमतीतघटिकावेदकं राजभणिधिप्रकरणे वक्ष्यमाणं नालिका घटिकाप्रमाणं तदुभयरूपेण प्रतोदेन कार्यान्तरकालातिपातसूचनद्वारा प्रसक्तेष्टकर्ममत्यूहजनकतया मनोव्यथाकारित्वात् प्रतोदतुल्येन पुनःपुनश्छायानालिकानिवेद-नेनेत्यर्थः, अभिदेयुर्वा परिव्ययवैयुश्च प्रमादभनार्थन्।

किमर्थं यथोक्तसचिवस्थापनेनात्मा परतन्त्रतां नीयत इति चेत् तत्राह सहायेत्यादि। सहायसाध्यं सहायनिर्वाचं नत्वेकाकिनात्सना निर्वा-ह्यम्। तत्र दृष्टान्तः चक्रमेकं न वर्तत इति शकटादौ युक्तम् एकं च कान्तरसहायरहिते चक्रं न परिश्रमति। सचिवान् आचार्यानमात्यांश्च। श्रुणुयाच्च श्रुत्वा अनुतिष्ठेच्च।

**४. प्रकरणम् - अमात्योत्पत्तिः**

**अष्टमोऽध्यायः**

अमात्योत्पत्तिः

**सहाध्यायिनोऽमात्यान् कुर्वीत दृष्टशौचसामर्थ्यत्वादिति भारद्वाजः, ते ह्यस्य विश्वास्या भवन्तीति।**

**नेति विशालाक्षः। सहक्रीडितत्वात् परिभवन्त्येनम्। ये अस्य गुणसध-र्माणस्तानमात्यान् कुर्वीत - समानलिव्यसनत्वात्, ते ह्यस्य मर्मज्ञभया-न्नापराध्यन्तीति।**

**साधारण एष दोष इति पराशरः। तेषामपि मर्मज्ञभयात् कृताकृतान्य-नुवर्तेत।**

**व्याख्या-** अमात्योत्पत्तिरिति सूत्रम्। अमात्या नाम राज्ञः सहायाः तेषामुत्पत्तिः करणमिहोच्यत इत्यर्थः।

अमात्या नाम राज्ञः सहायाः

विद्यावृद्धसंयोगेन्द्रियजययुक्तोऽपि राजा सहायमन्तरेण राज्यपालनं कर्तुमशक्त इति सहायापेक्षायां तदुत्पत्तिरुच्यत इति प्रकरणसङ्गतिः।

के तावदमात्यपदमर्हन्तीत्यपेक्षायां भारद्वाजादयः सप्ताचार्याः सप्तधा वर्णयन्ति। तत्र भारद्वाजस्य पक्षमाह सहाध्यायिन इत्यादि। दृष्टशौच-सामर्थ्यत्वात् शौचं हृदयशुद्धिः तच्च सामर्थ्यं कार्यनैपुण्यं च दृष्टं सहाध्ययनकाले प्रत्यक्षितं येषां तेषां भावस्तत्वं तस्मात्। विश्वास्याः विश्वासयोग्याः।

तं पक्षं विशालाक्षः प्रतिषेधति - नेतीत्यादि। परिभवन्ति अवजानन्ति। के तर्ह्यमात्याः कार्यास्तत्राह ये हीति। गुह्यसधर्माणः गुह्यं शीलच्युतिः पारदारिकत्वादि तत्र समानाः। तथाविधानाममात्यीकरणे गुणमाह- ते हीति। ते हि मर्मज्ञभयात् अस्मन्मर्मज्ञो राजेति भयात्। अस्य नापराध्यन्ति अपराधं न कुर्वन्ति, यत्नेन शीलसौष्ठवमासाद्य स्वकर्म सम्यगनुतिष्ठन्तीत्यर्थः।

पराशरमतमाह - साधारण इति। एष दोषः दुश्शीलत्वे, साधारणः गुह्यसधर्मणां राज्ञश्च समानः। अस्तु को दोष इति चेदाह- मर्मज्ञ-भयात् अमात्या मन्मर्मज्ञा इति भयात्, तेषामपि अमात्यानामपि, कृताकृतानि असुष्ठुकृतानि कर्मणि अनुवर्तेत अनुसरेत्, अर्थात् राजा।

**यावद्भयो गुह्यमाचष्टे जनेभ्यः पुरुषाधिपः।**
**अवशः कर्मणा तेन वश्यो भवति तावताम्॥**

**य एनमापत्सु प्राणाबाधयुक्तास्वनुगृह्णीयुस्तानमात्यान् कुर्वीत, दृष्टानुरागत्वादिति।**

**नेति पिशुनः। भक्तिरेषा न बुद्धिगुणः। सङ्ख्यातार्थेषु कर्मसु नियुक्ता ये यथादिष्टमर्थं सविशेषं वा कुर्युस्तानमात्यान् कुर्वीत, दृष्टगुणत्वादिति।**

**नेति कौणपदन्तः। अन्यैरमात्यगुणैरयुक्ता ह्येते। पितृपैतामहानमात्यान् कुर्वीत, दृष्टापदानत्वात्। ते ह्येनमपचरन्तमपि न त्यजन्ति, सगन्धत्वात्। अमानुषेष्वपि चैतद् दृश्यते - गावो असगन्धं गोगणमतिक्रम्य सगन्धेष्वेदावविष्ठन्ते इति।**

**व्याख्या-** अस्मिन्नर्थे श्लोकमाह- यावद्ध्य इत्यादि। गुह्यम् आचष्टे स्वं शीलभ्रंशं प्रकाशयति। अवशः अधीरः। एवश्च गुह्यसधर्मणोऽमात्यान् न कुयादित्यभिप्रायः।

अनुगृह्णीयुः उपकुर्युः

कस्तर्हि कुर्यादित्यत्राह य एनमिति। अनुगृह्णीयुः उपकुर्युः। उक्तपक्षं खण्डयति - नेतीति। पिशुनः नारदः। तत्र हेतुरुच्यते - भक्तिरेषा न बुद्धिगुणः स्वशेरीरनैरपेक्ष्येण राजरक्षणप्रवृत्तिर्नामायं सेवाधर्मः नतु बुद्धिगुणः बुद्धिगुणसम्पन्नश्चामात्यो भवितुमर्हत्तीत्याधयः। संख्यातेत्यादि। ये संख्यातार्थेषु परिगणितद्रव्योत्पत्तिषु, कर्मसु नियुक्ताः अर्थ यथादिष्टं सविशेषं वा कुर्युः द्रव्यं क्लुप्तसंख्यानूनं क्लुप्तसंख्याधिकसंख्यं वा भावयेयुः।

नारदपक्षं कौणपदन्तो निराचष्टे नेति कौणपेत्यादि। अन्यैर्गुणैः धन-भावनातिरिक्तैर्विश्वास्यावानुरक्तत्वादिभिर्गुणैः। पितृपैतामहान् पितृपितामहक्रमागतान्। दृष्टापदानत्वात् साक्षादनुभूतं अपदानं पूर्ववृतंयेषां ते दृष्टापदानाः तेषां भावस्तत्त्वं तस्मात्। एतेन पूर्वपुरुषशीलप्रत्येयगुणत्वमुक्तम्।

गुणान्तरमाह वे हीति। अचरन्तमपि एवम् आत्मापकारिणमपि स्वामिनम्। सर्गबन्धत्वात् सम्बन्धित्वात् परीचितत्वात्। संबंधसामान्य वचन इह गन्धशब्दः। पशुदृष्टान्तमा। अमानुषेष्विति। एतत् परिचयस्य परीचितात्यागकारणत्वं। असगन्धं अपरीचितम्।

**नेति वातव्याधिः, ते तस्य सर्वमवगृह्य स्वामिवत् प्रचरन्तीति। तस्मान्नीतिविदो नवानमात्यान् कुर्वीत, नवास्तु यमस्थाने दण्डधरं मन्यमाना नापराध्यन्तीति।**

**नेति बाहुदन्तीपुत्रः। शास्त्रविददृष्टकर्मा कर्मसु विषादं गच्छेत्। अभिजनप्रज्ञाशौचशौर्यानुरागयुक्तानमात्यान् कुर्वीत, गुणप्राधान्या-दिति।**

**सर्वमुपपन्नमिति कौटिल्यः, कार्यसामर्थ्याद्धि पुरुषसामर्थ्यं कल्प्यते सामर्थ्यतश्च।**

**व्याख्या-** उक्तं पक्षं वातव्याधिर्नानुमन्यत इत्याह- नेति वातेत्यादि। वातव्याधिरुद्धवः श्रीकृष्णमन्त्री। ते कुलक्रमागता अमात्याः। अस्य सर्वमवगृह्य स्वामिनः समस्तं विभवमवष्टभ्य स्वामिवत् प्रचरन्ति स्वतन्त्रवृत्तयो भवेयुः। के तर्ह्यमात्याः कार्या इत्याह- तस्मादित्यादि। नवान् पूर्वसम्बन्धरहितान्। दण्डधरं यमस्थाने मन्यमानाः राजानं यमवदुग्रदण्डं बुध्यमानाः।

इममपि पक्षं बाहुदन्तीपुत्रो न सहत इत्याह- नेति बाह्विति। कुत इत्यत्राह - शास्त्रेत्यादि।

नीतिशास्त्रमन्थनिष्णातस्तदर्थानुष्ठानपरिचयविकलः अमात्यकर्मसु अवसादं प्राप्नुयात् अनिर्वाही स्यादित्यर्थः। कांस्तर्हि अमात्यान् कुर्वीतेत्यत्राह अभिजनेत्यादि। अभिजनो वंशशुद्धिः प्रज्ञा बुद्ध्यतिशयः

शौचमुपधाश्शुद्धिः शौर्यम् उत्साहशक्तिः अनुरागः स्वामिभक्तिः एतैर्युक्ता ये पुरुषाः तान् अमात्यान् कुर्वीत। कुतः, गुणप्राधान्यात् गुणानामेव प्रधानत्वात्।

स्वमतमाह - सर्वमिति। सर्वम् उपपन्नं, शौचसामर्थ्यादयो गुणाः स्वामिपरिभवादिदोषाव पूर्वोक्ताः सहाध्यायिप्रभृतिषु न्याय्याः। कुतः, हि यस्मात् कारणात्, पुरुषसामर्थ्यं पुरुषस्य तत्तदधिकारपदयोग्यता, कार्यसामर्थ्यात् सामर्थ्यतश्च कार्याणां सहाध्ययनक्रीडादीनां शक्त्या सामर्थ्याच्च प्रज्ञाशास्त्रसंस्कारशौर्यादितारतम्ययोगित्वलक्षणात्, कल्प्यते व्यवस्थाप्यते इत्यर्थः। गुणदोषोभयोपपन्नत्वं वदता चार्थादिदमुक्तं भवति - सहाध्यायिप्रभृतयो न तमन्त्राने कर्तव्याः परिभवादि दोषयोगाद्। परिशेष्यात्तु कर्म सचिवपदे कर्तव्याः। तत्तद्गुणापेक्षेषु च कर्मसु देशकालनुरोधेन नियोक्तव्याः इति

**विभज्यामात्यविभवं देशकालौ च कर्म च।**
**अमात्याः सर्व एवैते कार्याः स्युर्नतु मन्त्रिणः॥**

**इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे अष्टमोऽध्यायः अमात्योत्पत्तिः॥**

अमात्यविभवं विश्वास्यत्वाद्यमात्यगुणसम्पदम्

**व्याख्या**-एतदर्थकमध्यायप्रान्ते श्लोकमाह- विभज्येत्यादि। अमात्यविभवं विश्वास्यत्वाद्यमात्यगुणसम्पदम्। विभज्य यस्मिन् देशे यस्मिन् काले यस्य कर्मणः सुष्ठु निष्पत्तये यो गुणोऽपेक्ष्यते, तं तं यथायथं विविच्येत्यर्थः। सर्व एवैते तत्तद्गुणवन्तः सहाध्याय्यादयः सर्वेऽपि। अमात्याः कर्मसचिवाः कार्याः, मन्त्रिणस्तु न कार्याः मन्त्रिपदे तु न निवेश्याः॥

## Summarised Overview

विनयाधिकारिकस्य चतुर्थाध्याये वार्तादण्डनीतेः विचारः क्रियते। अनन्तरं वृद्धसंयोग नाम अध्याये आन्वीक्षिकी इत्यादियुक्तैः ज्ञानवृद्धैः सह राज्ञः आचार्यछात्ररूपेण सम्बन्धः भवेत् इति अकथयत्।अन्येषां त्रयाणां विद्यानां आधारः दण्डः अस्ति। यदि सः दण्डः विनयात् स्यात्, तस्मात् कल्याणं भविष्यति। विनयः द्विविधः- शास्त्रसंस्कृतौ जायमानं विनयं कृतकम्। स्वतः जायमानं विनयं स्वाभाविकम्। क्रिया हि द्रव्यं विनयति न अद्रव्यम्। तथा च स्वभावतः विनयशीलाः एव विनयगुणं उपदेष्टुं शक्यन्ते। शुश्रूषा, श्रवणं, ग्रहणं, धारणा, विज्ञानं,ऊहः , अपोहम् (अयुक्तस्य निराकरणं), तत्त्वैः विद्या सुपात्रशिष्यान् उपदिश्यति। इन्द्रियजयः अरिषड्वर्गत्यागः-कौटिल्य-अर्थशास्त्रे इन्द्रियजयस्य चर्चा वर्तते। इन्द्रियजयेन को लाभहानिः इति विषये विवेचनं वर्तते। विद्याविनयहेतुः इन्द्रियजयः, कामक्रोध- लोभ- मान- मद- हर्ष त्यागात्कार्यः। राजर्षिवृत्तम् इति अष्टमे अध्याये राजर्षिणारिषड्वर्गपरित्यागेन इन्द्रियजयपूर्वकं वृद्धसंयोगेन प्रज्ञां, चारेण चक्षुः, उत्थानेन योगक्षेमसाधनम्, कार्यानुशासनेन स्वधर्मस्थापनं, विद्योपदेशेन विनयम्, अर्थसंयोगेन लोकप्रियत्वम्, हितेन वृत्तिं च सततं कुर्वीत इति मुख्यतया कथयति।अष्टमे अमात्योत्तिनाम अध्याये मन्त्री-पुरोहितसखः राजा सामान्येषु अधिकरणेषु स्थापयित्वा अमात्यान् उपधाभिः शोधयेत्, किन्तु तत्र आत्मानं देवीं वा माध्यमं न कुर्यात् इति विस्तरेण कथयति।

## Assignments

1. वार्ता नाम का ?
2. दण्डनीतेः स्वरूपं विशदयत।
3. अर्थशास्त्रे निरूपितां दण्डनीतिस्थापनां विशदयत।
4. वृद्धसंयोगः इति अध्यायस्य आशयं विशदयत।
5. विद्यासामर्थ्यं कथं प्राप्नुयात् इति विशदयत।
6. इन्द्रियजयः कामक्रोधलोभमानमदहर्षत्यागात् कार्यः। विशदयत।
7. राजर्षिवृत्तं निरूपयत।
8. अमात्योत्पतिं विचारयत।

## Suggested Readings


1. कौटिलीयं अर्थशास्त्रम् - Dr. R. Shama Sastry, Mysore Government Branch Press,1924.
2. संस्कृतमञ्जूषा - डा. उदयशंकर झा, चौखंबा कृष्णदास् अकादमी, वाराणसी।


## References

1. Arthaśāstra Vinayādhikārika. of Kautilya
2. The Kauṭilīya Arthaśāstra, R. P. Kangle (All the three Volumes)
3. Current Readings in Arthasastra, Ed. C. Rajendran, University of Calicut, 2008
4. Science and Technology as Reflected in Arthaśāstra, P. V. Narayanan, University of Calicut, 2008

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

# अर्थशास्त्रे विनयाधिकारिका भागः -2

## BLOCK - 4

SGOU

UNIT 1

# विनयाधिकारिकायाः सविशेषाध्ययनम् (अध्यायः 9-11)

## Learning Outcomes

- कौटिल्यस्य अर्थशास्त्रपठनेन भारतीयराजनैतिकपरम्परायाः ज्ञानं प्राप्नोति।
- स्वीकृतपाठभागपठनेन अर्थशास्त्रस्य ज्ञानं लभते।
- विनयाधिकारिकापठनेन सविशेषज्ञानं लभते।
- संस्कृतसाहित्ये अर्थशास्त्रस्य प्रभावं द्रष्टुं शक्नोति।

## Background

अर्थशास्त्रं प्राचीनभारतस्य राजनीतिविषयकः एकः महत्वपूर्णग्रन्थः अस्ति। असाधारणवैदुष्यपण्डितस्य कौटिल्यस्य गौरवगाथा पुराणेषु इतिहासेषु च सुप्रसिद्धा अस्ति। अस्य (कौटिल्यस्य) अपरं नाम विष्णुगुप्तः, द्रमिलः, चाणक्यश्चापि समुपलभ्यते। महाराजाय चान्द्रगुप्ताय अनेन विष्णुगुप्तेन या राजनैतिकसंहिता निर्मिता - सैव अर्थशास्त्रम् इति नाम्ना अभिधीयते।

कौटिल्यप्रणीतम् अर्थशास्त्रमिदं राजनीतिविज्ञानस्य विश्वकोशमित्युच्यते विद्वद्भिः। ग्रन्थेऽस्मिन् धर्मशास्त्रं, नीतिशास्त्रं, शिक्षाशास्त्रं, समाजशास्त्रं, चिकित्साशास्त्रं, तन्त्रशास्त्रं, कृषिविज्ञानम्

इत्यादिकं सर्वं वर्णितमस्ति । अर्थशास्त्रमिदं १५ अधिकरणेषु, १५० अध्यायेषु, १८० प्रकरणेषु च विभक्तमस्ति। एतानि तन्त्रम्, आतापः, शेष इति त्रिषु भागेषु विभक्तानि। आदौ पञ्चाधिकरणेषु स्वदेशहितचिन्तनं प्रतिपाद्यते।

एष स्वग्रन्थारम्भे पूर्वाचार्यप्रणीतान् सर्वान् ग्रन्थान् वीक्ष्य तेषामभिप्रायान् एकत्र सङ्गृह्य एतच्छास्त्रं कृतमिति प्रतिजानीते। कौटल्यः अस्मिन् ग्रन्थे आन्वीक्षिकी तर्कशास्त्रम्, त्रयी, वार्ता, दण्डनीतिरिरिति चतस्रः विद्याः प्रतिपादयति। राज्ञः इन्द्रियजय एव प्रधानः जयः, इति अभिधाय कामक्रोधाद्यरिषड्वर्गान् पूर्वभागान् विनष्टान् उदाहृत्य जितेन्द्रियान् यशस्विनः राज्ञः प्राशंसत्। कौटिल्यस्य अर्थशास्त्रानुसारं अमात्यः, बुद्धिमान्, निष्पक्षः, अनुभवी च भवेत्। केचन विशिष्टाः गुणाः तस्मिन् भवेयुः। अमात्यः राज्ञः महत्त्वपूर्णः साहाय्यकरः इति मन्यते। अतः तस्य योग्यतायाः, प्रामाणिकतायाः च विषये महत् ध्यानं दातव्यम्। अमात्यस्य गुणाः के, तस्य उत्पत्तिः, गूढपुरुषाः के, उपधाचातुर्विध्यं इत्यादयः विषयाः अध्याये अस्मिन् निरूपिताः। तदधिकृत्य वयं पठामः ।

## Keywords

जानपदात्वादिगुणसम्पन्नः - शौचाशौचज्ञानम् - अमात्यानाम् - उपधा - धर्मोपधा - अर्थोपधा - कामोपधा - भयोपधा - विनियोगस्थानानि - गूढपुरुषाः - कापटिकः - उदास्थितः - गृहपतिकव्यञ्जनः- वेदेहकव्यञ्जनः - तापसव्यञ्जनः।

## Discussion

## नवमोऽध्यायः - मन्त्रिपुरोहितोत्पत्तिः।

मन्त्री प्रधानामात्यः यस्मित्राप्तत्ताः कर्मसचिवाः पुरोहितः पुरः अग्रे धीयते सर्वकार्येषु प्रमाणत्वेन निवेश्यत इति पुरोहितः, तयोः उत्पत्तिः इह अभिधीयते।

अमात्यगुणाः

**जानपदोऽभिजातः स्ववग्रहः कृतशिल्पः चक्षुष्मान् प्राज्ञो धारयिष्णुः दक्षो वाग्मी प्रगल्भः प्रतिपत्तिमान् उत्साहप्रभावयुक्तः क्लेशसहः शुचिर्मैत्रो दृढभक्तिः शीलबलारोग्यसत्वसंयुक्तः स्तम्भचापल्यवर्जितः संप्रियो वैराणाम् अकर्ता इत्यमात्यसम्पत्। अतः पादार्धगुणहीनौ मध्यमावरौ।**

**अर्थः** - जानपदत्वादिगुणसम्पन्नाः अमात्या। जानपदः विजिगीषु-राणाभवः। अभिजातः विशुद्धान्वयः। स्ववग्रहः शोभनबन्धुः सुखेन अवग्रहीतुं प्रामादिककार्यप्रवृत्तेः वारयितुं शक्या। कृतशिल्पः कृतं शिक्षितं गजाश्वारोहणरथयुद्धायुधगान्धर्वविद्यादिकं येन स तथा। चक्षुष्मान् अर्थशास्त्रं चक्षुः तदभिज्ञः। प्राज्ञः सहजबुद्धिसम्पन्नः धारयिष्णुः अविस्मरणशीलः। दक्षा क्षिप्रकारी। वाग्मी मधुरोपपन्नवक्ता। प्रगल्भः प्रौढः। प्रतिपत्तिमान् प्रतिकर्तुं प्रतिवक्तुं च समर्थः, इतिकर्तव्यतानिश्चयवान् वा। उत्साहप्रभावयुक्तः उत्साहयुक्तः पुरुषकारवान् प्रभावयुक्तः प्रभुशक्तिमान्। क्लेशसहः जितश्रमः। शुचिः चतुर्विधोपधाशुद्धः। मैत्रः सर्वत्र स्निग्धव्यवहर्ता। दृढभक्तिः अविचाल्यराजानुरागः। शीलबलारोग्य सत्त्वसंयुक्तः शीलं सद्वृत्तं बलं देहशक्तिः आरोग्यं निर्व्याधित्वं सत्त्वं धैर्यम् एतैः युक्तः। स्तम्भचापल्यवर्जितः स्तम्भवर्जितः विगर्वः प्रणतशीलो वा चापल्यवर्जितः स्थिरकृतिः। संप्रियः सौम्यदर्शनः। वैराणामकर्ता स्त्रीभूम्यादिनिमित्तानां वैराणामनुत्पादकः शमयिता च। एभिः पञ्चविंशतिगुणैः सम्पन्नः उत्तमो मन्त्री। अतः एभ्यः गुणेभ्यः,

पादार्थगुणहीनौ मध्यमावरौ, चतुर्थांशगुणहीनौ मध्यमः, अर्धगुणहीनौ अधमा इत्यर्थः।

**अथ जानपदत्वादिज्ञानोपायानाह -**

अमात्यपरीक्षा

**तेषां जानपदमवग्रहं चाप्यतः परीक्षेत, समानविद्येभ्यः शिल्पं शास्त्रचक्षुष्मत्तां च; कर्मारम्भेषु प्रज्ञां धारयिष्णुतां दाक्ष्यं च, कथायोगेषु वाग्मित्वं प्रागल्भ्यं प्रतिभानवत्वं च; आपद्युत्साहप्रभावौ क्लेशसहत्वं च; संव्यवहाराच्छौचं मैत्रतां दृढभक्तित्वं च; संवासिभ्यः शीलबलारोग्यसत्त्व-योगमस्तम्भमचापल्यं च; प्रत्यक्षतः संप्रियत्वमवैरित्वं च।**

**अर्थः -** तेषां जानपदत्वादीनां मध्ये अथवा उत्तममध्यमाधमानां मन्त्रिणां जानपदमवग्रहं च आप्यतः आप्तियोग्यात् विश्वासयोग्यात् परीक्षेत परीक्ष्य जानीयात्। आप्तः यथादृष्टार्थवादी। शिल्पं शास्त्रचक्षुष्मत्तां च समानविद्येभ्यः तुल्यविद्याविद्भ्यः जानीयात्। प्रज्ञां धारयिष्णुतां दाक्ष्यं च कर्मारम्भेषु कार्यानुष्ठानेषु जानीयात्। वाग्मित्वं प्रागल्भ्यं प्रतिभानवत्वं च कथायोगेषु कार्यकथनप्रसङ्गेषु जानीयात्। प्रतिभानवत्वं नवनवप्रज्ञोन्मेषशालित्वम्। उत्साहप्रभावो क्लेशसहत्वं च आपदि जानीयात्। शौचं मैत्रतां दृढभक्तित्वं च संव्यवहारात् समाचरणात् जानीयात्। शीलबलारोग्यसत्वयोगम् अस्तम्भम् अचापल्यं च संवा-सिभ्यः सहवासिभ्यः जानीयात्। संप्रियत्वम् अवैरित्वं च प्रत्यक्षतः स्वय-मनुभवात् जानीयात्।

अमात्यकर्म

**प्रत्यक्षपरोक्षानुमेया: हि राजवृत्तिः। स्वयंदृष्टं प्रत्यक्षं, परोपदिष्टं परोक्षम्, कर्मसु कृतेनाकृतावेक्षणमनुमेयम्। यौगपद्यात् तु कर्मणामनेकत्वादनेकस्थत्वाच्च देशकालात्ययो मा भूदिति परोक्ष-ममात्यैः कारयेदित्यमात्यकर्म।**

**अर्थः -** जानपदत्वादिगुणज्ञाने प्रत्यक्षम् आप्तवाक्यमनुमानमिति त्रीणि प्रमाणानि आश्रयणीयानि। राजवृत्तिः दण्डनीतिप्रतिपाद्यो राजव्यवहारः प्रत्यक्षपरोक्षानुमेयाः। परोपदिष्टम् आप्तवाक्यादवगतम्। कृतेन अकृतावेक्षणमनुमेयम् अनुष्ठितेन कर्मांशेन करिष्यमाणांशपरिणामोत्प्रेक्षणमनुमानायत्तमित्यर्थः। एवञ्च यतो राजवृत्तिः त्रिप्रमाणावसेया ततः त्रिप्रमाणप्रदर्शनमित्यभिप्रायः। किमर्थं महता प्रयासेन परीक्ष्यैव अमात्याः कर्तव्या इति चेत् तत्राह - यौगपद्यादित्यादि। अयं भावः- कर्माणि खलु नाम राजकीयानि बहूनि बहुप्रकाराणि बहुप्रदेशस्थानि सद्यः करणीयानि च भवन्ति। तानि सर्वाणि साक्षादेव राज्ञा स्वयमनुष्ठातुं न शक्यन्त इति यथादेशकालं तेषामनुष्ठानसिद्ध्यर्थम् अमात्या एव राज्ञा नियोक्तव्याः। एषितव्याश्च ते गुणवन्त एव कर्मानुष्ठानसम्यक्त्वाय इत्यावश्यकं तेषां महताप्रयासेन गुणपरीक्षणमिति।

पुरोहितोत्पत्तिः

**पुरोहितमुदितोदितकुलशीलं षडङ्गे वेदे दैवे निमित्ते दण्डनीत्यां च अभिविनीतमापदां दैवमानुषीणां अथर्वभिरुपायैश्च प्रतिकर्तारं कुर्वीत। तमाचार्यं शिष्यः पितरं पुत्रो भृत्यस्स्वामिनमिव चानुवर्तेत।**

**अर्थः -** उदितोदितकुलशीलत्वादियुक्तं पुरोहितं कुर्वीत। उदितोदितकुलशीलम् उदितोदितम् उदितैः शास्त्रोक्तैः उदिताः समृद्ध्या उदितोदिताः तेषाम् कुलं शीलं वृत्तं च यस्य तं तथाभूतम्, उदितोदितकुलजातम् चेत्यर्थः। षडङ्गे वेदे, दैवे ज्योतिश्शास्त्रे पूर्वकर्मपरिपाकलक्षणाद् दैवप्रतिपादके, निमित्ते शकुनशास्त्रे, दण्डनीत्यां च, अभिविनीतं शिक्षितम्। देवमानुषीणां देवकृतानां मानुषकृतानां च, आपदाम्, अथर्वभिः अथर्वमन्त्रप्रयोगैः, उपायैश्च सामदानादिभिश्च, प्रतिकर्तारं परिहर्तारम्। शिष्यः आचार्यमिव, पुत्रः पितरमिव, भृत्यः

स्वामिनमिव च तम् उदितोदितकुलशीलत्वादियुक्तं पुरोहितम् अनुवर्तत अनुसरेत् तत्परतन्त्रो भवेत्।

**ब्राह्मणेनैधितं क्षत्रं मन्त्रिमन्त्राभिमन्त्रितम्।**
**जयत्यजितमत्यन्तं शास्त्रानुगमशस्त्रितम्॥**

**अर्थः** - ब्राह्मणेन यथोक्तगुणेन पुरोहितेन, एधितं वर्धितं, मन्त्रिमन्त्राभिमन्त्रितं मन्त्रिणां यथोक्तगुणस्य मन्त्रेण अर्थनिश्चयेन अभिमन्त्रितं संस्कृतं, अत एव शास्त्रानुगं शास्त्रोक्तानुष्ठानपरं, क्षत्रं क्षत्रियकुलं कर्तृ, अशस्त्रितं सत्, युद्धं विनैव इत्यर्थः, अत्यन्तम् एकान्तता, अजितं जयति अलब्धं लभते।

## दशमोऽध्यायः - उपधाभिः शौचाशौचज्ञानममात्यानाम्।

उपधाभिः छलैः अमात्यानां शौचाशौचज्ञानं अभिधीयते। शौचं स्वामिनि अदुष्टभावता। अशौचं दुष्टभावता। जानपदत्वादिगुणसम्पन्नः अपि उपधाशुद्धिविरहे अमात्यत्वं न अर्हति।

**मन्त्रिपुरोहितसखः सामान्येष्वधिकरणेषु स्थापयित्वा अमात्यानुपधाभिः शौचयेत्।**

उपधा चातुर्विध्यम्

**अर्थः** - मन्त्रिपुरोहितसखः मन्त्रिपुरोहितसमुपेतः सामान्येषु अधिकरणेषु साधारणेषु अप्रधानेष्वधिकारपदेषु अमात्यान् स्थापयित्वा उपधाभिः वक्ष्यमाणैः छलैः शौचयेत् शोधयेत्। उपधा चतुर्विधा। धर्मोपधा, अर्थोपधा, कामोपधा, भयोपधा च।

**पुरोहितमयाज्ययाजनाध्यापने नियुक्तममृष्यमाणं राजा अवक्षिपेत्। स सत्रिभिः शपथपूर्वमेकैकममात्यमुपजापयेत् - अधार्मिकः अयं राजा, साधु धार्मिकमन्यमस्य तत्कुलीनमवरुद्धं कुल्यमेकप्रग्रहं सामन्तमाटविकमौ-**

**पपादिकं वा प्रतिपादयामः। सर्वेषामेतद्रोचते, कथं वा तवेति। प्रत्याख्याने शुचिरिति धर्मोपधा।**

धर्मोपधा

**अर्थः** - राजा अयाज्ययाजनाध्यापने याजयितुमनर्हस्य वृषलीपत्यादेः याजने अध्यापने च नियुक्तं चोदितम्, अमृष्यमाणम् अधर्मनियोजनेन कुप्यन्तं, पुरोहितम् अवक्षिपेत् अवमन्येत स्वपदादवरोपयेद् वा। सः अवक्षिप्तः पुरोहितः, सत्रिभिः स्त्रीपुरुषलक्षणनिमित्तादिशास्त्रा भिज्ञापदेशचारिणः सञ्चारविशेषाः सत्रिणः तैः प्रयोज्यकर्तृभिः, एकैकम् अमात्यं शपथपूर्वम् उपजापयेत् भेदयेत्। उपजापस्य शपथपूर्वत्वम् अनुद्वेदार्थम्। अयं राजा अधार्मिकः अधर्मप्रवृत्तः। साधु धार्मिकं तत्कुलीनं प्रकृतराजवंशभवम्, अवरुद्धम् अवरुद्ध्य रक्ष्यमाणं तत्पुत्रादिकं, कुल्यं राजभावार्हकुलोत्पन्नम्, एकप्रग्रहम् एकः तुल्यः सर्वैरविशेष क्रियमाणः प्रग्रहः पूजा यस्य तं सर्वपूजितमित्यर्थः, सामन्तं विषयानन्तरं राजानम्, आटविकम् अटवीपतिम्, ओपपादिकम् उपपादं प्रत्यन्तपर्वतसमीपे भवः तम् अथवा औपपादिकमिति अस्माभिः सम्भूय सम्प्रधारणीयमित्यर्थः, अस्य प्रतिपादयामः अस्य स्थाने निवेशयामः। एतद् उपन्यस्तं मतं सर्वेषां रोचते। कथं वा तव मतम्। प्रत्याख्याने शुचिः, इत्थमुपजापितो अमात्यः नाहमीदृशं कुर्यामिति यदि निरस्येत् तर्हि शुद्ध इत्यर्थः।

अर्थोपधा

**सेनापतिरसत्प्रग्रहेणावक्षिप्तः सत्रिभः एकैकममात्यमुपजापयेत् लोभनीये-नार्थेन राजविनाशाय - सर्वेषामेतद् रोचते, कथं वा तवेति। प्रत्याख्याने शुचिरित्यर्थोपधा।**

**अर्थः** - असत्प्रग्रहेणावक्षिप्तः अपूज्यपूजनेन निमित्तेन परिभूतः, अपूज्यपूजने राज्ञा चोदितः तदकुर्वन् अर्थमानाभ्यां हापितः, सेनापतिः सत्रिभिः लोभनीयेन उपजाप्यपुरुषकाम्येन अर्थेन एकैकममात्यं राजवि-

नाशाय उपजापयेत्। अपथप्रवृत्तः अयं राजा, साधु सत्पथवर्तिनमन्यमस्य स्थाने तत्कुलीनमवरुद्धं वा प्रतिपादयाम इत्येवमादिरूपः उपजापप्रकारः। सर्वषामेतद्रोचते, कथं वा तवेति। प्रत्याख्याने शुचिः इति अर्थोपधा।

कामोपधा

**परिव्राजिका लब्धविश्वासा अन्तःपुरे कृतसत्कारा महामात्रम् एकैकम् उपजपेत् - राजमहिषी त्वां कामयते कृतसमागमोपाया। महान् अर्थश्च भविष्यति इति। प्रत्याख्याने शुचिः इति कामोपधा।**

**अर्थः** - खोणेषु प्रयोज्या कामोपधा। परिव्राजिका भिक्षुकी। कृतसत्कारा राजमहिषिभिः पूजिता।

भयोपधा

**प्रवहणनिमित्तम् एकः अमात्यः सर्वान् अमात्यान् आवाहयेत्। तेन उद्वेगेन राजा तानवरुन्ध्यात्। कापटिकः छात्रः पूर्वावरुद्धः तेषाम् अर्थमानावक्षिप्तम् एकैकममात्यमुपजपेत् - असत्प्रवृत्तः अयं राजा, साध्वेनं हत्वा अन्यं प्रतिपादयिष्यामः। सर्वेषामेतद् रोचते, कथं वा तवेति। प्रत्याख्याने शुचिरिति भयोपधा।**

**अर्थः** - प्रवहणनिमित्तं प्रवहणं नौविशेषः, तेन जलस्थलयात्रा-क्रीडोद्यानभोजनादिकं गोष्ठीकौतुकं लक्ष्यते, तदर्थमित्यर्थः, एकः अमात्यः सर्वान् अमात्यान् आवाहयेत् आनीय मेलयेत्। तेन उद्वेगेन तन्निमित्तेन उद्वेगेन अक्षमया तान् अमात्यान् अवरुन्ध्यात् अर्थमानापहारादिना अपकुर्यात्। पूर्वावरुद्धः राज्ञा पूर्वमपकृतः, छात्रः कापटिकः अध्यापकाध्येतृवृत्तिः कापटिकाख्यः गूढपुरुषविशेषः, तेषाम् अमात्यानां मध्ये, अर्थमानावक्षिप्तम् अर्थमानाभ्यां हापितम्, एकैकममात्यम्, उपजपेत् राजसकाशाद् भेदयेत्। असत्प्रवृत्तः अशोभनकर्मप्रवृत्तः अयं राजा, साध्वेनं हत्वा अन्यं प्रतिपादयिष्यामः, सर्वेषामेतद्रोचते, कथं वा तव

इति उपजापप्रकार:। प्रत्याख्याने शुचिः इति भयोपधा। इयमुपधा भीरुविषया।

उपधाशुद्धानां यथायथं विनियोगस्थानानि

**तत्र धर्मोपधाशुद्धान् धर्मस्थीयकण्डकशोधनेषु स्थापयेद्, अर्थोपधाशुद्धान् समाहर्तृसन्निधातृनिचयकर्मसु,कामोपधाशुद्धान् बाह्याभ्यन्तरविहाररक्षासु, भयोपधाशुद्धान् आसन्नकार्येषु राज्ञः सर्वोपधाशुद्धान् मन्त्रिणः कुर्यात्। सर्वत्र अशुचीन् खनिद्रव्यहस्तिवनकर्मान्तेषूपयोजयेत्।**

**अर्थः** - तत्र उपधाचतुष्टयशोधितेषु मध्ये धर्मोपधाशुद्धान् धर्मस्थीयकण्डकशोधनेषु धर्मस्थानुबन्धिषु कण्डकशोधनेषु च स्थापयेत् नियुञ्जीत। अर्थोपधाशुद्धान् समाहर्तृसन्निधातृनिचयकर्ममु समाहर्तृकर्मसु धनोत्थापनादिलक्षणेषु, सन्निधातृनिचयकर्मसु च धनरक्षणलक्षणेषु नियुञ्जीत। कामोपधाशुद्धान् बाह्याभ्यन्तरविहाररक्षासु बाह्याभ्यन्तरा ये विहाराः कामक्रीडा अर्थात् विहारसाधनभूता नृपतिः तद्रक्षणकर्मसु नियुञ्जीत।तत्र बाह्या भोगिन्यः, आभ्यन्तर्गतस्तु देव्य इति ज्ञेयम्। भयोपधाशुद्धान् राज्ञः आसन्नकार्येषु शरीररक्षणदिकर्मसु नियुञ्जीत। सर्वोपधाशुद्धान् चतसृष्वप्युपधासु दृष्टशौचान् मन्त्रिणः कुर्यात्। सर्वत्र अशुचीन् सर्वासु उपधासु अशुचीन्, खनिद्रव्यहस्तिवनकर्मान्तेषु खनिः सुवर्णरजताद्युत्पत्तिस्थानं द्रव्यवनं दारुयोग्यवृक्षप्रायं वनं हस्तिवनं गजोत्पत्तिवनम् एतत्सम्बन्धिषु कर्मान्तेषु व्यापारस्थानेषु उपयोजयेत् अर्थात् कायावासकर्मणि।

**त्रिवर्गभयसंशुद्धानमात्यान् स्वेषु कर्मसु।**
**अधिकुर्याद् यथाशौचमित्याचार्या व्यवस्थिताः।।**

त्रिवर्गभयसंशुद्धान् त्रिवर्गभयैः धर्मार्थकामभयोपधाभिः दृष्टशौचान् यथाशौचं तत्तद् शुद्ध्यानुगुण्येन स्वेषु कर्मसु अधिकुर्यात् नियोजयेत् इत्याचार्याः व्यवस्थिताः। किन्तु कौटिल्यमतं न एवम्।

**नत्वेव कुर्यादात्मानं देवीं वा लक्ष्मीश्वरः।**
**शौचहेतोरमात्यानामेतत् कौटिल्यदर्शनम्॥**
**न दूषणमदुष्टस्य विषेणेवाम्भसश्चरेत्।**
**कदाचिद् हि प्रदुष्टस्य नाधिगम्येत भेषजम्॥**
**कृता च कलुषा बुद्धिरुपधाभिश्चतुर्विधा।**
**नागत्वान्तं निवर्तेत स्थिता सत्त्ववतां धृतो॥**
**तस्माद् बाह्यमधिष्ठानं कृत्वा चार्ये चतुर्विधे।**
**शौचाशौचममात्यानां राजा मार्गेत सत्रिभिः॥**

लक्ष्मीधरः राजा अमात्यानां शौचहेतोः अमात्यशुद्धिपरीक्षार्थं स्वात्मानं देवीं च विषयं नैव कुर्याद् इति कौटिल्यदर्शनम्।

कुत आत्मानं देवीं च न लक्ष्यं कुर्यादित्यत्राह - न दूषणमिति। अदृष्टस्य स्वभावाद् दोषशून्यस्य अमात्यादेः प्रतीकारसमर्थस्यापि, दूषणम् उपधया वञ्चनम्, अम्भसः विषेण दूषणमिव अम्भसः स्वभावतो जीवनहेतोः जलस्य एकान्तमरणहेतुना विषेण दूषणमिव, न चरेत् न कुर्यात्। सति प्रतीकारसामर्थ्यं दूषणेन को दोष इत्यत्राह - कदाचिदित्यादि। अयमर्थः - अदुष्टः अपि यद्युपधावशात् कदाचिद् प्रकर्षेण दुष्टान्तःकरणो भवेत्, तदानीम् अशक्यप्रतीकारः तत्सकाशादनर्थं आपतेदिति। उपधादूषिता च धीराणां बुद्धिः यतमाना स्वाध्यवसितार्थसिद्धिमप्राप्य नैव विरमतीत्याह - कृता चेत्यादि।

कथं तर्हि अमात्याः शोधनीया इत्याकाङ्क्षायामाह - तस्मादिति। तस्माद् राजा, चतुर्विधे चार्ये उपधाप्रयोगे, बाह्यं बहिरङ्गं दूष्यम्, अधिष्ठानं लक्ष्यं कृत्वा, अमात्यानां शौचाशौचं, सत्रिभिः सत्रिद्वारेण, मार्गत परीक्षेत।

## एकादशोऽध्यायः - गूढ़पुरुषोत्पत्तिः।

गूढपुरुषस्य द्वैविध्यम्

अमात्यशौचाशौचपरीक्षणं गूढपुरुषान् अन्तरेण न शक्यं कर्तुमिति तदुत्पत्तिः उच्यते। गूढपुरुषाः द्विविधाः, संस्थाः सञ्चारिणश्च। कापटिकः, उदास्थितः, गृहपतिकव्यञ्जनकः, वैदेहकव्यञ्जनः, तापसव्यञ्जनः च इति पञ्च संस्थाः। सत्रितीक्ष्णरसदभिक्षुकीश्च सञ्चाराः। कापटिकादीनां पञ्चानांमन्त्रिसहितो राजा कर्ता, "तमर्थमानाभ्यामुत्साह्य मन्त्री ब्रूयात्" इत्युक्तत्वात्। सत्रितीक्ष्णरसदभिक्षुकीणां तु विना मन्त्रिणं स्वयमेव राजा कर्ता, मन्त्रिशुद्धिपरिज्ञानाय अपि तन्नियोजनात्। संस्थाशब्दवाच्या कापटिकादय स्वस्थाने सम्यक् तिष्ठन्तः राजार्थमनुतिष्ठन्ति, न सञ्चरन्तः। सत्रिप्रभृतयस्तु सर्वत्र सञ्चरन्त एव राजार्थमनुतिष्ठन्ति। कुब्जवामन किरातमूकबधिरजडन्धनटनर्तकगायनवादनवाग्जीवनकुशीलवाः अपि गूढपुरुषाः।

**उपधाभिः शुद्धामत्यवर्गो गूढपुरुषानुत्पादयेत् कापटिकोदास्थित-गृहपतिकवैदेहकतापसव्यञ्जनान् सत्रितीक्ष्णरसदभिक्षुकश्च।**

उपधाभिः शुद्धामात्यवर्गः धर्मोपधादिभिः छलोपायैः शोधितसचिववर्गः राजा गूढपुरुषान् उत्पादयेत्। चकारात् कुब्जवामनकिरातमूक-बधिरजडन्धनटनर्तकगायनवादनवाग्जीवनकुशीलवाः अपि गृह्यन्ते।

कापटिकः

**परमर्मज्ञः प्रगल्भः छात्रः कापटिकः । तमर्थमानाभ्यामुत्साह्य मन्त्री ब्रूयात् - राजानं मां च प्रमाणं कृत्वा यस्य यदकुशलं पश्यसि तत् तदानीमेव प्रत्यादिशेति ।**

परमर्मज्ञः परच्छिद्रवेदी, प्रगल्भः प्रौढः, छात्रः अध्यापकाध्येतृवृत्तिः कापटिकः । निष्परिग्रहत्वात् शरीरमात्रपरिच्छदो राजकार्यकपरः । कपटवृत्तित्वात् कापटिकः । तं कापटिकम् अर्थमानाभ्यां धनबहु-मानाभ्यां उत्साह्य मन्त्री ब्रूयात् - यस्य यदकुशलं पश्यसि यस्य अमात्यादेः यद् अवद्यं चौर्यं परदाराभिमर्शनमित्येवञ्जातीयम् उपलभसे तत् तदानीमेव प्रत्यादिश विज्ञापय इति ।

उदास्थितः

**प्रव्रज्याप्रत्यवसितः प्रज्ञाशोधयुक्तः उदास्थितः । स वार्त्ताकर्मप्रदिष्टायां भूमौ प्रभूतहिरण्यान्तेवासी कर्म कारयेत् । कर्मफलाच्च सर्वप्रव्रजितानां ग्रासाच्छादनावसधान् प्रतिविदध्यात् । वृत्तिकामान् च उपजपेत् - एतेनैव वेषेण राजार्थश्चरितव्यो भक्तवेतनकाले चोपस्थातव्यमिति । सर्वप्रव्र-जिताश्च स्वं स्वं वर्गमुपजपेयुः ।**

प्रव्रज्याप्रत्यवसितः चतुर्थाश्रमात् प्रतिनिवृत्तः सन्न्यासं प्राप्य ततश्च्युतः, बौद्धशैवव्रतादिच्युतानामपीदमुपलक्षणं, प्रज्ञाशौचयुक्तः प्रज्ञया मत्या शौचेन सत्वेन च युक्तः, उदास्थितः । प्रभूतहिरण्यान्तेवासी प्रभूताः प्रचुराः हिरण्यान्तेवासिनः धनानि शिष्याश्च यस्य स तथाभूतः, अनेन वार्त्ताकर्मापेक्षिता मूलधनसम्पत् कर्मकरसम्पत् च उक्ता, सः उदास्थितः, वार्त्ताकर्मप्रविष्टायां कृषिवाणिज्यपशुपालकर्मार्थे उपकल्पितायां, भूमौ, कर्म वार्त्तकर्म कारयेत् ।

कर्मफलाच्च सर्वप्रव्रजितानां सर्वेषां स्वकर्मकरातिरिक्तानामपि सन्न्यास्यादीनां, ग्रासाच्छादनावसथान् अन्नवस्त्रवासस्थानानि, प्रति-

विदध्यात् संविदधीत। ग्रासादिप्रतिविधानस्य सर्वविषयत्वं प्रसिद्ध्यर्थं, प्रसिद्धिश्च तदर्थिनवनवान्तेवास्युपस्थानार्थेति बोद्धव्यम्। वृत्तिकामान् स्वदीयमानग्रासादिना नित्यदेहयात्रां ये कामयन्ते तान्, उपजपेत् वशीकुर्यात्। अनेन परिगृहीतेनैव बौद्धभिक्षुपाशुपतादिवेषेण राजप्रयोजनं परराष्ट्रवृत्तगवेषणरूपं युष्माभिरनुष्ठेयं, गृहीतपरराष्ट्रवृत्तान्तेश्च धान्यतण्डुलादिधृतिग्रहणकाले सन्निधातव्यमिति उपजापप्रकारः। सर्वप्रव्रजिताः स्वं स्वं वर्गमुपजपेयुः, बौद्धाः बौद्धं, पाशुपताः पाशुपतम् इत्येवं स्वस्वजातीयम् उपजपेयुः उपजप्य स्वसहायान् कुर्युः।

उपजापप्रकारः

**कर्षको वृत्तिक्षीणः प्रज्ञाशौचयुक्तो गृहपतिकव्यञ्जनः। स कृषिकर्मप्रदिष्टायां भूमाविति समानं पूर्वेण।**

गृहपतिकव्यञ्जनः

वृत्तिक्षीणः कृषिवृत्त्या क्षयं प्राप्तः प्रज्ञाशौचयुक्तः कर्षकः कृषिशीलः गृहपतिकव्यञ्जनः। स कृषिकर्मप्रदिष्टायां भूमौ इत्यादिकं उदास्थितकृत्योक्तेन तुल्यम्। कृषिकर्मपदिष्टायां भूमौ प्रभूतहिरण्यान्तेवासी प्रभूताः प्रचुरा हिरण्यान्तेवासिनः धनानि शिष्याश्च यस्य स तथाभूतः, अनेन कृषिकर्मापेक्षिता मूलधनसम्पत् कर्मकरसम्पत् च उक्ता, सः गृहपतिकव्यञ्जनः, कृषिकर्मप्रदिष्टायां कृषिवाणिज्यपाशुपाल्यकर्मार्थे उपकल्पितायां, भूमौ, कर्म कृषिकर्म, कारयेत्। कर्मफलाच्च सर्वगृहपतिकव्यञ्जनानां ग्रासाच्छादनावसथान् अङ्गवस्त्रवासस्थानानि, प्रतिविदध्यात् संविदधीत। ग्रासादिप्रतिविधानस्य सर्वविषयत्वं प्रसिद्ध्यर्थं, प्रसिद्धिश्च तदर्थिनवनवान्तेवास्युपस्थानार्थेति बोद्धव्यम्। वृत्तिकामान् स्वदीयमानग्रासादिना नित्यदेहयात्रां ये कामयन्ते तान्, उपजपेत् वशीकुर्यात्। अनेन परिगृहीतेनेव बौद्धभिक्षुपाशुपतादिवेषेण राजप्रयोजनं परराष्ट्रवृत्तगवेषणरूपं युष्माभि- रनुष्ठेयं, गृहीतपरराष्ट्रवृत्तान्तश्च धान्यतण्डुलादिभूतिग्रहणकाले सन्निधातव्यमितिः उपजापप्रकारः।

**वाणिजको वृत्तिक्षीणः प्रज्ञाशौचयुक्तो वैदेहकव्यञ्जनः। स वणिक्कर्म-प्रदिष्टायां भूमाविति समानं पूर्वेण।**

वैदेहकव्यञ्जनः

वृत्तिक्षीणः धनविरहात् वाणिज्यवृत्तिच्युतः प्रज्ञाशौचयुक्तः वैदेहक-व्यञ्जनः। स वणिक्कर्मप्रदिष्टायां भूमाविति समानं पूर्वेण।

**मुण्डो जटिलो वा वृत्तिकामः तापसव्यञ्जनः। स नगराभ्याशे प्रभूतमुण्डजटिलान्तेवासी शाकं यवसमुष्टिं वा मासद्विमासान्तरं प्रकाशमश्नीयात्, गूढमिष्टाहारम्। वैदेहकान्तेवासिनः च एनं समिद्धयोगैरर्चयेयुः। शिष्याश्चास्यावेदयेयुः - असौ सिद्धः सामधिक इति।**

तापसव्यञ्जनः

मुण्डः भिक्षुक्षपणकादिः, जटिलः शैवपाशुपतादिः वा वृत्तिकामः तापसव्यञ्जनः। सः नगराभ्याशे प्रभूतमुण्डजटिलान्तेवासी शाकं हरिताख्यं सस्यं, 'मूलपत्रकरीराग्रफलकाण्डाधिरूढकम्। त्वक् पुष्पं कवर्कं चेति शाकं दशविधं स्मृतम्।। इत्युक्तरूपं, वृक्षमूलपत्रलतादिकं वा, यवसमुष्टिं मष्ट्रिमेयं तृणं, वा, मासद्विमासान्तरम् एकमासव्यवहितं मासद्वयव्यवहितं वा, प्रकाशं सर्वजनप्रत्यक्षं यथा भवति तथा, ईदृशं प्रकाशाशनं निराहारख्यात्यर्थं गूढम् अन्याविदितम् इष्टाहारम् अश्नीयात्। वैदेहकान्तेवासिनः च वणिग्वृत्तयः शिष्याश्च, एनं तापसव्यञ्जनं, समिद्धयोगैः समिद्धैः योगैः इष्टार्थलाभैः, अर्चयेयुः संभावयेयुः, अथवा समिद्धयोगैः तापसप्रसादात् समृद्धार्था वयमिति कपटयुक्तिभिः अर्चयेयुः धनदानादिना पूजयेयुः। अस्य तापसस्य शिष्याश्च असौ तापसः सिद्धः योगी अत एव सामेधिकः समेधा भाविनी सम्पत्तिः तदभिज्ञः इति आवेदयेयुः प्रख्यापयेयुः।

**समेधाशास्तिभिः च अभिगतानाम् अङ्गविद्यया शिष्यसंज्ञाभिः च कर्माणि अभिजने अवसितानि आदिशेत् अल्पलाभम् अग्निदाहं चोरभयं दूष्यवधं**

**तुष्टिदानं विदेशप्रवृत्तिज्ञानम् इदमद्य श्वो वा भविष्यतीदं वा राजा करिष्यतीति।**

समेधाशास्तिभिः अभिगतानां भाविसम्पद्विज्ञानाभिलाषैः तां प्रष्टुमागतानाम्, अभिजने अवसितानि कर्माणि तत्कुलनिष्पन्नानि वृत्तानि, अङ्गविद्यया अङ्गानां शरीरावयवानां प्रश्नकालिकचेष्टाविशेषैः शुभाशुभज्ञप्तिप्रतिपादकेन ज्योतिषाङ्ङ्गशास्त्रेण, शिष्यसंज्ञाभिश्च शिष्याणाम् अक्षिभूविलासादिसूचनैश्च आदिशेत् कथयेत्। आदेष्टव्यान्तराण्याह - अल्पलाभं किञ्चिद्धनप्राप्तिम् आदिशेत्। अग्निदाहं चोरभयं च आदिशेत्, प्रश्नकृतो राजापकारित्वे। दूष्यवधं ये दूष्याः कृत्याः प्रष्टारः तेषां वधम् आदिशेत्। तुष्टिदानं सन्तोषनिमित्तमर्थदानम् आदिशेत्, प्रश्नकृतो राजोपकारित्वे। विदेशप्रवृत्तिज्ञानं दूरदेशवृत्तान्तज्ञानम् आदिशेत्। इदमद्य श्वो वा भविष्यतीति आदिशेत्। इदमद्य श्वो वा राजा करिष्यतीत्यादिशेत्।

*आदिश्यतां काममीदृशं, कथं पुनरिदं संवादयितुं शक्यमित्यत आह-*

**तदस्य गूढाः सत्रिणश्च संवादयेयुः।**

अस्य तापसस्य तद् आदेशनं गूढाः सत्रिणः संवादयेयुः च यथार्थयेयुः च, लाभाग्निदाहादीनां प्रच्छन्नोत्पादनेन इत्यर्थसिद्धम्।

**सत्त्वप्रज्ञावाक्यशक्तिसम्पन्नानां राजभाव्यमनुव्याहरेन्मन्त्रिसंयोगं च।**

सत्त्वप्रज्ञावाक्यशक्तिसम्पन्नानां धैर्यबुद्धिवाग्मिप्रभुशक्तियुक्तानां प्रष्ट्रणां राजभाव्यं धनादिलाभरूपं, मन्त्रिसंयोगं च मन्त्रिसमागमं च अनुव्याहरेत् आदिशेत्।

**मन्त्री चैषां वृत्तिकर्मभ्यां वियतेत।**

मन्त्री च अर्थाद् घटितसंयोगः, एषां वृत्तिकर्मभ्यां वृत्तिः आजीवः कर्म व्यापारः ताभ्यां, वियतेत सत्वप्रज्ञादिसंपन्नानामर्थे विशिष्य यत्नं कुर्यात्, सत्वप्रज्ञाद्यनुरूपवृत्तिकर्मपरिकल्पनेन इत्यर्थः।

**ये च कारणदभिक्रुद्धास्तानर्थमानाभ्यां शमयेत्, अकारणक्रुद्धान् तूष्णी-दण्डने राजद्विषकारिणश्च।**

ये कारणात् अपकाररूपात्, क्रुद्धाः क्रुद्धत्वेन कापटिकादिद्वारा विज्ञाताः तान् अर्थमानाभ्यां शमयेत् शान्तक्रोधान् कुर्यात्। अकारणक्रुद्धान् राजद्विषकारिणश्च तूष्णीदण्डेन उपांशुवधेन शमयेत्।

गूढपुरुषेषु मन्त्रिणः समुदाचारः उक्तः, राज्ञः तमाह -

**पूजिताश्चार्थमानाभ्यां राज्ञा राजोपजीविनाम्।**
**जानीयुः शौचमित्येताः पञ्च संस्थाः प्रकीर्तिताः॥**

राज्ञा अर्थमानाभ्यां पूजिताः सन्तः अर्थाद् गूढपुरुषाः, राजोपजीविनाम् अमात्यादीनां, शौचं शुद्धिं जानीयुः। इत्थं कापटिकाद्येकैकप्रधानाः पञ्च-संस्थाः सम्यक् तिष्ठन्ति राजप्रयोजनकारिण आसु इति संस्थाः गूढपुरुष-कर्मस्थानानि प्रकीर्तिताः व्युत्पादिताः।।

# Summarised Overview

कौटिल्येन लिखितः अर्थशास्त्रम् प्राचीनः भारतीयग्रन्थः अस्ति । यः राजनीति - अर्थशास्त्र -= समाज च सम्बद्धेषु विषयेषु केन्द्रितः अस्ति। अर्थशास्त्रस्य १५ न्यायाधिकरणानाम् मध्ये प्रथमं न्यायाधिकरणं "विनयाधिकारिका" अस्ति। अस्मिन् न्यायाधिकरणे राज्यस्य शिक्षा, कर्तव्यानि, राज्ञः व्यवहारः, राज्याधिकारिणां कार्याणि च चर्चां कुर्वन्ति। मन्त्रिपुरोहितोत्पत्तिः इत्यस्मिन् नवमेऽध्याये राज्ञः मन्त्रिपुरोहितानां नियुक्तिः तेषां कार्याणां च उल्लेखः कृतः । मन्त्रिपुरोहितचयनस्य योग्यता, तेषां कर्तव्यं, ते कथं राज्ञः साहाय्यं कुर्वन्ति इति च वर्णितम्।

अथ अर्थशास्त्रानुसारम् अमात्यस्य केचन विशिष्टगुणाः भवेयुः। अमात्यः राज्यस्य कार्ये राजते। अर्थशास्त्रे अमात्यस्य महत्त्वपूर्णाः गुणाः सन्ति- सत्यम्, सहिष्णुता, पाण्डित्यं, कुशलता, विश्वसनीयता चेति। एतेभ्यः गुणान् विहाय अर्थशास्त्रे अमात्यस्य अन्ये केचन महत्वपूर्णाः विषयाः उक्ताः यथा अमात्यः सद्गुणी भवेत्, राज्यहितं रक्षेत्, राजानं दुष्टात् रक्षेत् इति ।

एकादशे अध्याये तु गूढपुरुषः कः ? तस्य भेदाः च वर्णिताः। कौटिल्यस्य मते राज्यकर्मचारिणां प्रजानां च शुद्धतां ज्ञातुं राजा गुप्तचरं नियुक्तं कुर्यात्। गुप्तचरभेदः - गुप्तचरनियुक्तौ कौटिल्येन द्वौ वर्गौ स्थायीगुप्तचरौ नियुक्तौ। ये एकस्मिन् स्थाने स्थित्वा कार्यं कुर्वन्ति। भ्रमणशीलाः गुप्तचराः च परिभ्रमणेन कार्यं कुर्वन्ति। पुनः नवप्रकाराः गुप्तचराः उल्लिखिताः। नवप्रकारेषु पञ्चप्रकारान् गूढपुरुषोत्पत्तिः अध्याये अस्मिन् प्रतिपाद्यते । ।

# Assignments

1. अमात्यगुणाः के ?
2. पुरोहितोत्पत्तिं विशदयत।
3. उदितोदितकुलं नाम किम् ?
4. उपधाचातुर्विध्यं लिखत।
5. उपधाशुद्धानां यथायथं विनियोगस्थानानि कानि ? स्पष्टयत।
6. गूढपुरुषाः कतिविधाः ? के ? विशदयत।
7. गूढपुरुषस्य उत्पत्तिमधिकृत्य उपन्यस्यत।
8. संस्था कतिविधा ? काः ?
9. आदेशसंवेदनाय मन्त्रिकर्तव्यं किम् ?

## Suggested Readings


1. कौटिलीयं अर्थशास्त्रम् - Dr. R. Shamasastry, Mysore Government Branch Press,1924.
2. संस्कृतमञ्जूषा - डा. उदयशंकर झा, चौखंबा कृष्णदास् अकादमी, वाराणसी
3. संस्कृतसाहित्येतिहासः - आचार्य लोकमणि दाहालः, चौखंबा कृष्णदास् अकादमी, वाराणसी


## References

1. Arthaśāstra Vinayādhikārika. of Kautilya
2. The Kauṭilīya Arthaśāstra, R. P. Kangle (All the three Volumes)
3. Current Readings in Arthasastra, Ed. C. Rajendran, University of Calicut, 2008
4. Science and Technology as Reflected in Arthaśāstra, P. V. Narayanan, University of Calicut, 2008

Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 2

# विनयाधिकारिकायाः सविशेषाध्ययनम् (अध्यायः 12 - 14)

## Learning Outcomes

- प्राचीनभारतीयराजनीतेः मूलात् एव उत्पत्तिविकासस्य अध्ययनं लभते।
- अर्थशास्त्रस्य आधारभूतधर्मशास्त्रस्य सिद्धान्तान् अवगन्तुं शक्नोति।
- प्राचीनभारतीयसंस्कृतेः वर्तमानपरिदृश्ये तस्याः प्रासङ्गिकतां अवगम्यते।
- कौटिलीयार्थशास्त्रे आच्छादितविषयाणां विस्तृतपरिधिना परिचयं लभते।

## Background

"श्रुतिस्मृत्यनुसारेण राजवृत्तानुशासनम्।
सुयुक्त्याऽर्थार्जनं यत्र ह्यर्थशास्त्रं तदुच्यते॥"

SGOU

मनुष्याणां वृत्तिरर्थः, मनुष्यवतो भूमिरित्यर्थस्तस्य शास्त्रमर्थशास्त्रम्। अर्थशास्त्रस्य द्वौ पक्षौ राजवृत्तनिरूपणमर्थार्जनोपायनिर्देशश्च। तेनाधुनिकभाषायां राजनीतिवार्ताशास्त्रयोः समन्वितं रूपमेव भारतीयप्राचीनपरम्परायामर्थशास्त्रं भवति।

इदं तु पूर्वमेव प्रतिपादितं यत्प्रत्येकं शास्त्रं स्वयोन्यन्वेषणाय वेदसंहितामेवानुधावति। यथैव धर्मशास्त्रविषये वेदमन्त्रेषु बहु प्रतिपादितमस्ति तथैव विकसितं रूपं धर्मसूत्र-स्मृति-प्रकरणग्रन्थास्तथैव तेषु तेषु अर्थशास्त्रविषयेऽपि बहूक्तमस्ति। अत्रेदमवधेयं यदर्थशास्त्रस्य राजवृत्तानुशासनमर्थार्जनञ्च द्वौ पक्षौ विद्येते तौ पाठसौकर्यायात्र क्रमशो राजशास्त्रार्थशास्त्रशब्देन व्यवह्रियेते । अर्थात्, अर्थशास्त्रस्य द्वौ पक्षौ राजशास्त्रमर्थशास्त्रञ्च । राजशासनसम्बद्धं राजशास्त्रं, आर्थिकपक्षसम्बद्धमर्थशास्त्रम्।

चाणक्य- विष्णुगुप्त- कौटिल्यादिविविधाभिधेयैः प्रख्यातेन विदुषा प्रणीतमर्थशास्त्रमिदं पञ्चदशस्वधिकरणेषु विभक्तम्। प्रथमे विनयाधिकारिके विद्यासमुद्देशप्रभृत्यष्टादशप्रकरणानि सन्ति। कौटिल्यस्य अर्थनीतौ गुप्तचरस्य स्थानं महत्वपूर्णं वर्तते। नृपः गुप्तचराणां माध्यमेन प्रजानां कष्टमवगन्तुं शक्यते। समाजस्य आन्तरिकस्थितेः ज्ञानाय गुप्तचरस्य द्वौ विभागौ स्तः। प्रथमः स्थायीगुप्तचरः, द्वितीयः भ्रमणशीलगुप्तचरः। स्थायीगुप्तचराणां नवविभागाः। यथा- 1 कापटिकः, 2. उदास्थिक, 3. गृहपतिक, 4. वैदेहकः, 5. तापसः, 6. सत्री, 7. तीक्ष्णः 8. रसदः 9. भिक्षुकीयः उच्यन्ते। अस्मिन् अध्याये गूढपुरुषप्रणिधिं अधिकृत्य वयं पठामः।

कौटिल्यस्य अर्थशास्त्रे "स्वविशये कृत्यकर्माक्षरक्षणम्" इति महत्त्वपूर्णः भागः अस्ति। किं स्वकामयोग्यं किं च अयोग्यं च विचार्य तदनुसारेण योग्यानि वस्तूनि रक्षन्तु इत्यर्थः। एतत् न केवलं राज्यस्य हिताय प्रवर्तते, अपि तु भवतः व्यक्तिगतहिते अपि प्रवर्तते। "परविषये कृत्यपक्षोपग्रहः" इत्यस्य अर्थः "अन्यविषयेषु, कर्म-अकर्मणि च व्यस्तता" इति। इति कौटिल्यस्य अर्थशास्त्रात् गृहीतं वाक्यम् । "अथ कृत्यकर्मापक्षोपग्रहः" इति शीर्षकेण कौटिल्यः कथयति यत् "अन्येषु विषयेषु

कर्म-अकर्म-पक्षपातेन" अर्थात् परविषयेषु कर्म कर्तव्यं वा न वा इति निर्णयार्थं तेषां कर्म-अकर्म-स्थितिं गणनीयम्।

## Keywords

गूढपुरुषः - सत्रिणः - तीक्ष्णाः - रसदाः - परिव्राजिका - अपसर्पः - योगक्षेमसाधनाः - प्रत्यक्षहेडप्रसादाः - तुष्टान् - अतुष्टान् - क्रुद्धवर्गः - भीतवर्गः - लुब्धवर्गः - मानिवर्गः ।

## Discussion

### द्वादशोऽध्यायः - गूढपुरुषप्रणिधिः।

सत्रिणः

**ये चास्य सम्बन्धिनो अवश्यभर्तव्याः ते लक्षणमङ्गविद्यां जम्भकविद्यां मायागतम् आश्रमधर्म निमित्तमन्तरचक्रमित्यधीयानः सत्रिणः संसर्ग-विद्या वा।**

अस्य राज्ञः, सम्बन्धिनः सगन्धाः, अवश्यभर्तव्याः अवश्यपोष्याः ये भवन्ति, लक्षणं सामुद्रिकादि, अङ्गविद्यां शिक्षाव्याकरणादीम् अङ्गस्पर्शेन शुभाशुभपरिज्ञानविद्यां वा, जम्भकविद्यां वशीकरणान्तर्धानविद्यां, मायागतम् इन्द्रजालम्, आश्रमधर्मं मन्वादिधर्मशास्त्रं, निमित्तं कपिञ्जलरुतपूर्णकुम्भदर्शनादि, अन्तरचक्रं पक्षिभिः शुभाशुभज्ञापनं पक्षिशास्त्रम्, इत्यधीयानाः एवञ्जातीयकमधीत्य विदन्तः, संसर्गविद्या

अधीयाना वा कामतदनुबन्धिगीतनृत्तादिशास्त्राणि अधीयानाश्च, ते सत्रिणः सत्रिसंज्ञाः ।

तीक्ष्णाः

**ये जनपदे शूराः त्यक्तात्मानो हस्तिनं व्यालं वा द्रव्यहेतोः प्रतियोधयेयुः ते तीक्ष्णाः ।**

ये जनपदे शूराः त्यक्तात्मानः शरीरनिरपेक्षाः हस्तिनं व्यालं व्याघ्रादिं वा द्रव्यहेतोः प्रतियोधयेयुः ते तीक्ष्णाः ।

रसदाः

**ये बन्धुषु निःस्नेहाः क्रूराश्चालसाश्च ते रसदाः ।**

ये बन्धुषु निःस्नेहाः क्रूराः आततायिनः अलसाः अनुत्साहाः च ते रसदाः । विषदाने अपि निश्शङ्काः इति कृत्वा तथोक्तिः ।

परिव्राजिका

**परिव्राजिका वृत्तिकामा दरिद्रा विधवा प्रगल्भा ब्राह्मणि अन्तःपुरे कृतसत्कारा महामात्रकुलानि अधिगच्छेत्। एतया मुण्डावृषल्यो व्याख्याताः । इति सञ्चाराः ।**

परिव्राजिका वृत्तिकामा भोगार्थिनी दरिद्रा विधवा प्रगल्भा ब्राह्मणि अन्तःपुरे कृतसत्कारामहामात्रकूलानि अधिगच्छेत् असकृदमात्यगृहाणि गच्छेत् सत्कारस्वीकारार्थम्। एतया ब्राह्मणपरिव्राजिकया उक्तया मुण्डावृषल्यो व्याख्याताः उक्तप्रायाः ब्राह्मणपरिव्राजिकासमानाचारा वेदितव्या इत्यभिप्रायः । तत्र मुण्डाः शाक्यभिक्षुक्या, वृषल्यः शूद्राः । इति सञ्चाराः इत्युक्तरूपाः सत्रिप्रभृतयः सञ्चारशब्देन आख्यायन्ते ।

संचाराणां विनियोगम्

**तान् राजा स्वविषये श्रद्धेयदेशवेषशिल्पभाषाभिजनापदेशान् भक्तितः सामर्थ्ययोगात् च अपसर्पयेत् ।**

राजा स्वविषये आत्मजनपदे तान् सञ्चारान् मन्त्रिपुरोहित-सेनापतिप्रभृतिषु अष्टादशपुरुषेषु विषये तेषां शुद्धिज्ञानाय

श्रद्धेयदेशवेषशिल्पभाषाभिजनापदेशान् कृत्वा भक्तितः सामर्थ्ययोगात् च भक्तिं सेव्यगतां सामर्थ्ययोगं सेवकगतं च अनुसृत्य अपसर्पयेत् चारयेत्। सेव्येषु मन्त्र्यादिषु यो यद्देवभक्तः तस्मिन् तद्देवभक्तत्वेषान् स्वस्वसामर्थ्यानुरूपं छत्रग्रहणादिकर्मनियुक्तांश्च कृत्वा चारयेत्।

द्वौवारिकः द्वाराधिकृतः प्रतिहारी। अन्तवैशिकः अन्तःपुराधि-कृतः। प्रशास्ता स्कन्धावारनिवेशयिता। समाहर्ता राजार्थसमाहरणकर्ता। सन्निधाता भाण्डागाराधिकृतः। प्रदेष्टा कण्डकशोधनाधिकृतः। नायकः एकद्विसहस्रपदातिनेता। पौरव्यावहारिकः पुरमुख्यः पुरप्राड्विवाको वा। कार्मान्तिक: आकरादिकर्माधिकृतः। मन्त्रिपरिषदध्यक्षः मन्त्रिपरिषत् मन्त्रिसभा तदध्यक्षः। दण्डपाल: सैन्यसेनामुखादिनेता, सेनापतिः अक्षौ-हिणीश्वरः। दुर्गपाल: प्राकारादिरक्षी। अन्तपाल: राज्यसीमारक्षी। आटविक: अटवीराज्याधिपतिः।

देशः मध्यदेशगौडदेशादिः। वेष: प्रलम्बश्मश्रुत्वादिः। शिल्पं कला कौशलम्। भाषा प्राच्योदीच्यादिव्याहारभेदः। अभिजनः ब्राह्मणादि जन्म। एषां देशादीनाम् अपदेशः निर्देशः श्रद्धेयः अनभिशङ्कनीयः विश्वसनीयः येषां तान् तथाभूतान्।

*सञ्चाराणां मध्ये तीक्ष्णाः मन्त्र्यादीनां बाह्यं समाचारं छत्रभृङ्गाराद्युपग्रहणवृत्या तान् सेवमानाः सन्तः जानीयुः इत्याह -*

**तेषां बाह्यं चारं छत्रभृङ्गारव्यजनपादुकासनयानवाहनोपग्राहिणः तीक्ष्णाः विद्युः। तं सत्रिणः संस्थास्वर्पेयुयुः।**

छत्रम् आतपत्रम्। भृङ्गारः पात्रभेदः कनकालुकाख्यः। व्यजनं ताल-वृन्तम्। पादुका उपानत्। आसनम् उपवेशसंवेशाधारः। यानम्

आन्दोलिका। वाहनम् अश्वः। तं तीक्ष्णविदितं चारं, सत्रिणः संस्थासु अर्पेयुयुः निवेदयेयुः।

*विषदानसुलभसौकर्या सूदारालिकादिवृत्तिमाश्रिताः रसदाः, तथा कुब्जवामनादिच्छलजीविनः, नटनर्तकादयः, स्त्रियश्च गृहान्तर्गतं चारं जानीयुरित्याह-*

**सुदारालिकस्नापकसंवाहकास्तरककल्पकप्रसाधकोदकपरिचारका रसदाः कुब्जवामनकिरातमूकबधिरजडान्धच्छद्मानो-नटनर्तकगायनवादकवाग्जीवनकुशीलवाः स्त्रियः च आभ्यन्तरं चारं विद्युः। तं भिक्षुक्यः संस्थास्वर्पयेयुः।**

सूदः अन्नकारः। आरालिको भक्ष्यकारः। स्नापकः स्नपयिता। संवाहकः अङ्गमर्दकः। आस्तरकः शय्यास्तरणकर्ता। कल्पकः नापितः। प्रसाधकः अलङ्कर्ता। उदकपरिचारकः जलहारकः। कुब्जः गडुलः। वामनः खर्वः। किरातः अल्पतनुः। जडः लोकव्यवहारानभिज्ञः। नटः नवरसाभिनयकर्ता। नर्तकः चारणः अङ्गविक्षेपमात्रकर्ता। गायनः गान्धर्ववित्। वादकः वंशवीणादिवादयिता। वाग्जीवनः पुरावृत्तकथनोपजीवी पुस्तकवाचकः।

तं रसदादिविज्ञातं चारं भिक्षुक्यः संस्थास्वर्पयेयुः।

संस्थास्वर्पितः चारः केन द्वारेण राजानं प्राप्नुयादित्यत्राह

**संस्थानामन्तेवासिनः संज्ञालिपिभिः चारसञ्चारं कुर्युः। न चान्योन्यं संस्थास्ते वा विद्युः।**

संज्ञालिपिभिः अर्थसूचनाय स्वसंकेतकल्पिताभिः लिपिभिः पत्रे निवेशिताभिः चारसञ्चारं चारस्य बाह्यस्य आभ्यन्तरस्य च व्यापारस्य सञ्चारं राज्ञि समर्पणं संस्थानामन्तेवासिनः कुर्युः। संस्थाः ते वा अन्योन्यं न विद्युः, संस्थाः संस्थान्तरवेदिनः सञ्चाराश्च सञ्चारान्तरवेदिनो न भवेयुः,

संवादच्छलनपरिहारार्थम् एकविज्ञाने सर्वग्रहणं मा भूदित्येतदर्थं च। अन्योन्यवेदने हि स्वस्वचारस्य अन्यचारेण संवादं मिथ्येव परिकल्प्य स्वामिनं वञ्चयेयुः, एकस्मिन् विज्ञाते तद्द्वारेणान्यस्य तद्द्वारेणान्यस्येति क्रमेण सर्वस्य ग्रहणं च प्रसज्येत इति।

सूदादिसकाशात् चारः कथं निष्क्रामयितव्य इत्यत्राह

**भिक्षुकीप्रतिषेधे द्वास्थपरम्परा मातापितृव्यञ्जनाः शिल्पकारिकाः कुशीलवा दास्यो वा गीतपाठ्यवाद्यभाण्डगूढलेख्यसंज्ञाभिर्वा चारं निर्हरेयुः। दीर्घरोगोन्मादाग्निरसविसर्गेण वा गूढनिर्गमनम्।**

भिक्षुकीप्रतिषेधे भिक्षुकीनामन्तःप्रवेशप्रतिषेधे, द्वास्थपरम्परा चारं निर्हरेत्। एको द्वास्थः तदनन्तराय द्वास्थाय, स तदनन्तराय इति क्रमेण चरमो द्वास्थो भिक्षुक्यादये बाह्यजनाय राज्ञे वा चारं समर्पयेदित्यर्थः। तदभावे मातापितृव्यञ्जनाः अन्तःपुरसेवकजनस्य माताहं पिताहमिति बन्धुत्वापदेशिनो वृद्धाः स्त्रियः पुरुषाश्च चारं निर्हरेयुः। शिल्पकारिकाः केशसंस्कारपत्रवल्लीरचनादिवैचित्र्यं तत्कर्त्र्यः, कुशीलवाः, दास्यो वा परिचारिका वा, चारं निर्हरेयुः।

गीतपाठ्यवाद्यभाण्डगूढलेख्यसंज्ञाभिर्वा गीतेन सूचनीयार्थ सूचकपदवन्ध्यचारुणा गेयेन, पाठ्येन तथाविधेन श्लोकेन, वाद्येन वंशवीणादिना, भाण्डगूढलेख्येन भाण्डे जलकुम्भादौ क्षिप्तेन गूढलेख्येन च याः संज्ञा अर्थसूचनाः ताभिर्वा चारं निर्हरेयुः। उक्तोपायासम्भवे सूदादयः स्वयमेव चारनिर्हरणाय अन्तःपुराद् दीर्घरोगोन्मादाग्निरसविसर्गेण निमित्तेन निर्गच्छेयुः। दीर्घरोगेण गुल्मादिना उन्मादेन ग्रहपीडया अग्निरसविसर्गेण शालायाम् अग्निदानेन अन्नादौ विषदानेन च। अग्निरसविसर्गवचनं तज्जनिते अन्तःपुरसम्भ्रमे गूढपुरुषाणां रोगाद्यपदेशं विनैव निर्गमनसौकर्यात्।

*गूढपुरुषार्पितस्य चारस्य कथं विश्वास्यत इत्याकाङ्क्षायाम् अन्योन्यानभिज्ञाः त्रयो गूढपुरुषाः परचारमधिकृत्य यदि वाक्यमेकार्थं ब्रूयुः तदा तत्र विश्वासः कार्यः न तु अन्यथा इत्यभिप्रायेणाह -*

**त्रयाणामेकवाक्ये सम्प्रत्ययः। तेषामभीक्ष्णविनिपाते तूष्णीदण्डः प्रतिषेधो वा।**

किमेतावन्त एव चारपुरुषाः

त्रयाणाम् एकवाक्ये परस्परवाक्यसंवादिनि वाक्ये सम्प्रत्ययः विश्वासः। अभीक्ष्णविनिपाते पौनःपुनिके वाक्यविसंवादे तेषां तूष्णीदण्डः प्रतिषेधो वा ते उपांशु ताडनीयाः गूढपुरुषकर्मणो वारणीया वा।

**कण्डकशोधनोक्ताः च अपसर्पाः परेषु कृतवेतना वसेयुः सम्पातनिश्चारार्थ, त उभयवेतनाः।**

कण्डकशोधनोक्ताः अपसर्पाः परेषु शत्रुषु तद्राज्ये तन्मन्त्यादिष्वष्टादशतीर्थेषु च कृतवेतनाः कल्पितजीविकाः वसेयुः सेवां कुर्युः। किमर्थं, सम्पातनिश्चारार्थं सम्पातानां चाराणां निश्चारार्थं निरायासानुष्ठानार्थं शत्रुचाराणां स्वराज्यापसर्पणे प्रवृत्तिपरिहाराय च। ते उभयवेतनाः विजिगीषोः शत्रोश्च वेतनग्राहिणः।

**गृहीतपुत्रदारांश्च कुर्यादुभयवेतनान्।**
**तांश्चारिप्रहितान् विद्यात् तेषां शौचं च तद्विधेः॥**

उभयवेतनान् गृहीतपुत्रदारान् कुर्यात् गृहीता राज्ञा पूजापूर्वमात्मवशे कृताः पुत्रा दारांश्च येषां तान् तथाभूतान् कृत्वा परेषु विसृजेदित्यर्थः। अरिप्रहितान् तान् शत्रुप्रेषितान् उभयवेतनान्, तेषां शौचं च स्वीयानाम् उभयवेतनानां शुद्धिं च तद्विधेः विद्यात् उभयवेतनद्वारेण जानीयात्।

**एवं शत्रौ च मित्रे च मध्यमे चावपेच्चरान्।**
**उदासीने च तेषां च तीर्थेष्वष्टादशस्वपि॥**

एवं शत्रौ च मित्रे च मध्यमे च उदासीने च तेषाम् अष्टादशसु तीर्थेष्वपि शत्रुमित्रमध्यमोदासीनानां मन्त्रिपुरोहितसेनापतिप्रभृतिषु कार्यस्थानेषु च चारान् आवपेत् विसृजेत्।

अन्तर्गृहचारिणः कर्तव्याः

**अन्तर्गृहचराः तेषां कुब्जवामनषण्डकाः।**
**शिल्पवत्यः स्त्रियो मूकाश्चित्राश्च म्लेच्छजातयः।।**

कुब्जवामनषण्डकाः शिल्पवत्यः स्त्रियः मूकाः चित्राः नानाप्रकाराः म्लेच्छजातयः तेषाम् अन्तर्गृहचराः शत्र्यादितत्तीर्थान्तानाम् अन्तर्गृह-सञ्चारिणः कर्तव्याः।

**दुर्गेषु वणिजः संस्था दुर्गान्ते सिद्धतापसाः।**
**कर्षकोदास्थिता राष्ट्रे राष्ट्रान्ते व्रजवासिनः॥**

दुर्गेषु जलादिदुर्गवत्सु राजधान्यादिमहानगरेषु वणिजः सम्यक्तिष्ठन्ति इति संस्थाः गूढपुरुषाः कार्याः। दुर्गान्ते दुर्गसीमायां सिद्धतापसाः संस्थाः कार्याः। राष्ट्रे कर्षकाः उदास्थिताश्च संस्थाः कार्याः। राष्ट्रान्ते राष्ट्रसीमायां व्रजवासिनः गोपालाः गूढपुरुषाः कार्याः।

क्षिप्रचारिणः कर्तव्याः

**वने वनचराः कार्याः श्रमणाटविकादयः।**
**परप्रवृत्तिज्ञानार्थाः शीघ्राश्चारपरम्पराः॥**

वने श्रमणाटविकादयः क्षपणाटवीपालप्रभृतयो वनचराः कार्याः। पर-प्रवृत्तिज्ञानार्थाः शत्रुव्यापारज्ञानप्रयोजनाः शीघ्रः क्षिप्रचारिण्यः चार-परम्पराः कर्तव्याः।

**परस्य चैते बोद्धव्याः तादृशैरेव तादृशाः ।**
**चारसञ्चारिणः संस्था गूढाश्चागूढसंज्ञिताः ॥**

एते तादृशाः उक्तजातीयाः गूढाश्चागूढसंज्ञिताः छत्ररूपा अपि अच्छन्नचिह्नधारिणः, परस्य शत्रोः, चारसञ्चारिणः सत्रितीक्ष्णादयः, संस्थाश्च कापटिकोदास्थितप्रभृतयश्च तादृशैरेव तज्जातीयैरेव, बोद्धव्याः ज्ञातव्याः ।

**अकृत्यान् कृत्यपक्षीयैः दर्शितान् कार्यहेतुभिः ।**
**परापसर्पज्ञानार्थं मुख्यानन्तेषु वासयेत् ॥**

अकृत्यान् मुख्यान् असाध्यान् विरुद्धानपि राष्ट्रमुख्यान् कृत्यपक्षीयैः कार्यहेतुभिः साध्यपक्षोचितैः कार्यकारणैः, दर्शितान् कृत्यता यथा स्यात् तथा बोधितान्, कृत्या, परापसर्पज्ञानार्थं शत्रुचारपुरुषज्ञानाय अन्तेषु राष्ट्रसीमासु वासयेत् ।

## त्रयोदशोऽध्यायः - स्वविषये कृत्याकृत्यपक्षरक्षणम् ।

स्वविषये कृत्याकृत्यरक्षणम्

स्वविषये स्वपुरे स्वजनपदे च, कृत्याकृत्यपक्षरक्षणं कृत्याः क्रुद्धलुब्ध-भीतावमानिताः शत्रुभेद्याः तद्विपरीता अकृत्याः कृत्यपक्षस्य अकृत्यपक्षस्य च रक्षणं परोपजापात् पालनम् अत्रोच्यते। तत्र जानपदकृत्या-कृत्यपक्षावबोधः जानपदेषु गूढपुरुषप्रणिधानात् ऋते न भवति ।

कृतमहामात्यापसर्पः पौरजानपदानपसर्पत्

कृतमहामात्यापसर्पः पौरजानपदान् अपसर्पयेत् अपसर्पैः गूढपुरुषैः परिशोधयेत् ते स्वस्मिन्ननुरागिणो अपरागिणो वेति। महामात्य-ग्रहणं पूर्वोक्ताष्टादशतीर्थोपलक्षणम्। मन्त्रिपुरोहितादिषु चारप्रणिधानान-न्तरमित्यर्थः ।

**सत्रिणो द्वन्दिनः तीर्थसभाशालापूगजनसमवायेषु विवादं कुर्युः - सर्वगुणसम्पन्नश्चायं राजा श्रूयते। न चास्य कश्चिद् गुणो दृश्यते यः पौरजानपदान् दण्डकराभ्यां पीडयति इति।**

सत्रिणः द्वन्दिनः कलहायमानाः सन्तः, तीर्थसभाशालापूगजनसमवायेषु नद्यादितीर्थेषु ब्राह्मणादिसभासु अन्नपानीयादिशालासु कर्मकरवृन्देषु नानाजातीयजनसङ्घेषु च विवादं विरुद्धं वादं कुर्युः - सर्वगुणसम्पन्नश्चायं राजा श्रूयते। न चास्य कश्चिद् गुणो दृश्यते यः पौरजानपदान् दण्डकराभ्यां पीडयति इति।

**तत्र ये अनुप्रशंसेयुः तान् इतरः तं च प्रतिषेधयेत्।**

तत्र तीर्थादिषु ये अनुप्रशंसेयुः यथोक्तराजनिन्दानुगुणं कथयेयुः सत्यमेवमेतदिति तान् तं च पूर्वनिन्दकं च इतरः सत्र्यन्यतमः प्रतिषेधयेत् वारयेत्।

प्रतिषेधनप्रकारं प्रपञ्चयति

**मात्स्यन्यायाभिभूताः प्रजा मनुं वैवस्वतं राजानं चक्रिरे। धान्यषड्भागं पण्यदशभागं हिरण्यं चास्य भागधेयं प्रकल्पयामासुः। तेन भृता राजानः प्रजानां योगक्षेमवहाः।**

मात्स्यन्यायाभिभूताः प्रजाः मनुं वैवस्वतं मनुनामानं विवस्वतः सूनुं राजानं चक्रिरे। धान्यस्य षष्ठमंशं पण्यदशभागं पण्यादीनां वस्त्रादीनां विक्रेयद्रव्याणां दशमंशं हिरण्यं च अस्य भागधेयम् अंशं प्रकल्पयामासुः। तेन भृताः यथोक्तभागधेयरूपभृतिग्राहिणः सन्तः राजानः प्रजानां पौरजानपदानां योगक्षेमवहाः योगक्षेमवहनरूपकर्मकराः।

**तेषां किल्विषं दण्डकरा हरन्ति, योगक्षेमबहाश्च प्रजानाम्।**

तेषां दण्डकराः तत्सम्बन्धिनो दण्डकराः राजभिः प्रजासु प्रयुज्यमाना दण्डाः प्रजाभ्यो गृह्यमाणाः कराश्च प्रजानां किल्बिषं हरन्ति पापं चौर्यादि-जनितमपनुदन्ति, योगक्षेमवहाश्च योगक्षेमसाधकाश्च भवन्ति। तत्र दण्डानां किल्बिषहरत्वं दण्डानुभवस्य प्रायश्चित्तानुष्ठानस्थानीयत्वाद् बोद्धव्यं, योगक्षेमवहत्वं च स्वधर्मव्यतिक्रममयोत्पादनेन सन्मार्गप्रवर्त-कत्वात्। कराणां योगक्षेमवहत्वं तु न कर्मसु जनहितेषु पूर्तादिकर्मसु विनियुज्यमानत्वात्।

पौरजानपदान् दण्डकराभ्यां पीडयतीति यद् दूषणमुद्भावितं, तत्र समाधिमाह

**तस्मात् उज्छषड्भागमारण्यका अपि निवपन्ति - तस्यैतद् भागधेयं यो अस्मान् गोपायतीति।**

तस्मात् कराणां रक्षाभूतिरूपत्वात्, आरण्यका अपि ऋषयः अपि उच्छषड्भागं उच्छस्य कणश आतस्य धान्यादेः षष्ठमंशं, यो अस्मान् रक्षति तस्येतद् भागधेयमिति मत्या, निवपन्ति वितरन्ति।

**इन्द्रयमस्थानमेतद् राजानः प्रत्यक्षहेडप्रसादाः। तानवमन्यमानं दैवः अपि दण्डः स्पृशति। तस्माद् राजानो नावमन्तव्याः इति क्षुद्रकान् प्रतिषेधयेत्।**

राजानः प्रत्यक्षहेडवप्रसादाः प्रत्यक्षनिग्रहानुग्रहाः, अत एव एतद् इन्दयमस्थानम् इमे इन्द्रयमस्थानस्थिताः इन्द्रयमतुल्या इत्यर्थः। तानवमन्वमानं देवः अपि दण्डः स्पृशति। तस्माद्राजानो नावमन्तव्याः इति क्षुद्रकान् प्रतिषेधयेत्।

**किंवदन्ती च विद्युः।**

किंवदन्ती व विद्युः जानश्रुतिं च जानीयुः, अर्थात् सत्रिणः।

**ये चास्य धान्यपशुहिरण्यान्याजीवन्ति, तैरुपकुर्वन्ति व्यसने अभ्युदये वा, कुपितं बन्धुं राष्ट्रं वा व्यावर्तयन्ति, अमित्रमाटविकं वा प्रतिषेधयन्ति तेषां मुण्डजटिलव्यञ्जनाः तुष्टातुष्टत्वं विद्युः।**

तुष्टातुष्टत्ववेदनान्तर कार्यमाह -

ये अस्य राज्ञः धान्यपशुहिरण्यानि आजीवन्ति उपजीवन्ति, तैः धान्यादिभिः व्यसने अभ्युदये वा अस्य उपकुर्वन्ति, ये वाकुपित बन्धुं राष्ट्रं च व्यावर्तयन्ति कोपात् निवर्तयन्ति ये वा अमित्रं शत्रुम् आटविक अटवीपाल प्रतिषेधयन्ति शत्रुभावाद् वारयन्ति, तेषां तुष्टातुष्टत्वं तुष्टत्वम् अतुष्टत्वं च मुण्डजटिलव्यञ्जनाः मुण्डजटिलवेषाः विद्युः।

**तुष्टान् भूयः पूजयेत्। अतुष्टान् तुष्टिहेतोः त्यागेन साम्ना च प्रसादयेत्।**

तुष्टान् भूयः पूजयेत् तुष्ट्यतिशयार्थम्। अतुष्टान् तुष्टिहेतोः तुष्ट्यर्थ त्यागेन अर्थदानेन साम्ना सान्त्ववादेन च प्रसादयेत्।

अर्थदानादिना वा अतुष्टो आह

**परस्पराद्वा भेदयेदेनान् सामन्ताटविकतत्कुलीनावरुद्धेभ्यश्च। तथाप्यतुष्यतो दण्डकरसाधनाधिकारेण वा जनपदविद्वेषं ग्राहयेत्। विद्विष्टान् उपांशुदण्डेन जनपदकोपेन वा साधयेत्। गुप्तपुत्रदारान् आकरकर्मान्तेषु वा वासयेत् परेषामास्पदभयात्।**

एतान् अतुष्टान् परस्पराद् भेदयेत् मिथः संहता भूत्वा मापकार्षुरिति। सामन्ताटविकतत्कुलीनावरुद्धेभ्यश्च भेदयेत् सामन्तादिषु मा उपजापं कार्षुरिति। तथापि अतुष्यतः भेदने अपि आर्जवमप्रतिपद्यमानान्, दण्डधरसाधनाधिकारेण दण्डसाधनाधिकारदानेन वा करसाधनाधिकारदानेन वा जनपदविद्वेषं जानपदविरोधं ग्राहयेत्। विद्विष्टान् तथा प्राप्तजनपदविद्वेषान् उपांशुदण्डेन रहोघातेन जनपदकोपेन वा साधयेत् दमयेत्। किञ्च गुप्तपुत्रदारान् आकारकर्मान्तेषु वासयेत्, तत्पुत्रदारगुप्तिं

स्वयमङ्गीकृत्य तान् अतुष्टान् खनिकर्मस्थानेषु व्यापारयेत्। कस्मात् परेषामास्पदभवात् शत्रुपक्ष्याणाम् आस्पदमिमे स्युः इति भयात्।

**क्रुद्धलुब्धभीतावमानिनस्तु परेषां कृत्याः। तेषां कार्तान्तिकनैमित्तिकमोहूर्तिकव्यञ्जनाः परस्पराभिसम्बन्धम् अमित्रप्रतिसम्बन्धं वा विद्युः।**

क्रुद्धालुब्धभीतावमानिनः परेषां कृत्याः भेद्या भवन्ति। तेषां क्रुद्धादीनां, परस्पराभिसम्बन्धम् अमित्रप्रतिसम्बन्धं वा अन्योन्यसम्बन्धं शत्रुसम्बन्धं च कार्तान्तिकनैमित्तिकमोहूर्तिकव्यञ्जनाः विद्युः कार्तान्तिका कृतान्तो देवं पूर्वकर्म तद्वेदिनः नैमित्तिकाः शुभाशुभशकुनज्ञाः मोहूर्तिका त्रिकाल-वृत्तज्ञा तद्वेषा जानीयुः।

विजिगीषोः कर्तव्यम्

**तुष्टानर्थमानाभ्यां पूजयेत्। अतुष्टान् समदानभेददण्डः साधयेत्।**

तुष्टान् राज्ञि प्रीतिमतः अकृत्यपक्ष्यान् अर्थमानाभ्यां पूजयेत् अर्थो धनं मानो बहुमानचिह्नं वलयाङ्गुलादि तद्दानेन सत्कुर्यात्। अतुष्टान् कृत्यान् कृत्यपक्ष्यान् सामदानभेददण्डैःसाधयेत् दमयेत्।

**एवं विषये कृत्याकृत्यांश्च विचक्षणः।**
**परोपजापात् संरक्षेत् प्रधानान् क्षुद्रकानपि।।**

## चतुर्दशोऽध्यायः - परविषये कृत्याकृत्यपक्षोपग्रहः ।

परविषये शत्रुजनपदे, कृत्याकृत्यपक्षोपग्रहः कृत्यपक्षस्य अतुष्टवर्गस्य, अकृत्यपक्षस्य तुष्टवर्गस्य उपग्रहः उपजापादिना सङ्ग्रहा स्वायत्तीकरणम् इह उच्यते।

**कृत्याकृत्यपक्षोपग्रहः स्वविषये व्याख्यातः परविषये वाच्यः।**

कृत्या नाम क्रुद्धलुब्धभीतमानिनः।

क्रुद्धवर्गः

**संश्रुत्याधर्थान् विप्रलब्धः, तुल्यकारिणोः शिल्पे वा उपकारे वा विमानितः, वल्लभावरुद्धः, समाहूय पराजितः, प्रवासोपतप्तः, कृत्या व्यवम-लब्धकार्यः, स्वधर्माद् दायाद्याद् वोपरुद्धः, मानाधिकाराभ्यां भ्रष्टः, कुल्यैरन्तर्हितः, प्रसभाभिमृष्टस्त्रीकः, काराभिन्यस्तः, परोक्तदण्डितः, मिथ्याचारवारितः, सर्वस्वमाहारितः, बन्धनपरिक्लिष्टः, प्रवासितबन्धुरिति क्रुद्धवर्गः ।**

अर्थान् संश्रुत्य विप्रलब्धः ददामीति प्रतिज्ञाय तददानेन वञ्चितः, शिल्पे उपकारे वा तुल्यकारिणोः समानं कर्म कृतवतोः मध्ये विमानितः अनभिनन्दिताः अन्यतरः, वल्लभावरुद्धः राज्ञः परमाप्तसेवकैः प्रतिषिद्धराजकुलप्रवेशः, समाहूय पराजितः द्यूतक्रीडार्थमाहूय हतधनः, प्रवासोपतप्तः राजकृतेनावरोधेन स्वेप्सितदेशवासप्रतिबन्धः प्रवासः तेन दुःखितः, कृत्या व्ययमलब्धकार्यः कार्यार्थे राजवल्लभादिभ्यः वाचं दत्वा अपि अलब्धप्रयोजनः स्वधर्मात् दायाद्या वा उपरुद्धा स्वधर्मादाक्षिणात्यानां मातुलकन्यापरिणयादिः दाया च दायत्वेन भागिनेयानां केरलेषु मातुलधर्म तादृशात् स्वधर्मात् दायाद्याद् प्रतिषिद्धा, मानाधिकाराभ्यां प्रष्टः माना छान्दोलिकादिः परिच्छदयमानः अधिकारः गतः, अपलपितगुणत्यात्, प्रसभाभिमृष्टस्यशेकः बलात्कारधर्षितदारा, काराभिनयस्तः बन्दीकृता, परीकदण्डिता विचार्येव परवचनप्रत्ययमात्रेण दण्डः मध्याकरवारितः प्राणिवधरूपाचाद्यज्ञाः पापकर्म इत्येवम्जातीयेन मिध्यान्यावेन आचाराद् यज्ञादिसत्कर्मानुष्ठाना पारितः सर्वस्वमाहारितः इतसर्वस्यः बन्धनपरिक्लिष्टा बन्धनेन कार्येष्यवधार्हनियन्त्रणया परिक्लिष्टा प्रवासितबन्धुः प्रयामित स्वदेशाधिष्कासितां बन्धुः पुत्रादिः यस्य सः, इति एकजातीया क्रुद्धवर्ग वेदितव्यः ।

भीतवर्गः

**स्वयमुपहतः, विप्रकृतः, पापकर्माभिख्यातः तुल्यदोषदण्डेनोद्विग्नः, पर्यात्तभूमिः, दण्डेनोपहतः, सर्वाधिकरणस्थः, सहसोपचितार्थःतत्कुलीनोपाशंसुः प्रद्वेष्टो राज्ञा, राजद्वेषी चेति भीतवर्गः।**

स्वयमुपहतः धनार्थं स्वकृतेन परमारणादिना नृशंसकर्मणा दूषितः, विजिगीषुणा वा स्वयं धनदानेन नृशंसकर्म परमाणादिकं कारयित्वा दूषितः, विप्रकृतः अन्तःपुरादौ विजिगीषु विरुद्धक्रियारम्भः पापकर्माभिख्यातः ब्रह्महत्यादिपापकर्माभिशस्तः, तुल्यदोषदण्डेनोद्विग्नः स्वसमानदोषे अन्यस्मिन् दण्डं प्रयुक्तं दृष्ट्वा भीतः मय्यपि दण्डः पतेदिति, पर्यातभूमिः भूम्यपहर्ता दण्डेनोपहतः कर्शितः, सर्वाधिकरणस्थः सर्वेषु राजकीयनियोगस्थानेषु प्राप्तस्वाम्यः, सहसोपचितार्थः अकस्माद् साहसेन या वर्धितधनः, तत्कुलीनोपशंसुः तस्य राज्ञः कुलीनं दायादम् उपाशंसुः, राज्ञा प्रदेष्टः, राजद्वेषी च भीतवर्गः।

लुब्धवर्गः

**परिक्षीणः अत्यात्तस्वः कदर्यो व्यसनी अत्याहितव्यवहारः चेति लुब्धवर्गः।**

परिक्षीणः विनष्टसर्ववैभवः, अत्यातस्वः अत्यातं राज्ञा दण्डकाररूपतया अतिमात्रं गृहीतं स्वं धनं यस्य सः, कदर्यः कृपणा, व्यसनी स्त्रीपानादिव्यसनवान्, अत्याहितव्यवहारः अतिमात्रप्रयुक्तधननिमित्तव्यवहारा चेति लुब्धवर्गः।

मानिवर्गः

**आत्मसम्भावितो मानकामः शत्रुपूजामर्षितो नीचैरुपहितः तीक्ष्णः साहसिको भोगेनासन्तुष्ट इति मानिवर्गः।**

आत्मसम्भावितः अहमतीव विद्वान् शूर इति, मानकामः धनमवधीर्य पूजामात्राभिलाषी, शत्रुपूजामर्षितः अनेन मम शत्रुः पूजित इति प्राप्तामर्थ, नीचैरुपाहितः दुर्जनः कार्ये अभिनिवेशितः, तीक्ष्णः आत्म-

त्यागी, साहसिकः अतर्किताप्रवृत्तिः साहसं तद्वान्, भोगेन असन्तुष्टः क्लृप्तया भृत्या तृप्तिमप्राप्तः मानिवर्गः।

*क्रुद्धादीनां कृत्यपक्षीयाणां मध्ये यो यदभिलषति तं मुण्डजटिलव्यञ्जनमुखेन तद्दानपूर्वं भेदयेदित्याह-*

**तेषां मुण्डजटिलव्यञ्जनैः यो यद्भक्तिः कृत्यपक्षीयस्तं तेनोपजापयेत्।**

क्रुद्धवर्गस्य भेदनप्रकारम्

**यथा मदान्धो हस्ती मत्तेनाधिष्ठितो यद्यदासादयति तत् सर्वं प्रमृद्नाति एवम् अयम् अशास्त्रचक्षुः अन्धः राजा अन्धेन मन्त्रिणा अधिष्ठितः पौरजानपदवधाय अभ्युत्थितः। शक्यमस्य प्रतिहस्तिप्रोत्साहनेन अपाकर्तुम्, अमर्षः क्रियताम् इति क्रुद्धवर्गमुपजापयेत्।**

यथा मत्तेनाधिष्ठितः प्रमादिना हस्तिपकेन नियम्यमानः मदान्धः हस्ती यद्यद् आसादयति दृष्टिविषयं करोति तत् सर्वं प्रमृद्नाति नाशयति एवमयम् अशास्त्रचक्षुः राजशास्त्रलक्षणनेत्रहीनः अन्धः राजा अन्धेन मन्त्रिणा अधिष्ठितः पौरजानपदवधाय अभ्युत्थितः उद्युक्ताः। प्रतिहस्तिप्रोत्साहनेन अस्य अपाकर्तुं शक्यम्। अमर्षः क्रियतां प्रकोप उत्पाद्यतां राज्ञः।

भीतवर्गस्य भेदनप्रकारम्

**यथा लीनः सर्पो यस्माद् भयं पश्यति तत्र विषमुत्सृजति एवमयं राजा जातदोषाशङ्कः त्वयि पुरा क्रोधविषमुत्सृजति, अन्यत्र गम्यताम् इति भीतवर्गमुपजापयेत्।**

लीनः सर्पो यस्माद् भयं पश्यति आत्मनो विपत्तिमाशङ्कते तत्र विषमुत्सृजति। एवमयं राजा पुरा जातदोषाशङ्कः पूर्वमुत्पन्नदोषवितर्कः त्वयि क्रोधविषमुत्सृजति। अतः अन्यत्र गम्यतां इति भीतमुपजापयेत्।

लुब्धवर्गस्य भेदनप्रकारम्

**यथा श्वगणिनां धेनुः श्वभ्यो दुग्धे न ब्राह्मणेभ्या एवमयं राजा सत्त्वप्रज्ञावाक्यशक्तिहीनेभ्यो दुग्धे नात्मगुणसम्पन्नेभ्यः। असौ राजा पुरुषविशेषज्ञः सेव्यतामिति लुब्धवर्गमुपजापयेत्।**

यथा श्वगणिनां धेनुः स्वगणस्वामिनां गौः श्वभ्यो दुग्धे क्षीरं स्रावयति न ब्राह्मणेभ्य एवमयं राजा सत्यप्रज्ञावाक्यशक्तिहीनेभ्यो दुग्धे फलं ददाति नात्मगुणसम्पन्नेभ्यः। असौ विप्रकृष्टः सामन्तः राजा पुरुषविशेषज्ञः पुरुषतारतम्यवेदी सेव्यतामिति लुब्धवर्गमुपजापयेत्।

मानिवर्गस्य भेदनप्रकारम्

**यथा चण्डालोदपानः चण्डालानामेव उपभोग्यः नान्येषाम् एवमयं राजा नीचो नीचानामेव उपभोग्यः न त्वद्विधानामार्याणाम्। असौ राजा पुरुषविशेषज्ञः तत्र गम्यतामिति मानिवर्गमुपजापयेत्।**

**तथेति प्रतिपन्नांस्तान् संहितान् पणकर्मणा।**
**योजयेत यथाशक्ति सापसर्पान् स्वकर्मसु॥**

तथेति प्रतिपक्षान् उपजापानुरोधेन परपक्षप्रवेशमङ्गीकृतवतः, पणकर्मणा संहितान् सत्यशपथादिना कृतसन्धानान्, तान् कृत्यान्, सापसर्पान् चारसहितान् कृत्वा, यथाशक्ति स्वकर्मसु योजयेत नियुञ्जीत।

**लभेत सामदानाभ्यां कृत्यांश्च परभूमिषु।**
**अकृत्यान् भेददण्डाभ्यां परदोषांश्च दर्शयेत्।।**

परभूमिषु परजनपदे, कृत्यान्, सामदानाभ्यां लभेत साधयेत्। भेदस्य तेषु स्वत एव सिद्धत्वाद् अनुपयोग इत्यभिप्रायः। अकृत्यान् भेददण्डाभ्यां लभेत। अकृत्यान् प्रति भेदसाधनेषु परदोषप्रदर्शनस्य मुख्यत्वादाह- परदोषान् दर्शयेच्च बोधयेच्च।।

# Summarised Overview

पञ्च संस्थान् प्रकीर्त्य तदनन्तरं द्वितीयप्रकारकाः भ्रमणशीला (संचार - नामका) गुप्तचराः भवन्ति इति प्रतिपादयति । सत्रीये सामुद्रिक - विद्याज्योतिषाद्यङ्गानां शुभाशुभफलकविद्यायाः ज्ञाता इन्द्रजाल - धर्मशास्त्र - शकुनशास्त्र - पक्षिशास्त्र मानवेषु तथा तत्सम्बन्धिनृत्येषु संगीतेषु निष्णातगुप्तचरान् इति कथ्यते। तीक्ष्णाः स्वदेशे निवसन्तः दृष्याय प्रत्यन्यमानाः गज-व्याघ्रः सपदिः युद्धरताः तीक्ष्णा रक्षा भवन्ति। रसदः - स्वभ्रात्रादिस्नेहविहीना क्रूराः सद-गुप्तवराः भवन्ति। भिक्षुकीः परिव्राजिका-अबौद्ध-भिक्षुणी-वृषली-नारी-गुप्तचरिणः भवन्ति। "स्वविशये कृत्यकर्माक्षरक्षणम्" इत्यर्थः, "स्वकामयोग्यानाम् अयोग्यानां वस्तूनि रक्षणं" अथवा "स्वकामयोग्यानाम् अयोग्यानां वस्तूनि रक्षितुं वा" इत्यर्थः । एतत् कौटिल्यार्थशास्त्रे प्रयुक्तं वाक्यं यत् योग्यान् अयोग्यविषयान् विचार्य राज्यस्य वा कस्यचित् व्यक्तेः वा रक्षणस्य आवश्यकतां दर्शयति।

"परविषये कृत्यपक्षोपग्रहः" इत्यस्य अर्थः "अन्यविषयेषु, कर्म-अकर्मणि च व्यस्तता" इति। कौटिल्येन च उक्तं यत्, "परविषये वाच्यः अर्थात् अन्येषु विषयेषु तद् वक्तव्यम्" इति। अन्यविषयेषु कथयित्वा स्वकर्म-अकर्म-विचारणीय इत्यर्थः। संक्षेपेण "परविषये कृत्यपक्षोपग्रहः" इत्यर्थः। अन्यविषयाणां कर्म-अकर्म-व्यस्तः, अन्यविषयाणां विषये कथयित्वा तेषां कर्म-अकर्मणां विचारः करणीयः इति भावः। इत्थं विनयाधिकारिकायाः चतुर्दशोऽध्यायः समाप्तः।

# Assignments

1. भ्रमणशीला (संचार - नामका) गुप्तचराः के ? विशदयत ।
2. स्थायीगुप्तचराणां नवविभागाः के ?
3. संचारशब्देन किं आख्यायते ?
4. संस्थानमन्तेवासिनः किं कुर्वन्ति ?
5. अन्तर्गृहचारिणः कर्तव्याः के ?
6. कृत्यपक्षस्य अकृत्यपक्षस्य च रक्षणं विशदयत ।
7. तुष्टातुष्टत्वं किम् ?
8. कृत्या नाम का ?
9. क्रुद्ध - भीत - लुब्ध- मानि वर्गान् विशदयत।
10. वर्गाणां भेदनप्रकारान् स्पष्टयत।

## Suggested Readings


1. कौटिलीयं अर्थशास्त्रम् - Dr. R. Shamasastry, Mysore Government Branch Press,1924.
2. संस्कृतमञ्जूषा - डा. उदयशंकर झा, चौखंबा कृष्णदास् अकादमी, वाराणसी
3. संस्कृतसाहित्येतिहासः - आचार्य लोकमणि दाहालः, चौखंबा कृष्णदास् अकादमी, वाराणसी


## References

1. Arthaśāstra Vinayādhikārika. of Kautilya
2. The Kauṭilīya Arthaśāstra, R. P. Kangle (All the three Volumes)
3. Current Readings in Arthasastra, Ed. C. Rajendran, University of Calicut, 2008
4. Science and Technology as Reflected in Arthaśāstra, P. V. Narayanan, University of Calicut, 2008.

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

‘

SGOU

**Model Question Paper (SET – A)**

# SREENARAYANAGURU OPEN UNIVERSITY

**Reg. No....................** **QP CODE..................**

**Name........................**

**THIRD SEMESTER M.A. SANSKRIT LANGUAGE AND LITERATURE EXAMINATIONS**
**DISCIPLINE SPECIFIC ELECTIVE COURSE - 1 - M23SN01DE - धर्मशास्त्रम् अर्थशास्त्रं च**
**(CBCS- PG)**
**2023 Admission Onwards**

**Time: 3 Hours** **Max Marks: 70**

**सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संस्कृतलेखने देवनागरीलिपि उपयोक्तव्या।**

**(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

## SECTION - A
## (प्रथमो भागः)

**I. एकखण्डिकया केषाञ्चित् पञ्चप्रश्नानाम् उत्तराणि लिखत।** **(5 x 2=10)**
**(Answer any five Questions in a Paragraph)**

1. धर्मशास्त्रेषु धर्मलक्षणं किम् ?
2. कथं सभासदः नियुक्तव्याः?
3. याज्ञवल्क्येन आधयः कतिधा उक्ता?
4. प्रतिपन्नं वा पत्या सह यत्कृतं वा स्वयंकृतं यद्दणं तस्य परिहारः कीदृशः भवति ?
5. अर्थशास्त्रस्य रचयिता कः ? सः कः आसीत् ?
6. आन्वीक्षिकी नाम विद्या का ?
7. अमात्यगुणाः के ?
8. संस्था कतिविधा ? काः ?

## SECTION - B
## (द्वितीयो भागः)

**II. एकपुटेन केषाञ्चित् षड्प्रश्नानाम् उत्तराणि लिखत।** **(6 x 5=30)**
**(Answer any six Questions in a page)**

9. धर्मसूत्रस्य विषयाः के ?

10. आचाराध्यायस्य प्राधान्यं विशदयत।

11. साक्षिणां क्रमोपस्थितेः महत्त्वं वर्णयत।

12. आधिः प्रणश्येद् द्विगुणे धने यदि न मोक्ष्यते।
काले कालकृतो नश्येत्फलभोग्यो न नश्यति॥ व्याख्यात।

13. सबन्धक - अबन्धक धनप्रयोगे प्रतिमासवृद्धिं विशदयत।

14. कौटिल्यस्य अर्थशास्त्रमधिकृत्य विशदयत।

15. त्रयीविद्यामधिकृत्य लघुटिप्पणीं लिखत।

16. वृद्धसंयोगप्रकरणे प्रतिपादितविषयान् संक्षिप्य प्रतिपादयत।

17. पुरोहितोत्पत्तिं विशदयत।

18. उपधाशुद्धानां यथायथं विनियोगस्थानानि कानि ? व्याख्यात।

## SECTION – C
## (तृतीयो भागः)

**III. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत।** **(2x15=30)**

**(Write an essay on any two of the following)**

19. स्मृतिग्रन्थेषु मनुस्मृतेः पश्चाद् द्वितीयं स्थानमावहति याज्ञवल्क्यस्मृतिः। विशदयत।

20. याज्ञवल्क्यस्मृतौ व्यवहाराध्याये पुत्रपौत्रैः परिहरणीयां ऋणदेयव्यवस्थां प्रतिपादयत।

21. विनयाधिकारिकायां प्रतिपादितविषयान् संक्षिप्य निरूपयत।

22. उपधाचातुर्विध्यम् अधिकृत्य उपन्यस्यत।

Model Question Paper (SET – B)

# SREENARAYANAGURU OPEN UNIVERSITY

**Reg. No..................** **QP CODE.................**

**Name......................**

**THIRD SEMESTER M.A. SANSKRIT LANGUAGE AND LITERATURE EXAMINATIONS**
**DISCIPLINE SPECIFIC ELECTIVE COURSE - 1 - M23SN01DE - धर्मशास्त्रम् अर्थशास्त्रं च**
**(CBCS- PG)**
**2023 Admission Onwards**

**Time: 3 Hours** **Max Marks: 70**

**सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संस्कृतलेखने देवनागरीलिपिः उपयोक्तव्या।**

**(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

## Section - A
## (प्रथमो भागः)

**I. एकखण्डिकया केषाञ्चित् पञ्चप्रश्नानाम् उत्तराणि लिखत।** **(5 x 2=10)**
**(Answer any five Questions in a paragraph)**

1. कल्पसूत्रं कतिविधं वर्तते ? कानि च तानि ?
2. सः हीनः दण्ड्यश्चेति स्मृतः- कीदृशः जनः?
3. पशुस्त्रीणां वृद्धिः कीदृशी भवति?
4. प्रतिभूः कः?
5. अर्थशास्त्रे प्रतिपादितविषयाणि कानि ?
6. राज्ञः इन्द्रियजयस्य आवश्यकता का ?
7. स्थायी गुप्तचराणां नवविभागाः के ?
8. संस्थानमन्तेवासिनः किं कुर्वन्ति ?

## SECTION - B
## (द्वितीयो भागः)

**II. एकपुटेन केषाञ्चित् षड्प्रश्नानाम् उत्तराणि लिखत।** **(6 x 5=30)**
**(Answer any six Questions in a page )**

9. याज्ञवल्क्यमधिकृत्य लिखत।

10. "धर्मशास्त्रविहितं राजव्यवहारः" विषयकं विस्तीर्णं वर्णनं कुरुत।

11. "अभियोगेऽथ साक्ष्ये वा दुष्टः स परिकीर्तितः" - सन्दर्भं विशदयत।

12. रिक्थग्राह ऋणं दाप्यो योषिद् ग्राहस्तथैव च।

पुत्रोऽनन्याश्रितधनः पुत्रहीनस्य रिक्थिनः॥ - व्याख्यात।

13. 'न योषित्पतिपुत्राभ्यां न पुत्रेण कृतं पिता।

दद्यादृते कुटुम्बार्थान्न पतिः स्त्रीकृतं तथा'॥ - व्याख्यात।

14. राजर्षिवृत्तम् नाम सप्तमोऽध्याये प्रतिपादितविषयान् संगृह्य विचारयत।

15. वृद्धसंयोगः नाम पञ्चमोऽध्याये प्रतिपादितविषयान् संगृह्य विचारयत।

16. अधोदत्तानि पञ्चसूत्राणि व्याख्यात।

क) कारुकरक्षणम्। ख) वैदेहिकरक्षणम्। ग) उपनिपातप्रतिकारः। घ) गूढाजीवनं रक्षा।

ङ) सिद्धव्यञ्जनैर्माणवप्रकाशनम्।

17. कृत्यपक्षस्य अकृत्यपक्षस्य च रक्षणं विशदयत।

18. तुष्टातुष्टत्वं किम्? संगृह्य लिखत ।

## SECTION - C
## (तृतीयो भागः)

**III. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत।** **(2x15=30)**
**(Write an essay on any two of the following)**

19. याज्ञवल्क्यस्मृतेः व्यवहाराध्यायम् अनुसृत्य असाधारणव्यवहारमातृकाप्रकरणस्य विषयान् विशदयत।

20. याज्ञवल्क्यस्मृत्यनुसारं आधिं स्पष्टयत

21. विनयाधिकारिकायाः अमात्योत्पत्तिः नाम प्रकरणमधिकृत्य निरूपयत।

22. कृत्याकृत्यपक्षोपग्रहे प्रतिपादितान् वर्गान्, तेषां भेदप्रकारान् स्पष्टयत।

**സർവ്വകലാശാലാഗീതം**

---------------------

വിദ്യയാൽ സ്വതന്ത്രരാകണം
വിശ്വപൗരരായി മാറണം
ഗ്രഹപ്രസാദമായ് വിളങ്ങണം
ഗുരുപ്രകാശമേ നയിക്കണേ

കൂരിരുട്ടിൽ നിന്നു ഞങ്ങളെ
സൂര്യവീഥിയിൽ തെളിക്കണം
സ്നേഹദീപ്തിയായ് വിളങ്ങണം
നീതിവൈജയന്തി പാറണം

ശാസ്ത്രവ്യാപ്തിയെന്നുമേകണം
ജാതിഭേദമാകെ മാറണം
ബോധരശ്മിയിൽ തിളങ്ങുവാൻ
ജ്ഞാനകേന്ദ്രമേ ജ്വലിക്കണേ

**കുരീപ്പുഴ ശ്രീകുമാർ**

# SREENARAYANAGURU OPEN UNIVERSITY

## Regional Centres


### Kozhikode
Govt. Arts and Science College
Meenchantha, Kozhikode,
Kerala, Pin: 673002
Ph: 04952920228
email: rckdirector@sgou.ac.in

### Thalassery
Govt. Brennen College
Dharmadam, Thalassery,
Kannur, Pin: 670106
Ph: 04902990494
email: rctdirector@sgou.ac.in

### Tripunithura
Govt. College
Tripunithura, Ernakulam,
Kerala, Pin: 682301
Ph: 04842927436
email: rcedirector@sgou.ac.in

### Pattambi
Sree Neelakanta Govt. Sanskrit College
Pattambi, Palakkad,
Kerala, Pin: 679303
Ph: 04662912009
email: rcpdirector@sgou.ac.in

NO TO DRUGS

# തിരിച്ചിറങ്ങാൻ പ്രയാസമാണ്



SGOU

NO TO DRUGS

ആരോഗ്യ കുടുംബക്ഷേമ വകുപ്പ്, കേരള സർക്കാർ

धर्मशास्त्रम् अर्थशास्त्रं च

COURSE CODE: M23SN01DE

SGOU

ISBN 978-81-985210-0-2

Sreenarayanaguru Open University
Kollam, Kerala Pin- 691601, email: info@sgou.ac.in, www.sgou.ac.in Ph: +91 474 2966841